# Bijatmak Tantra Durga Saptashati

# બીજાત્મક તન્ત્ર દુર્ગા સપ્તશતી

## Document Information

Text title : Bijatmak Tantra Durga Saptashati

File name : tantradurgA700.itx

Category : devii, durgA, shatI, devI, saptashatI, tantra

Location : doc_devii

Proofread by : Preeti Bhandare

Description-comments : 700 shlokas for Devi Durga and mantra of each verse. See standard Durga saptashati mUlam

Latest update : August 15, 2024

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 16, 2024

*sanskritdocuments.org*

# બીજાત્મક તન્ત્ર દુર્ગા સપ્તશતી

॥ ॐ શ્રીગણેશાય નમઃ ॥
યદત્રસ્ખલિતઙ્કિઞ્ચિત્ પ્રમાદેન ભ્રમેણ વા ।
તત્સર્વં શોધયન્ત્વાર્યાં કસ્યનસ્ખલિતમ્મનઃ ॥ ૧॥
ગચ્છતસ્ખલનઙ્ક્વાપિ ભવત્યેવ પ્રમાદતઃ ।
હસન્તિ દુર્જનાસ્તત્ર સમાદધતિ સજ્જનાઃ ॥ ૨॥
વિનીત- શિવદત્ત શાસ્ત્રી

પ્રસઙ્ગવશશ્રીદુર્ગાસપ્તશતી કે પાઠ મેં આવશ્યક સઙ્કેત-
કવચ, અર્ગલા, કીલક કે પૂર્વ શાપોદ્ધારૌત્કીલનં તથા મૃત સઞ્જીવની વિદ્યા કા જપ કા વિધાન હૈ, કિન્તુ વિદ્વત્પરમ્પરા કા સિદ્ધાન્ત યહ હૈ કિ યદિ શ્રી દુર્ગાસપ્તશતી કા ષડઙ્ગ ( કવચ, અર્ગલા, કીલક તથા ત્રયોદશાધ્યાય કે બાદ રહસ્યત્રય) સહિત પાઠ કર લિયા જાય તો શ્રીદુર્ગાસપ્તશતી મેં શાપોદ્ધારાદિ કી કોઈ ભી આવશ્યકતા નહીં હૈ । વસ્તુતઃ યહી મત હમારી ભી ગુરુપરમ્પરા કા હૈ । અથવા જૈસા વિદ્વદ્વૃન્દ નિર્ણય કરેં વૈસા સ્વેચ્છાનુસાર કરેં । યહ નિર્ણય દુર્ગાસપ્તશતી કે પાઠ હી કા હૈ તન્ત્ર દુર્ગાસપ્તશતી કે પાઠ મેં પડઙ્ગ પાઠ ભી નહીં કરના ચાહિયે ।

શાપોદ્ધાર મન્ત્રઃ-
શાપોદ્ધાર કે લિએ નીચે વર્ણિત મન્ત્ર કા સાત બાર આદિ વ અન્ત મેં જપ કરના ચાહિયે ।
“ॐ હ્રીં ક્લીં શ્રીં ક્રાં ક્રીં ચણ્ડિકાદેવ્યૈ શાપનાશાનુગ્રહં કુરુ કુરુ સ્વાહા”

ઉત્કીલન મન્ત્રઃ-
શાપોદ્ધાર કે બાદ ઉત્કીલન-મન્ત્ર કા ૨૧ બાર આદિ વ અન્ત મેં જપ કરના ચાહિયે ।
“ॐ શ્રીં ક્લીં હ્રીં સપ્તશતિચણ્ડિકે ઉત્કીલનં કુરુ કુરુ સ્વાહા”

મૃતસઞ્જીવની મન્ત્રઃ-
ઉત્કીલન કે ઉપરાન્ત મૃતસઞ્જીવની મન્ત્ર કા સાત બાર આદિ વ અન્ત મેં પાઠ કરના ચાહિયે ।
“ॐ હ્રીં હ્રીં વં વં ઐં ઐં મૃતસઞ્જીવનિ વિદ્યે મૃતમુત્થાપયોત્થાપય ક્રીં હ્રીં હ્રીં વં સ્વાહા”

શ્રીદુર્ગાસપ્તશતી મેં કવચ
શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટાસ્વનેન નઃ પાહિ ચાપજ્યાનિસ્વનેન ચ ॥ ૪.૨૪॥ ॐ ઐં ક્રૂં નમઃ ॥ ૨૪॥

પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાન્તથેશ્વરિ ॥ ૪.૨૫॥ ૐ ઐં ક્ષ્રીં નમઃ ॥ ૨૫॥
સૌમ્યાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।
યાનિ ચાત્યર્થતઘોરાણિ તૈ રક્ષાસ્માંસ્તથા ભુવમ્ ॥ ૪.૨૬॥ ૐ ઐં મ્લૂં નમઃ ॥ ૨૬॥
ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાનિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્રક્ષ સર્વતઃ ॥ ૪.૨૭॥ ૐ ઐં ઘ્રેં નમઃ ॥ ૨૭॥
કવચ કે તન્ત્ર રૂપ મેં ક્રમશઃ મન્ત્ર દિયે ગયે હૈ ।

॥ આદિશક્તયેનમઃ ॥
॥ શ્રીતન્ત્રદુર્ગાસપ્તશતી ॥
વિશ્વેશ્વરીંવિશ્વમયીંવિરૂપા-
મજ્ઞાનહન્ત્રીંવિમલસ્વરૂપામ્ ।
શંશ્વત્પ્રસન્નાઙ્કુરુણાવતારાન્-
તન્ત્રસ્વરૂપાઞ્ચનમામિદુર્ગામ્ ॥ ૧॥
ચિદાનન્દરૂપે હરીશાદિબન્ધે-
સદામન્દહાસે જગદ્ભીતિનાશે ।
ચિદાનન્દદેત્વઞ્ચ તન્ત્રસ્વરૂપે-
જનં પાહિદીનન્તવાર્ચાવિહીનમ્ ॥ ૨॥
નજાનાતિવિષ્ણુઃશિવોનૈવવેત્તિ-
સ્વયમ્ભૂઃ સ્વયન્નૈવજાનાતિમાતઃ ।
ચરિત્રન્દયાધારિકેતેવિચિત્રઙ્-
કથન્મન્દબુદ્ધિર્જનઃસ્યાત્સમર્થ ॥ ૩॥
તથાપ્યમ્બલોકોપકારાયલોકે-
ચરિત્રંવદામ્યત્રકિઞ્ચિત્પ્રસિદ્ધમ્ ।
તબપ્રેરણૈવાભવધતુભૂતા-
મદીયેહૃદબ્જેમહાદેવિદુર્ગે ॥ ૪॥
॥ પાઠવિધિ ॥
સાધક સ્નાન કરકે પવિત્ર હો, આસન શુદ્ધિ કી ક્રિયા સમ્પન્ન કરકે પૂર્વાભમુખ હો શુદ્ધ આસાન પર બૈઠે સાથ મેં શુદ્ધ જલ (ગઙ્ગાજલ આદિ ) પૂજન સામગ્રી ઔર શ્રી તન્ત્રદુર્ગા સપ્તશતી કી પુસ્તક રખે । મસ્તક મેં અપને રુચિ કે અનુસાર ભસ્મ, ચન્દન, રોલી અથવા સેન્દુર લગા લેં । શિખા બાન્ધ લેં । તત્વ શુદ્ધિ કે લિએ ચાર બાર આચમન કરેં । તત્પશ્ચાત્ પ્રાણાયામ કરકે ગણેશ આદિ દેવતાઓં એવં ગુરુજનોં કો પ્રણામ કરેં । કુશ કી પવિત્રી ધારણ કરકે હાથ મેં લાલ ફૂલ, ચાવલ ઔર જલ લેકર નિમ્નાઙ્કિત રૂપ સે સઙ્કલ્પ કરે ।

ૐ વિષ્ણુર્વિષ્ણુર્વિષ્ણુઃ । ૐ નમઃ પરમાત્મને, શ્રી પુરાણ પુરુષોત્તમસ્ય વિષ્ણોરાજ્ઞયા પ્રવર્તમાનસ્યાદ્ય શ્રી બ્રાહ્મણોઽહ્નિ દ્વિતીયપરાર્દ્ધેશ્રીશ્વેતવારાહકલ્પેવૈવસ્વતમન્વન્તરેઽષ્ટાવિંશતિતમેકલિયુગે કલિપ્રથમચરણેજમ્બૂદ્વીપે ભરતખણ્ડે ભારતવર્ષે આર્યાવર્તાન્તર્ગત બ્રહ્માવર્તૈકદેશે પુણ્યક્ષેત્રે બૌદ્ધાવતારે વર્તમાને યથાનામ સંવત્સરે અમુકાયને અમુકમાઙ્ગલ્યપ્રદે માસાનામુત્તમે અમુકમાસે અમુકપક્ષે અમુકતિથૌ અમુકવાસરાન્વિતાયામ્ અમુકનક્ષત્રે અમુકરાશિસ્થિતે સૂર્યે અમુકરાશિસ્થિતેષુ ચન્દ્રભૌમબુધગુરુશુક્રશનિષુ સત્સુ શુભે યોગે શુભકરણે એવં ગુણવિશેષણવિશિષ્ટાયાં શુભપુણ્યતિથૌ સકલશાસ્ત્ર શ્રુતિસ્મૃતિપુરાણોક્ત ફલપ્રાપ્તિકામઃ અમુકગોત્રોત્પન્નઃ અમુક શર્માહં મમાત્મનઃ સપુત્રવાન્ધવસ્ય શ્રીનવદુર્ગાનુગ્રહતો ગ્રહકૃત રાજકૃતાદિ સર્વવિધપીડાનિવૃત્તિપૂર્વકન્નૈરુજ્યદીર્ઘાયુઃ પુષ્ટિ ધનધાન્યસમૃદ્ધ્યર્થં શ્રીનવદુર્ગામ્પ્રસાદેન સર્વાપન્નિવૃત્તિ સર્વાભીષ્ટ ફલાવાપ્તિ ધર્માર્થ કામમોક્ષચતુર્વિધપુરુષાર્થસિદ્ધિ દ્વારા શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વતી દેવતાપ્રીત્યર્થં તન્ત્રોક્તરાત્રિસૂક્ત પાઠન્યાસ વિધિ સહિત નવાર્ણજપ તાન્ત્રિકસપ્તશતી ન્યાસધ્યાન પૂર્વકઞ્ચ "ૐ ઐં શ્રીં નમઃ ૐ ઐં હ્રીં નમઃ । ઇત્યાદ્યારભ્ય ૐ ઐં ઓં નમઃ ઇત્યન્તન્તન્ત્રરૂપેણ પરિણતં શ્રીતન્ત્રદુર્ગાસપ્તશતી પાઠં તદન્તે ચ ન્યાસ વિધિસહિત નવાર્ણજપતાન્ત્રિક સપ્તશતી ન્યાસધ્યાન પૂર્વકં તાન્ત્રિક દેવીસૂક્ત પાઠઞ્ચ કરિષ્યે ।"
(યદિ દૂસરે સે પાઠાદિ કરવાના હો તો કારયિષ્યે, કહના ચાહિયે)

ઇસ પ્રકાર સઙ્કલ્પ કરકે ભગવતી શ્રી દુર્ગાદેવી કા ધ્યાન કરતે હુએ પઞ્ચોપચાર વિધિ સે પુસ્તક કી પૂજા કરેં । યદિ જ્ઞાત હો તો યોનિમુદ્રા પ્રદર્શિત કરકે ભગવતી કો પ્રણામ કરેં । પશ્ચાત્ નવાર્ણમન્ત્ર સે પીઠ મેં આધારશક્તિ કી સ્થાપના કરકે ઉસકે ઊપર પુસ્તક કો વિરાજમાન કરેં । પશ્ચાત્ યદિ જ્ઞાત હો અન્તર્માતૃકા બહિર્માતૃકા આદિન્યાસ કરે અન્યથા નહીં । પશ્ચાત્ ભગવતી કા ધ્યાન વ પૂજન આગે લિખિત શ્રી દુર્ગા પૂજાયન્ત્ર મેં કરેં ।

॥ અથષોડશોપચાર દુર્ગાપૂજનવિધિઃ ॥

સઙ્કલ્પઃ -
ૐ અદ્યેત્યાદિમમ 'અમુકગોત્રોત્પન્નયજમાનસ્ય' ઇહ જન્મનિસર્વામ્પચ્છાન્તિપૂર્વકન્દીર્ઘાયુર્વિપુલ પુત્રપૌત્રાદ્યવિચ્છિન્નસન્તતિવૃદ્ધિ
કીર્તિલાભશત્રુપરાજય પ્રમુખ-પ્રમુખચતુર્વિધપુરુષાર્થસિદ્ધ્યે શ્રીદુર્ગાપૂજન મહઙ્કરિષ્યે (કારયિષ્યે)।

ધ્યાનમ્ -
ૐ વિદ્યુદ્દામસમપ્રભામ્મૃગપતિસ્કન્ધસ્થિતામ્ભીષણાં
કન્યાભિઃકરવાલખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ।
હસ્તૈશ્ચક્રગદાસિખેટવિશિખાંશ્ચાપં ગુણ તર્જનીં
વિભ્રાણામનલાત્મિકાંશશિધરાન્દુર્ગા ત્રિનેત્રામ્ભજે ॥
અર્થઃ - મૈં ભગવતી દુર્ગાદેવી કા ધ્યાન કરતા હૂઁ - જો તીન નેત્ર વાલી હૈં જિનકે અંઙ્ગોં કી પ્રભા બિજલી કે સમાન હૈં । સિંહ કે કન્ધે પર ભયઙ્કર પ્રતીત હોતી હૈં, અનેક કન્યાયેં જિનકી સેવા મેં લગી હૈં । જિનકે હાથોં મેં ચક્ર, ગદા, તલવાર, ઢાલ, બાણ, ધનુષ, પાશ ઔર તર્જનીમુદ્ગર શોભાયમાન હૈં । જો અગ્નિમય હૈં તથા જો અપને માથે પર ચન્દ્રમા કા મુકુટ ધારણ કરતી હૈં ।

૧. આવાહનમ્ -
આગચ્છ વરદે દેવિ દૈત્યદર્પનિષૂદિનિ ।
પૂજાં ગૃહાણ સુમુખિ નમસ્તે શઙ્કરપ્રિયે ॥
૨. આસનમ્ -
અનેકરત્નસંયુક્તં નાનામણિગણાન્વિતમ્ ।
કાર્તસ્વરમયં દિવ્યમાસનં પ્રતિગૃહ્યતામ્ ॥
૩. પાદ્યમ્ -
ગઙ્ગાદિસર્વતીર્થેભ્યો મયા પ્રાર્થનયાહૃતમ્ ।
તોયમેતત્ સુખસ્પર્શં પાદ્યાર્થં પ્રતિગૃહ્યતામ્ ॥
૪. અર્ઘ્યમ્ -
ગન્ધપુષ્પાક્ષતૈ ર્યુક્તમર્ઘ્યં સમ્પાદિતં મયા ।
ગૃહાણ ત્વં મહાદેવિ પ્રસન્ના ભવ સર્વદા ॥
૫. આચમનમ્ -
આચમ્યતાં ત્વયા દેવિ ભક્તિં મે હ્યચલાં કુરુ ।
ઈપ્સિતં મે વરં દેહિ પરત્ર ચ પરાં ગતિમ્ ॥
૬. સ્નાનમ્ -
જાહ્નવીતોયમાનીતં શુભં કર્પૂરસંયુતમ્ ।
સ્નાપયામિ સુરશ્રેષ્ઠે ત્વાં પુત્રાદિફલપ્રદામ્ ॥
પઞ્ચામૃતસ્નાનમ્ -
પયોદધિઘૃતં ક્ષૌદ્રં સિતયા ચ સમન્વિતમ્ ।
પઞ્ચામૃતમનેનાદ્ય કુરુ સ્નાનં મહેશ્વરિ ॥
શુદ્ધોદકસ્નાનમ્ -
પરમાનન્દબોધાબ્ધિનિમગ્નાનિજમૂર્તયે ।
સાઙ્ગોપાઙ્ગમિદં સ્નાનં કલ્પયામિ સુરેશ્વરિ ॥
૭. વસ્ત્રમ્ -
વસ્ત્રં ચ સોમદૈવત્યં લજ્જાયાસ્તુ નિવારણમ્ ।
મયા નિવેદિતં ભક્ત્યા ગૃહાણ પરમેશ્વરિ ॥
ઉપવસ્ત્રમ્ -
યામાશ્રિત્યમહામાયા જગત્સમ્મોહિનીસદા ।
તસ્યૈવૈપર મેશાપૈકલ્પયામ્યુત્તરીયકમ્ ॥
મધુપર્કમ્ -
દધિમધ્વાજ્યસંયુક્ત પાત્ર યુગ્મસમન્વિતમ્ ।

મધુપર્કગૃહાણત્વં વરદા ભવશોભને ॥
ગન્ધમ્ -
પરમાનન્દ સૌભાગ્યપરિપૂર્ણદિગન્તરે ।
ગૃહાણ પરમં ગન્ધં કૃપયા પરમેશ્વરિ ॥
કુઙ્કુમમ્ -
કુઙ્કુમકાન્તિદં દિવ્યં કામિનીકામસમ્ભવમ્ ।
કુઙ્કુમેનાર્ચિતે દેવિ પ્રસીદપરમેશ્વરિ ॥
૮. આભૂષણમ્ -
હારકઙ્કણકેયૂરમેખલાકુણ્ડલાદિકમ્ ।
રત્નાઢ્યં કુણ્ડલોપેતં ભૂષણં પ્રતિગૃહ્યતામ્ ॥
સિન્દૂરમ્ -
સિન્દૂરમરુણાભાસં જપાકુસુમસન્નિભમ્ ।
પૂજિતાસિ મયા દેવિ પ્રસીદ પરમેશ્વરિ ॥
કજ્જલમ્ -
ચક્ષુર્ભ્યાં કજ્જલં રમ્યં સુભગે શાન્તિકારકે ।
કર્પૂરજ્યોતિરુત્પન્નં ગૃહાણ પરમેશ્વરિ ॥
સૌભાગ્યદ્રવ્યમ્ -
સૌભાગ્યસૂત્રં વરદે સુવર્ણમણિસંયુતે ।
કણ્ઠે બધ્નામિ દેવેશિ સૌભાગ્યં દેહિ મે સદા ॥
સુગન્ધિતૈલમ્ -
ચન્દનાગરુકર્પૂરકુઙ્કુમં રોચનં તથા ।
કસ્તૂર્યાદિસુગન્ધાંશ્ચ સર્વાઙ્ગેષુ વિલેપનમ્ ॥
પરિમલદ્રવ્યમ્ -
હરિદ્રારઞ્જિતે દેવિ સુખસૌભાગ્યદાયિનિ ।
તસ્માત્ ત્વાં પૂજયામ્યદ્યસુખં શાન્તિ પ્રયચ્છ મે ॥
અક્ષતાન્ -
રઞ્જિતાઃ કુઙ્કુમૌઘેન અક્ષતાશ્ચાતિશોભનાઃ ।
મામેષાં દેવિ દાનેન પ્રસન્ના ભવ શોભને ॥
પુષ્પાણિ -
મન્દારપારિજાતાદિ પાટલીકેતકાનિ ચ ।
જાતીચમ્પકપુષ્પાણિ ગૃહાણેમાનિ શોભને ॥
પુષ્પમાલામ્ -

સુરભિપુષ્પનિચયૈર્ગ્રથિતામ્પુષ્પમાલિકામ્ ।
દદામિતવશોભાર્થઙ્ગૃહાણપરમેશ્વરિ ॥
બિલ્વપત્રમ્ -
અમૃતોદ્ભવશ્રીવૃક્ષો મહાદેવિ પ્રિયઃ સદા ।
બિલ્વપત્રં પ્રયચ્છામિ પવિત્રં તે સુરેશ્વરિ ॥
૯. ધૂપમ્ -
દશાઙ્ગગુગ્ગુલન્ધૂપઞ્ચન્દનાગરુસંયુતમ્ ।
સમર્પિતં મયા ભક્ત્યા મહાદેવિ પ્રગૃહ્યતામ્ ॥
૧૦. દીપમ્ -
ધૃતવર્તિસમાયુક્તં મહાતેજો મહોજ્જ્વલમ્ ।
દીપં દદામિ દેવેશિ સુપ્રીતા ભવ સર્વદા ॥
૧૧. નૈવેદ્યમ્ -
અન્નં ચતુર્વિધં સ્વાદુ રસૈઃ ષડ્ભિઃ સમન્વિતમ્ ।
નૈવેદ્યં ગૃહ્યતાં દેવિ ભક્તિં મે હ્યચલાં કુરુ ॥ (હ્રચલાં)
ઋતુફલમ્ -
દ્રાક્ષાખર્જૂરકદલીપનસામ્રકપિત્થકમ્ ।
નારિકેલેક્ષુજમ્બ્વાદિફલાનિપ્રતિગુહ્યતામ્ ॥
આચમનમ્ -
કામારિવલ્લભેદેવિકુર્વાચમનમમ્બિકે ।
નિરન્તરમહં વન્દેચરણૌતત્ર ચણ્ડિકે ॥
અખણ્ડ-ઋતુફલમ્ -
નારિકેલઞ્ચનારઙ્ગકઙ્કુલિઙ્ગમઞ્જિરન્તથા ।
ઉર્વારુકઞ્ચદેવિશિફલાન્યૈતાનિગૃહ્ણતામ્ ॥
તામ્બૂલપૂગીફલાનિ -
એલાલવઙ્ગકસ્તૂરીકર્પૂરૈઃ પુષ્પવાસિતામ્ ।
વીટિકાં મુખવાસાર્થમર્પયામિ સુરેશ્વરિ ॥
૧૨. દક્ષિણા -
પૂજાફલસમદ્ધ્યર્થં તવાગ્રેસ્વર્ણમીશ્વરિ ।
સ્થાતિન્તેનમેપ્રીતાપૂર્ણાન્કુરુમનોરથાન્ ॥
પ્રાર્થના (નમસ્કારમ્) -
સર્વસ્વરૂપેસર્વેશે સર્વશક્તિસ્વરૂપિણિ ।
પૂજાઙ્ગૃહાણકૌમારિજગન્માતનમોઽસ્તુતે ॥

૧૩. આરતિકમ્ -
નીરાજનંસુમાઙ્ગલ્યકર્પૂરેણસમન્વિતમ્ ।
ચન્દ્રાર્કવહ્નિસદૃશં મહાદેવિનમોઽસ્તુતે ॥
પુષ્પાઞ્જલિ: -
દુર્ગેસ્મૃતાહરસિભીતિમશેષજન્તો:
સ્વસ્થૈ:સ્મૃતામતિમતીવશુભાન્દદાસિ ।
દારિદ્યદુ:ખભયહારિણિકાત્વદન્યા
સર્વોપકારકરણાય સદાર્દ્રચિત્તા ॥
૧૪. પ્રદક્ષિણા -
નમસ્તેદેવિદેવેશિ નમસ્તેઈપ્સિતપ્રદે ।
નમસ્તેજગતાન્ધાત્રિ નમસ્તેભક્તવત્સલે ॥
સાષ્ટાઙ્ગપ્રણામઃ -
નમઃસર્વહિતાર્થાયૈ જગદાધારહેતવે ।
સાષ્ટાઙ્ગોઽયમ્પ્રણામ સ્તુપ્રયત્નેનમયાકૃતઃ ॥
૧૫. પ્રાર્થના -
પુત્રાન્દેહિધનં દેહિ સૌભાગ્યં દેહિમઙ્ગલે ।
અન્યાંશ્ચસર્વકામાંશ્ચ દેહિદેવિ નમોઽસ્તુતે ॥
૧૬. વિસર્જનમ્ -
ઇમામ્પૂજામ્મયાદેવિયથાશક્ત્યા મહેશ્વરિ ।
રક્ષાર્થન્ત્વંસમાદાયવ્રજસ્થાનંયથોત્તમમ્ ॥

For the illustration of the yantra interested readers may refer the link of the book given at the bottom end of this page. The textual part is given below.

## ॥ યન્ત્રવિવરણમ્ ॥

ત્રિકોણે - ૩ ।
ત્રિકોણાદ્બાહ્યે - ૧૦ ।
ષટ્કોણેષુ - ૬ ।
અષ્ટપત્રેષુ - ૨૪ ।
ચતુર્વિંશતિદલેષુ - ૨૪ ।
તદ્યથા -
૧ - વિષ્ણુમાયા ।

૨ - ચેતના ।

૩ - વૃધ્ધિઃ ।

૪ - નિદ્રા ।

૫ - ક્ષુધા ।

૬ - છાયા ।

૭ - શક્તિઃ ।

૮ - તૃષ્ણા ।

૯ - ક્ષાન્તિઃ ।

૧૦ - જાતિઃ ।

૧૧ - લજ્જા ।

૧૨ - શાન્તિઃ ।

૧૩ - શ્રધ્ધા ।

૧૪ - કાન્તિઃ ।

૧૫ - લક્ષ્મી ।

૧૬ - ધૃતિઃ ।

૧૭ - વૃત્તિઃ ।

૧૮ - સ્મૃતિઃ ।

૧૯ - દયા ।

૨૦ - તુષ્ટિઃ ।

૨૧ - પુષ્ટિઃ ।

૨૨ - માતૃ ।

૨૩ - ભ્રાન્તિઃ ।

૨૪ - ચિતિઃ ।

ચતુર્વિંશતિદલેભ્યોબાહ્યે ૧૦ - તતોદિક્પાલાયુધવાહનાદિ ૧૦ । તતોભૂપુરબાહ્યે ૪ ।

“યન્ત્રસ્થદેવતા પરિચયઃ”

૧ - ત્રિકોણેબિન્દુમધ્યે હ્રીં

૨ - ત્રિકોણમધ્યે

ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ।

ૐ મં મઙ્ગલાયૈ નમઃ ।

૧૦ - ત્રિકોણાદ્બાહ્યે

પૂ૦ કોણે - ૧ - ૐ બ્રહ્મણે નમઃ । ૨ - ૐ સરસ્વત્યૈ નમઃ ।

નૈ૦કોણે - ૩ - ૐ વિષ્ણવે નમઃ । ૪ - ૐ શ્રિયૈ નમઃ ।

વા૦કોણે - ૫- ૐ શિવાય નમઃ । ૬ - ૐ ઉમાયૈ નમઃ ।

દક્ષિણે - ૭ - ૐ મં મહિષાય નમઃ । ૮ - કાં કાલાય નમઃ ।

ઉત્તરે - ૯ - ૐ સિં સિંહાય નમઃ । ૧૦ - ૐ મૃં મૃત્યવે નમઃ ।

૬- ષટ્કોણમધ્યે પૂર્વાદિક્રમેણ-

૧ - ૐ નં નન્દજાયૈ નમઃ । ૨ - ૐ રં રક્તદન્તિકાયૈ નમઃ ।

૩ - ૐ શાં શાકમ્ભર્ય્યૈ નમઃ । ૪ - ૐ દું દુર્ગાયૈ નમઃ ।

૫ - ૐ ભીં ભીમાયૈ નમઃ । ૬ - ૐ ભ્રાં ભ્રામર્યૈ નમઃ ।

૪ - ષટ્કોણબાહ્યે (વાહનાદીનિ)

કેચિન્મતેઽત્રૈવમહિષાદીનાંસ્થાપનાદિ

દક્ષિણે - ૐ મં મહિષાય નમઃ । ૐ કાં કાલાય નમઃ । ઉત્તરે - ૐ સિં સિંહાય નમઃ । ૐ મૃં મૃત્યવે નમઃ ।

૨૪ - અષ્ટપત્રેષુ પૂર્વાદિક્રમેણ -

પૂર્વે - ૐ જં જયાયૈ નમઃ । ૐ બ્રાં બ્રાહ્મયૈ નમઃ । ૐ અં અસિતાઙ્ગભૈરવાય નમઃ ।

દક્ષિણે - ૐ અં અજિતાયૈ નમઃ । ૐ માં માહેશ્વર્ય્યૈ નમઃ । ૐ ચં ચણ્ડભૈરવાય નમઃ ।

પશ્ચિમે - ૐ નિં નિત્યાયૈ નમઃ । ૐ કૌં કૌમાર્ય્યૈ નમઃ । ૐ ઉં ઉન્મત્તભૈરવાય નમઃ ।

ઉત્તરે - ૐ વિં વિજયાયૈ નમઃ । ૐ વૈં વૈષ્ણવ્યૈ નમઃ । ૐ રું રુરુભૈરવાય નમઃ ।

અ૦ કોણે - ૐ દ્રોં દ્રોઙ્યૈ (દ્રોગ્ધ્યૈ) નમઃ । ૐ વાં વારાહ્યૈ નમઃ । ૐ ભીં ભીષણભૈરવાય નમઃ ।

નૈ૦ કોણે - ૐ અં અઘોરાયૈ નમઃ । ૐ નાં નારસિંહ્યૈ નમઃ । ૐ સં સંહારભૈરવાય નમઃ ।

વા૦ કોણે - ૐ વિલાસિન્યૈ નમઃ । ૐ અં અપરાજિતાયૈ (ઐં ઐન્દ્યૈ) નમઃ । ૐ કં કપાલભૈરવાય નમઃ ।

ઈ૦ કોણે - ૐ અં અપરાજિતાયૈ નમઃ । ૐ ચાં ચામુણ્ડાયૈ નમઃ । ૐ ક્રોં ક્રોધભૈરવાય નમઃ ।

૨૪ - તતશ્ચતુર્વિંશતિદલેષુ પૂર્વાદિક્રમેણ -

ૐ વિં વિષ્ણુમાયાયૈ નમઃ ॥ ૧॥

ૐ ચેં ચેતનાયૈ નમઃ ॥ ૨॥

ૐ વું વુદ્ધ્યૈ (બું બુદ્ધ્યૈ) નમઃ ॥ ૩॥

ૐ નિં નિદ્રાયૈ નમઃ ॥ ૪॥

ૐ ક્ષું ક્ષુધાયૈ નમઃ ॥ ૫॥

ૐ છાં છાયાયૈ નમઃ ॥ ૬॥

ૐ શં શક્તયૈ નમઃ ॥ ૭॥

ૐ તૃં તૃષ્ણાયૈ નમઃ ॥ ૮॥

ૐ ક્ષાં ક્ષાન્ત્યૈ નમઃ ॥ ૯॥

ॐ જાં જાત્યૈ નમઃ ॥ ૧૦ ॥
ॐ લં લજ્જાયૈ નમઃ ॥ ૧૧ ॥
ॐ શાં શાન્ત્યૈ નમઃ ॥ ૧૨ ॥
ॐ શ્રં શ્રદ્ધાયૈ નમઃ ॥ ૧૩ ॥
ॐ કાં કાન્ત્યૈ નમઃ ॥ ૧૪ ॥
ॐ લં લક્ષ્મ્યૈ નમઃ ॥ ૧૫ ॥
ॐ ધૃં ધૃત્યૈ નમઃ ॥ ૧૬ ॥
ॐ સ્મૃં સ્મૃત્યૈ નમઃ ॥ ૧૭ ॥ (વૃં વૃત્યૈ)
ॐ વૃં વૃત્યૈ નમઃ ॥ ૧૮ ॥ (સ્મૃં સ્મૃત્યૈ)
ॐ તું તુષ્ટ્યૈ નમઃ ॥ ૧૯ ॥ (દં દયાયૈ)
ॐ પું પુષ્ટયૈ નમઃ ॥ ૨૦ ॥ (તું તુષ્ટ્યૈ)
ॐ દં દયાયૈ નમઃ ॥ ૨૧ ॥ (પું પુષ્ટયૈ)
ॐ માં માત્રે નમઃ ॥ ૨૨ ॥
ॐ ભ્રાં ભ્રાન્ત્યૈ નમઃ ॥ ૨૩ ॥
ॐ ચિં ચિત્યૈ નમઃ ॥ ૨૪ ॥
૧૦ - તતશ્ચતુર્વિંશતિદલેભ્યોબાહ્યે-
લં ઇન્દ્રાય નમઃ ॥ ૧ ॥
રં અગ્નયે નમઃ ॥ ૨ ॥
મં યમાય નમઃ ॥ ૩ ॥
ક્ષં નિરૃતયે નમઃ ॥ ૪ ॥
વં વરુણાય નમઃ ॥ ૫ ॥
યં વાયવે નમઃ ॥ ૬ ॥
સં સોમાય નમઃ ॥ ૭ ॥
ઈં (હં) ઈશાનાય નમઃ ॥ ૮ ॥
ઈશાનપૂર્વયોર્મધ્યે - અં બ્રાહ્મણે (બ્રહ્મણે) નમઃ ॥ ૯ ॥
પશ્ચિમનિરૃતયોર્મધ્યે - હ્રીં અનન્તાય નમઃ ॥ ૧૦ ॥
૧૦-તતોદિક્પાલાયુધાવાહનાદિ-યથા-
ॐ વં વજ્રાય નમઃ ॥ ૧ ॥
ॐ શં શક્તયે નમઃ ॥ ૨ ॥
ॐ દં દણ્ડાય નમઃ ॥ ૩ ॥
ॐ ખં ખડ્ગાય નમઃ ॥ ૪ ॥
ॐ પાં પાશાય નમઃ ॥ ૫ ॥

ૐ અં અઙ્કુશાય નમઃ ॥ ૬॥

ૐ ગં ગદાયૈ નમઃ ॥ ૭॥

ૐ શં ત્રિશૂલાય નમઃ ॥ ૮॥ var (ૐ ત્રિં ત્રિશૂલાય નમઃ)

ૐ પં પદ્માય નમઃ ॥ ૯॥

ૐ ચં ચક્રાય નમઃ ॥ ૧૦॥

૪ - તતોભૂપુરબાહ્યે ચતુષ્કોણેષુ-

ઐશાન્યામ્ - ગં ગણપતયે નમઃ ॥ ૧॥

આગ્નેય્યામ્ - ક્ષં ક્ષેત્રપાલાય નમઃ ॥ ૨॥

નૈરૃત્યામ્ - વં વટુકાય નમઃ ॥ ૩॥

વાયવ્યે - યોં યોગિનીભ્યો નમઃ ॥ ૪॥

॥ ઇતિપૂર્વોક્તપ્રકારેણસર્વાન્દેવાનાબાહ્યપૂજયેત્ ॥

॥ યન્ત્રપૂજન સઙ્કેત ॥

યન્ત્ર મેં લિખે અઙ્કાનુસાર દેવતાઓં કા આવાહનાદિ પૂજનવિધાન વિધિવત્ કર કે યન્ત્ર પર ઘટ સ્થાપન આદિ કાર્યક્રમ કરે । પશ્ચાત્ શ્રી દુર્ગાદેવી કી મૂર્તિ સ્વર્ણ આદિ કિસી ભી ધાતુ કી હો ઉસમેં પ્રાણાપ્રતિષ્ઠાપર્યન્ત સભી સંસ્કાર કરકે ષોડશોપચાર પૂજન કરે । અથવા ચિત્રરખ કરકે પૂજનાદિ કરકે શ્રી તન્ત્રમયી અર્થાત્ બીજમયી શ્રી તન્ત્ર દુર્ગા સપ્તશતીકા પાઠ કરે ॥ પાઠારમ્ભ સે પૂર્વ તન્ત્રરૂપ-રાત્રિ સૂક્ત કા પાઠ-પશ્ચાત્ નવાર્ણમન્ત્રજપ ન્યાસદિ સહિત તથા તન્ત્ર સપ્તશતી કા ભી ન્યાસવધ્યાન આવશ્યક હૈ ।

## તન્ત્રોક્તં રાત્રિસૂક્તમ્

વિબોધનાર્થાય હરેર્હરિનેત્રકૃતાલયામ્ ।

વિશ્વેશ્વરીં જગદ્ધાત્રીં સ્થિતિસંહારકારિણીમ્ ॥ ૧.૭૦॥ ૐ ઐં બ્લૂં નમઃ ॥ ૧॥

નિદ્રાં ભગવતીં વિષ્ણોરતુલાં તેજસઃ પ્રભુઃ ॥ ૧.૭૧॥ ૐ ઐં ઠાં નમઃ ॥ ૨॥

બ્રહ્મોવાચ ॥ ૧.૭૨॥ ૐ ઐં હ્રીં નમઃ ॥ ૩॥

ત્વં સ્વાહા ત્વં સ્વધા ત્વં હિ વષટ્કારઃ સ્વરાત્મિકા ॥ ૧.૭૩॥ ૐ ઐં સ્રાં (સ્ત્રાં) નમઃ ॥ ૪॥

સુધા ત્વમક્ષરે નિત્યે ત્રિધા માત્રાત્મિકા સ્થિતા ।

અર્ધમાત્રા સ્થિતા નિત્યા યાનુચ્ચાર્યાવિશેષતઃ ॥ ૧.૭૪॥ ૐ ઐં સ્લૂં નમઃ ॥ ૫॥

ત્વમેવ સન્ધ્યા સાવિત્રી ત્વં દેવિ જનની પરા ।

ત્વયૈતદ્ધાર્યતે વિશ્વં ત્વયૈતત્ સૃજ્યતે જગત્ ॥ ૧.૭૫॥ ૐ ઐં ક્રૈં નમઃ ॥ ૬॥

ત્વયૈતત્ પાલ્યતે દેવિ ત્વમત્સ્યન્તે ચ સર્વદા ।

વિસૃષ્ટૌ સૃષ્ટિરૂપા ત્વં સ્થિતિરૂપા ચ પાલને ॥ ૧.૭૬॥ ૐ ઐં ત્રાં નમઃ ॥ ૭॥

તથા સંહૃતિરૂપાન્તે જગતોઽસ્ય જગન્મયે ।

મહાવિદ્યા મહામાયા મહામેધા મહાસ્મૃતિઃ ॥ ૧.૭૭॥ ૐ ઐં ક્ષાં નમઃ ॥ ૮॥
મહામોહા ચ ભવતી મહાદેવી મહેશ્વરી ।
પ્રકૃતિસ્ત્વં ચ સર્વસ્ય ગુણત્રયવિભાવિની ॥ ૧.૭૮॥ ૐ ઐં જીં નમઃ ॥ ૯॥
કાલરાત્રિર્મહારાત્રિર્મોહરાત્રિશ્ચ દારુણા ।
ત્વં શ્રીસ્ત્વમીશ્વરી ત્વં હ્રીસ્ત્વં બુદ્ધિર્બોધલક્ષણા ॥ ૧.૯॥ ૐ ઐં લૂં નમઃ ॥ ૧૦॥
લજ્જા પુષ્ટિસ્તથા તુષ્ટિસ્ત્વં શાન્તિઃ ક્ષાન્તિરેવ ચ ।
ખડ્ગિની શૂલિની ઘોરા ગદિની ચક્રિણી તથા ॥ ૧.૮૦॥ ૐ ઐં સ્લૂં નમઃ ॥ ૧૧॥
શઙ્ખિની ચાપિની બાણભુશુણ્ડીપરિઘાયુધા ।
સૌમ્યા સૌમ્યતરાશેષસૌમ્યેભ્યસ્ત્વતિસુન્દરી ॥ ૧.૮૧॥ ૐ ઐં નોં નમઃ ॥ ૧૨॥
પરાપરાણાં પરમા ત્વમેવ પરમેશ્વરી ।
યચ્ચ કિઞ્ચિત્ક્વચિદ્વસ્તુ સદસદ્વાખિલાત્મિકે ॥ ૧.૮૨॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૧૩॥
તસ્ય સર્વસ્ય યા શક્તિઃ સા ત્વં કિં સ્તૂયસે મયા ।
યયા ત્વયા જગત્સ્રષ્ટા જગત્પાત્યત્તિ યો જગત્ ॥ ૧.૮૩॥ ૐ ઐં પ્રૂં નમઃ ॥ ૧૪॥
સોઽપિ નિદ્રાવશં નીતઃ કસ્ત્વાં સ્તોતુમિહેશ્વરઃ ।
વિષ્ણુઃ શરીરગ્રહણમહમીશાન એવ ચ ॥ ૧.૮૪॥ ૐ ઐં સ્રૂં (સૂં) નમઃ ॥ ૧૫॥
કારિતાસ્તે યતોઽતસ્ત્વાં કઃ સ્તોતું શક્તિમાન્ ભવેત્ ।
સા ત્વમિત્થં પ્રભાવૈઃ સ્વૈરુદારૈર્દેવિ સંસ્તુતા ॥ ૧.૮૫॥ ૐ ઐં જાં નમઃ ॥ ૧૬॥
મોહયૈતૌ દુરાધર્ષાવસુરૌ મધુકૈટભૌ ।
પ્રબોધં ચ જગત્સ્વામી નીયતામચ્યુતો લઘુ ॥ ૧.૮૬॥ ૐ ઐં વૌં (બૌં) નમઃ ॥ ૧૭॥
બોધશ્ચ ક્રિયતામસ્ય હન્તુમેતૌ મહાસુરૌ ॥ ૧.૮૭॥ ૐ ઐં ઓં નમઃ ॥ ૧૮॥

## ॥ અથ નવાર્ણ જપ વિધિઃ ॥

ઇસ પ્રકાર તન્ત્ર રૂપ મેં પરિણત રાત્રિસૂક્તિ કા પાઠ કરને કે પશ્ચાત્ નિમ્નાઙ્કિત રૂપ સે નવાર્ણમન્ત્ર કે વિનિયોગ ન્યાસ ઔર ધ્યાન કરે ॥

નવાર્ણ મન્ત્ર કા વિનિયોગ - ન્યાસાદિ
॥ વિનિયોગઃ ॥
શ્રીગણપતિર્જયતિ ।
ૐ નવાર્ણમન્ત્રસ્ય બ્રહ્મવિષ્ણુરુદ્રાઋષયઃ,
ગાયત્ર્યુષ્ણિગનુષ્ટુભશ્છદાંસિ,
શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વત્યોદેવતા,
ઐં બીજમ્,

હ્રીં શક્તિઃ,
ક્લીં કીલકમ્,
શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વતીપ્રીત્યર્થે જપે વિનિયોગઃ ।
પૂર્વોક્ત પઢ઼કર જલ ગિરાવે ।
તત્પશ્ચાત્ મન્ત્રોં દ્વારા ઇસ ભાવના સે શરીર કે સમસ્ત અઙ્ગોં મેં મન્ત્રરૂપ સે દેવતાઓં કા વાસ હો રહા હૈ, ન્યાસ કરેં । ઐસા કરને સે પાઠ યા જપ કરને વાલા વ્યક્તિ મન્ત્રમય હો જાતા હૈ તથા મન્ત્ર મેં અધિષ્ઠિત દેવતા ઉસકી રક્ષા કરતે હૈં । ઇસકે અતિરિક્ત ન્યાસ દ્વારા ઉસકે બાહર-ભીતર કી શુદ્ધિ હોતી હૈ ઔર સાધના નિર્વિઘ્ન પૂર્ણ હોતી હૈ ।
નિમ્નલિખિત ન્યાસ વાક્યોં સે એક એક કા ઉચ્ચારણ કરકે દાહિને હાથ કી અઙ્ગુલિયોં સે ક્રમશઃ શિર-મુખ-હૃદય-ગુદા-દોનોં ચરણ ઔર નાભિ ઇસ અઙ્ગોં કા સ્પર્શ કરે ।

॥ ઋષ્યાદિન્યાસઃ ॥
બ્રહ્મવિષ્ણુરુદ્રઋષિભ્યો નમઃ, શિરસિ ।
ગાયત્ર્યુષ્ણિગનુષ્ટુપ્છન્દોભ્યો નમઃ, મુખે ।
મહાકાલી મહાલક્ષ્મી મહાસરસ્વતી દેવતાભ્યો નમઃ, હૃદિ ।
ઐં બીજાય નમઃ, ગુહ્યે ।
હ્રીં શક્તયે નમઃ, પાદયોઃ ।
ક્લીં કીલકાય નમઃ, નાભૌ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે, સર્વાઙ્ગે, ઇસ મૂલમન્ત્ર સે હાથોં કી શુદ્ધિ કરકે કરન્યાસ કરેં ।

॥ કરન્યાસઃ ॥
કરન્યાસ મેં હાથ કી વિભિન્ન અઙ્ગુલિયોં હથેલિયોં ઔર હાથ કે પૃષ્ઠ ભાગ મેં મન્ત્રોં કા ન્યાસ (સ્થાપિત) કિયા જાતા હૈ । ઇસી પ્રકાર અઙ્ગન્યાસ મેં હૃદયાદિ અઙ્ગોં મેં મન્ત્રોં કી સ્થાપના હોતી હૈ મન્ત્રોં કો ચેતન ઔર મૂર્તિમાન્ માનકર ઉન ઉન અઙ્ગોં કા નામ લેકર ઉન મન્ત્રમય દેવતાઓં કા હી સ્પર્શ ઔર વન્દન કિયા જાતા હૈ । ઐસા કરને સે પાઠ યા જપ કરને વાલા સ્વયં મન્ત્રમય હોકર મન્ત્ર દેવતાઓં દ્વારા સર્વથા સુરક્ષિત હો જાતા હૈં । ઉસકે બાહર ભીતર કી શુદ્ધિ હોતી હૈ । દિવ્યબલ પ્રાપ્ત હોતા હૈ ઔર સાધના નિર્વિઘ્નતા પૂર્વક પૂર્ણ તથા પરમ લાભદાયક હોતી હૈ ।
ૐ ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ । (દોનોં હાથોં કે તર્જની અઁગુલિયોં સે દોનોં અઁગુઠોં કા સ્પર્શ)
ૐ હ્રીં તર્જનીભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં તર્જની અઁગુલિયોં કા સ્પર્શ)
ૐ ક્લીં મધ્યમાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં માધ્યમા અઁગુલિયોં કા સ્પર્શ)
ૐ ચામુણ્ડાયૈ અનામિકાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં અનામિકા અઁગુલિયોં કા સ્પર્શ)
ૐ વિચ્ચે કનિષ્ઠિકાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં કનિષ્ઠકા અઁગુલિયોં કા સ્પર્શ)
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે કરતલ કરપૃષ્ઠાભ્યાં નમઃ । (હથેલિંયોં ઔર ઉનકે પૃષ્ઠ ભાગોં કા પરસ્પર સ્પર્શ)

॥ હૃદયાદિન્યાસઃ ॥

ઇસમેં દાહિને હાથ કી પાઁચોં અઁગુલિયોં સે હૃદય આદિ અઙ્ગોં કા સ્પર્શ કિયા જાતા હૈ ।

ૐ ઐં હૃદયાય નમઃ । (દાહિને હાથ કી પાઁચોં અઁગુલિયોં સે હૃદય કા સ્પર્શ)

ૐ હ્રીં શિરસે સ્વાહા । (સિર કા સ્પર્શ)

ૐ ક્લીં શિખાયૈ વષટ્ । (શિખા કા સ્પર્શ)

ૐ ચામુણ્ડાયૈ કવચાય હુમ્ । (દાહિને હાથ કી અઁગુલિયોં સે બાયેં કન્ધે કા ઔર બાઁયેં હાથ કી અઙ્ગુલિયોં સે દાહિને કન્ધે કા સાથ હી સ્પર્શ)

ૐ વિચ્ચે નેત્રત્રયાય વૌષટ્ । (દાહિને હાથ કી અઁગુલિયોં કે અગ્ર ભાગ સે દોનોં નેત્રોં ઔર લલાટ કે મધ્ય ભાગ કા સ્પર્શ)

ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે અસ્ત્રાય ફટ્ । (યહ વાક્ય પઢ઼કર દાહિને હાથ કો સિર કે ઉપર સે બાઁયી ઓર સે પીછે કી ઓર લે જાકર દાહિની ઓર સે આગે કી ઓર લે આયે ઔર તર્જની તથા મધ્યમા અઁગુલિયોં સે બાયેં હાથ કી હથેલી પર તાલ બજાવેં ।

॥ અક્ષરન્યાસઃ ॥

નિમ્નાઙ્કિત વાક્યોં કો પઢ઼કર ક્રમશઃ શિખા આદિ કા દાહિને હાથ કી અઙ્ગુલિયોં સે સ્પર્શ કરે ।

ૐ ઐં નમઃ શિખાયામ્ ।

ૐ હ્રીં નમઃ દક્ષિણનેત્રે ।

ૐ ક્લીં નમઃ વામનેત્રે ।

ૐ ચાં નમઃ દક્ષિણકર્ણે ।

ૐ મું નમઃ વામકર્ણે ।

ૐ ડાં નમઃ દક્ષિણનાસાપુટે ।

ૐ યૈં નમઃ વામનાસાપુટે ।

ૐ વિં નમઃ મુખે ।

ૐ ચ્ચેં નમઃ ગુહ્યે ।

એવં વિન્યસ્ય “ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે” ઇતિ નવાર્ણમન્ત્રેણ અષ્ટવારં વ્યાપકં કુર્યાત્ ।

ઇસ પ્રકાર ન્યાસ કરકે “ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે”, ઇસ મન્ત્ર સે આઠ બાર વ્યાપક (દોનોં હાથોં દ્વારા) સિર સે લેકર પૈર તક કે સબ અઙ્ગોં કા સ્પર્શ કરેં । બાદ મેં પ્રત્યક દિશા મેં ચુટ્કી બજાતે હુયે ન્યાસ કરેં ।

॥ દિઙ્ન્યાસઃ ॥

ૐ ઐં પ્રાચ્યૈ નમઃ ।

ૐ ઐં આગ્નેય્યૈ નમઃ ।

ૐ હ્રીં દક્ષિણાયૈ નમઃ ।

ૐ હ્રીં નૈઋત્યૈ નમઃ ।
ૐ ક્લીં પ્રતીચ્યૈ નમઃ ।
ૐ ક્લીં વાયવ્યૈ નમઃ ।
ૐ ચામુણ્ડાયૈ ઉદીચ્યૈ નમઃ ।
ૐ ચામુણ્ડાયૈ ઐશાન્યૈ નમઃ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ઊર્ધ્વાયૈ નમઃ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ભૂમ્યૈ નમઃ ।

॥ ધ્યાનં ॥

મહાકાલી -
ખડ્ગચ્ચક્રગદેષુ ચાપપરિઘાચ્છૂલમ્ભુશુણ્ડીં શિરઃ
શઙ્ખંસન્દધતીં કરૈસ્ત્રિનયનાં સર્વાઙ્ગભૂષાવૃતામ્ ।
નીલાશ્મદ્યુતિમાસ્યપાદદશકાં સેવે મહાકાલિકાં
યામસ્તૌત્સ્વપિતે હરૌકમલજો હન્તુમ્મધુકૈટભમ્ ॥ ૧॥
મહાલક્ષ્મી -
અક્ષસ્રક્પરશું ગદેષુકુલિશં પદ્મન્ધનુષ્કુણ્ડિકાં (પદ્મન્ધનુઃકુણ્ડિકાં)
દણ્ડંશક્તિમસિં ચ ચર્મ જલજં ઘણ્ટાં સુરાભાજનમ્ ।
શૂલં પાશસુદર્શને ચ દધતીં હસ્તૈઃ પ્રસન્નાનનાં
સેવે સૈરિભમર્દિનીમિહ મહાલક્ષ્મીં સરોજસ્થિતામ્ ॥ ૨॥
મહાસરસ્વતી -
ઘણ્ટાશૂલહલાનિ શઙ્ખમુસલે ચક્રં ધનુઃ સાયકં
હસ્તાબ્જૈર્દધતીં ઘનાન્તવિલસચ્છીતાંશુતુલ્યપ્રભામ્ ।
ગૌરીદેહસમુદ્ભવાં ત્રિજગતામાધારભૂતાં મહા-
પૂર્વામત્ર સરસ્વતીમનુભજે શુમ્ભાદિદૈત્યાર્દિનીમ્ ॥ ૩॥
માલા પ્રાર્થના
ફિર “ઐં હ્રીં અક્ષમાલિકાયૈ નમઃ” ઇસ મન્ત્ર સે માલા કી પૂજા કરકે પ્રાર્થના કરેં-

ૐ માં માલે મહામાયે સર્વશક્તિ સ્વરૂપિણિ ।
ચતુર્વર્ગસ્ત્વયિ ન્યસ્તસ્તસ્માન્મે સિદ્ધિદા ભવ ॥ ૧॥
ૐ અવિઘ્નં કુરુ માલે ત્વં ગૃહ્ણામિ દક્ષિણેઃકરે ।
જપકાલે ચ સિદ્ધ્યર્થં પ્રસીદ મમ સિદ્ધયે ॥ ૨॥
ઇસકે પશ્ચાત
ૐ અક્ષમાલાધિપતયે સુસિદ્ધિં દેહિ દેહિ સર્વમન્ત્રાર્થસાધિનિ

સાધય સાધય સર્વસિદ્ધિં પરિકલ્પય પરિકલ્પય મે સ્વાહા ॥
ઇસકે બાદ “ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે” ઇસ મન્ત્ર કા ૧૦૮ બાર જપ કરેં ઔર-
ગુહ્યાતિગુહ્યગોપ્ત્રી ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવિ ત્વત્પ્રસાદાન્ મહેશ્વરિ ॥
ઇસ શ્લોક કો પઢ઼કર દેવી કે વામહસ્ત મેં જપ નિવેદન કરેં ।

॥ ઇતિનવાર્ણજપવિધિઃ ॥
નવાર્ણ વિધિ મેં અનુસાર જપ કરને કે બાદ સપ્તશતી કે વિનિયોગ ન્યાસ ઔર ધ્યાન કરને ચાહિયે । પૂર્વાઙ્કિત ક્રમાનુસાર ન્યાસાદિ કરેં ।
અથ બીજાત્મક શ્રીતન્ત્ર દુર્ગા સપ્તશતી વિનિયોગ-ન્યાસ-ધ્યાનાદિ ।

વિનિયોગઃ-
પ્રથમમધ્યમોત્તરચરિત્રાણાં બ્રહ્મવિષ્ણુરુદ્રા ઋષયઃ,
શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વત્યો દેવતાઃ,
ગાયત્ર્યુષ્ણિગનુષ્ટુભશ્છન્દાંસિ,
નન્દાશાકમ્ભરીભીમાઃ શક્તયઃ,
રક્તદન્તિકા દુર્ગાભ્રામર્યો બીજાનિ,
અગ્નિ વાયુ સૂર્યાસ્તત્ત્વાનિ,
ઋગ્યજુઃ સામવેદા ધ્યાનાનિ,
સકલકામનાસિદ્ધયે શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વતી પ્રીત્યર્થે જપે વિનિયોગઃ ।
ઇસે પઢકર જલ ગિરાયેં ।

॥ કરન્યાસ ॥
ખડ્ગની શૂલિની ઘોરા ગદિની ચક્રિણી તથા । (ખડ્ગિની)
શઙ્ખિની ચાપિની બાણભુશુણ્ડી પરિઘાયુધા ॥
ૐ ઐં સ્લૂં અઙ્ગુષ્ઠાભ્યાં નમઃ ।

ૐ શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટા સ્વનેન નઃ પાહિ ચાપજ્યાનિસ્વનેન ચ ॥ (ચાપજ્યાનિઃસ્વનેન)
ૐ ઐં ક્ષ્રૂં તર્જનીભ્યાં નમઃ ।

પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાન્તથેશ્વરિ ॥
ૐ ઐં ક્રીં મધ્યમાભ્યાં નમઃ ।

ૐ સૌમ્યાનિયાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।

યાનિ ચાત્યર્થઘોરાણિ તૈઃ રક્ષાસ્માંસ્તથા ભુવમ્ ॥
ॐ ઐં મ્લૂં અનામિકાભ્યાં નમઃ ।

ॐ ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાણિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્ રક્ષ સર્વતઃ ॥
ॐ ઐં ઘૈં (ઘ્રૈં, ઘ્રેં) કનિષ્ઠિકાભ્યાં નમઃ ।

ॐ સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુતે ॥
ॐ ઐં શ્રૂં કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ ઋષ્યાદિન્યાસઃ ॥
ખડ્ગિની શૂલિની ઘોરા ગદિની ચક્રિણી તથા ।
શઙ્ખિની ચાપિની બાણભુશુણ્ડી પરિઘાયુધા ॥
ॐ ઐં સ્લૂં નમઃ હૃદયાય નમઃ ।

ॐ શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટા સ્વનેન નઃ પાહિ ચાપજ્યાનિસ્વનેન ચ ॥ (ચાપજ્યાનિઃસ્વનેન)
ॐ ઐં ક્રૈં નમઃ શિરસે સ્વાહા ।

પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાન્તથેશ્વરિ ॥
ॐ ઐં ક્રીં નમઃ શિખાયૈ વષટ્ ।

ॐ સૌમ્યાનિયાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।
યાનિ ચાત્યર્થઘોરાણિ તૈઃ રક્ષાસ્માંસ્તથા ભુવમ્ ॥
ॐ ઐં મ્લૂં નમઃ કવચાય હુમ્ ।

ॐ ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાણિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્ રક્ષ સર્વતઃ ॥
ॐ ઐં ઘૈં (ઘ્રૈં, ઘ્રેં) નમઃ નેત્રત્રયાય વૌષટ્ ।

ॐ સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુતે ॥
ॐ ઐં શ્રૂં નમઃ અસ્ત્રાય ફટ્ ॥

॥ ધ્યાનમન્ત્રઃ ॥
વિદ્યુદ્દામસમપ્રભાં મૃગપતિસ્કન્ધસ્થિતાં ભીષણાં

કન્યાભિઃકરવાલખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ॥
હસ્તૈશ્ચક્રગદાસિખેટવિશિખાં શ્ચાપં ગુણં તર્જનીં
વિભ્રાણામનલાત્મિકાં શશિધરાં દુર્ગાં ત્રિનેત્રાં ભજે ॥
અર્થ - જિનકે અઙ્ગોં કી શોભા બિજલી કે સમાન હૈં, જો સિંહ કી સવરી પર બૈઠીં હુઇ ભયઙ્કુર પ્રતીત હોતી હૈ, હાથોં મેં તલવાર વ ઢાલ લિયે ઐસી અનેક કન્યાયેં જિનકી સેવા મેં ખડ઼ી હૈં, જો અપને હાથોં મેં ચક્ર-ગદા-તલવાર-ઢાલ-બાણ-ધનુષ-પાશ ઔર તર્જનીમુદ્રા ધારણ કિયે હુયે હૈં, જિનકા સ્વરૂપ અગ્નિમય હૈં, તથા જિનકે માથે પર ચન્દ્રમા કા મુકુટ શોભા પા રહા હૈ, ઐસી તીન નેત્રવાલી શ્રી દુર્ગા દેવી કા ધ્યાન કરતા (યા કરતી) હૂઁ । ઇસ પ્રકાર ભગવતી દુર્ગા દેવી કા ધ્યાન કરકે શ્રી તન્ત્ર દુર્ગા સપ્તશતી કા પાઠ આરમ્ભ કરેં ।
variation for dhyAnamantraH
યા ચણ્ડી મધુકૈટભાદિ દૈત્યદલની યા મહિષોન્મૂલિની,
યા ધૂમ્રેક્ષણચણ્ડમુણ્ડ મથની યા રક્તબીજાશિની ।
શક્તિઃ શુમ્ભનિશુમ્ભદૈત્યદલની યા સિદ્ધિ લક્ષ્મીઃ પરા,
સા દુર્ગા નવકોટિ મૂર્તિસહિતા માં પાતુ વિશ્વેશ્વરી ॥
ઇતિશ્રીતન્ત્રદુર્ગાસપ્તશતી-વિનિયોગ-ન્યાસ ધ્યાનાદિ ॥
સઙ્કેત - ક્રમાનુસાર યે બીજમન્ત્ર જપને સે સકલ કામનાપ્રદ નિશ્ચિત હૈં । એવમેવ સર્વત્ર અતિ પ્રચલિત દુર્ગા સપ્તશતી કે મન્ત્રોં મેં સમ્પુટિત કરને સે ભી શીઘ્ર સિદ્ધ હોની હૈ ।

॥ અથ બીજાત્મક શ્રી તન્ત્ર દુર્ગા સપ્તશતી પાઠારમ્ભઃ ॥
॥ ૐ શ્રીગણેશાય નમઃ ॥
॥ શ્રીદુર્ગાયૈ નમઃ ॥

## ॥ ૧. મધુકૈટભવધો નામ પ્રથમોऽધ્યાયઃ ॥

વિનિયોગઃ
અસ્ય શ્રી પ્રથમચરિત્રસ્ય ।
બ્રહ્મા ઋષિઃ ।
મહાકાલી દેવતા ।
ગાયત્રી છન્દઃ ।
નન્દા શક્તિઃ ।
રક્તદન્તિકા બીજમ્ ।
અગ્નિસ્તત્ત્વમ્ ।
ઋગ્વેદઃ સ્વરૂપમ્ ।
શ્રીમહાકાલીપ્રીત્યર્થે પ્રથમચરિત્રજપે (પાઠે) વિનિયોગઃ ।

ધ્યાનમ્ ।
ॐ ખડ્ગં ચક્રગદેષુચાપપરિઘાઞ્છૂલં ભુશુણ્ડી શિરઃ
શઙ્ખં સન્દધતીં કરૈસ્ત્રિનયનાં સર્વાઙ્ગભૂષાવૃતામ્ ।
નીલાશ્મદ્યુતિમાસ્યપાદદશકાં સેવે મહાકાલિકાં
યામસ્તૌ ત્સ્વપિતે હરૌ કમલજો હન્તું મધું કૈટભમ્ ॥
ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ।

ॐ બીજત્રયાયૈ વિદ્મહે તત્પ્રધાનાયૈ ધીમહિ । તન્નઃ શક્તિઃ પ્રચોદયાત્ ।
ॐ ઐં શ્રીં નમઃ ।૧।
ॐ ઐં હ્રીં નમઃ ।૨।
ॐ નમશ્ચણ્ડિકાયૈ ॥
ॐ ઐં માર્કણ્ડેય ઉવાચ ॥ ૧.૧॥ ॐ ઐં શ્રીં નમઃ ॥ ૧॥
સાવર્ણિઃ સૂર્યતનયો યો મનુઃ કથ્યતેઽષ્ટમઃ ।
નિશામય તદુત્પત્તિં વિસ્તરાદ્ગદતો મમ ॥ ૧.૨॥ ॐ ઐં હ્રીં નમઃ ॥ ૨॥
મહામાયાનુભાવેન યથા મન્વન્તરાધિપઃ ।
સ બભૂવ મહાભાગઃ સાવર્ણિસ્તનયો રવેઃ ॥ ૧.૩॥ ॐ ઐં ક્લીં નમઃ ॥ ૩॥
સ્વારોચિષેઽન્તરે પૂર્વં ચૈત્રવંશસમુદ્ભવઃ ।
સુરથો નામ રાજાભૂત્સમસ્તે ક્ષિતિમણ્ડલે ॥ ૧.૪॥ ॐ ઐં શ્રીં નમઃ ॥ ૪॥
તસ્ય પાલયતઃ સમ્યક્ પ્રજાઃ પુત્રાનિવૌરસાન્ ।
બભૂવુઃ શત્રવો ભૂપાઃ કોલાવિધ્વંસિનસ્તદા ॥ ૧.૫॥ ॐ ઐં પ્રીં નમઃ ॥ ૫॥
તસ્ય તૈરભવદ્ યુદ્ધમતિપ્રબલદણ્ડિનઃ ।
ન્યૂનૈરપિ સ તૈર્યુદ્ધે કોલાવિધ્વંસિભિર્જિતઃ ॥ ૧.૬॥ ॐ ઐં હ્રાં નમઃ ॥ ૬॥
તતઃ સ્વપુરમાયાતો નિજદેશાધિપોઽભવત્ ।
આક્રાન્તઃ સ મહાભાગસ્તૈસ્તદા પ્રબલારિભિઃ ॥ ૧.૭॥ ॐ ઐં હ્રીં નમઃ ॥ ૭॥
અમાત્યૈર્બલિભિર્દુષ્ટૈર્દુર્બલસ્ય દુરાત્મભિઃ ।
કોશો બલં ચાપહૃતં તત્રાપિ સ્વપુરે તતઃ ॥ ૧.૮॥ ॐ ઐં સ્રૌં નમઃ ॥ ૮॥
તતો મૃગયાવ્યાજેન હૃતસ્વામ્યઃ સ ભૂપતિઃ ।
એકાકી હયમારુહ્ય જગામ ગહનં વનમ્ ॥ ૧.૯॥ ॐ ઐં પ્રેં નમઃ ॥ ૯॥
સ તત્રાશ્રમમદ્રાક્ષીદ્દ્વિજવર્યસ્ય મેધસઃ ।
પ્રશાન્તશ્વાપદાકીર્ણં મુનિશિષ્યોપશોભિતમ્ ॥ ૧.૧૦॥ ॐ ઐં મ્રીં નમઃ ॥ ૧૦॥
તસ્થૌ કઞ્ચિત્સ કાલં ચ મુનિના તેન સત્કૃતઃ ।
ઇતશ્ચેતશ્ચ વિચરંસ્તસ્મિન્ મુનિવરાશ્રમે ॥ ૧.૧૧॥ ॐ ઐં હ્લીં નમઃ ॥ ૧૧॥

સોઽચિન્તયત્તદા તત્ર મમત્વાકૃષ્ટમાનસઃ ।
મત્પૂર્વૈઃ પાલિતં પૂર્વં મયા હીનં પુરં હિ તત્ ॥ ૧.૧૨॥ ૐ ઐં મ્લીં નમઃ ॥ ૧૨॥
મદ્ભૃત્યૈસ્તૈરસદ્વૃત્તૈર્ધર્મતઃ પાલ્યતે ન વા ।
ન જાને સ પ્રધાનો મે શૂરો હસ્તી સદામદઃ ॥ ૧.૧૩॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૧૩॥
મમ વૈરિવશં યાતઃ કાન્ ભોગાનુપલપ્સ્યતે ।
યે મમાનુગતા નિત્યં પ્રસાદધનભોજનૈઃ ॥ ૧.૧૪॥ ૐ ઐં ક્રાં નમઃ ॥ ૧૪॥
અનુવૃત્તિં ધ્રુવં તેઽદ્ય કુર્વન્ત્યન્યમહીભૃતામ્ ।
અસમ્યગ્વ્યયશીલૈસ્તૈઃ કુર્વદ્ભિઃ સતતં વ્યયમ્ ॥ ૧.૧૫॥ ૐ ઐં હ્સ્લીં નમઃ ॥ ૧૫॥
સઞ્ચિતઃ સોઽતિદુઃખેન ક્ષયં કોશો ગમિષ્યતિ ।
એતચ્ચાન્યચ્ચ સતતં ચિન્તયામાસ પાર્થિવઃ ॥ ૧.૧૬॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૬॥
તત્ર વિપ્રાશ્રમાભ્યાશે વૈશ્યમેકં દદર્શ સઃ ।
સ પૃષ્ટસ્તેન કસ્ત્વં ભો હેતુશ્ચાગમનેઽત્ર કઃ ॥ ૧.૧૭॥ ૐ ઐં ચાં નમઃ ॥ ૧૭॥
સશોક ઇવ કસ્માત્ત્વં દુર્મના ઇવ લક્ષ્યસે ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય ભૂપતેઃ પ્રણયોદિતમ્ ॥ ૧.૧૮॥ ૐ ઐં ભેં નમઃ ॥ ૧૮॥
પ્રત્યુવાચ સ તં વૈશ્યઃ પ્રશ્રયાવનતો નૃપમ્ ॥ ૧.૧૯॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૯॥
વૈશ્ય ઉવાચ ॥ ૧.૨૦॥ ૐ ઐં વૈં નમઃ ॥ ૨૦॥
સમાધિર્નામ વૈશ્યોઽહમુત્પન્નો ધનિનાં કુલે ॥ ૧.૨૧॥ ૐ ઐં હ્રૌં નમઃ ॥ ૨૧॥
પુત્રદારૈર્નિરસ્તશ્ચ ધનલોભાદસાધુભિઃ ।
વિહીનશ્ચ ધનૈર્દારૈઃ પુત્રૈરાદાય મે ધનમ્ ॥ ૧.૨૨॥ ૐ ઐં યું નમઃ ॥ ૨૨॥
વનમભ્યાગતો દુઃખી નિરસ્તશ્ચાપ્તબન્ધુભિઃ ।
સોઽહં ન વેદ્મિ પુત્રાણાં કુશલાકુશલાત્મિકામ્ ॥ ૧.૨૩॥ ૐ ઐં જું નમઃ ॥ ૨૩॥
પ્રવૃત્તિં સ્વજનાનાં ચ દારાણાં ચાત્ર સંસ્થિતઃ ।
કિં નુ તેષાં ગૃહે ક્ષેમમક્ષેમં કિં નુ સામ્પ્રતમ્ ॥ ૧.૨૪॥ ૐ ઐં હં નમઃ ॥ ૨૪॥
કથં તે કિં નુ સદ્વૃત્તા દુર્વૃત્તાઃ કિં નુ મે સુતાઃ ॥ ૧.૨૫॥ ૐ ઐં શં નમઃ ॥ ૨૫॥
રાજોવાચ ॥ ૧.૨૬॥ ૐ ઐં રૌં નમઃ ॥ ૨૬॥
યૈર્નિરસ્તો ભવાઁલ્લુબ્ધૈઃ પુત્રદારાદિભિર્ધનૈઃ ॥ ૧.૨૭॥ ૐ ઐં યં નમઃ ॥ ૨૭॥
તેષુ કિં ભવતઃ સ્નેહમનુબધ્નાતિ માનસમ્ ॥ ૧.૨૮॥ ૐ ઐં વિં નમઃ ॥ ૨૮॥
વૈશ્ય ઉવાચ ॥ ૧.૨૯॥ ૐ ઐં વૈં નમઃ ॥ ૨૯॥
એવમેતદ્યથા પ્રાહ ભવાનસ્મદ્ગતં વચઃ ॥ ૧.૩૦॥ ૐ ઐં ચેં નમઃ ॥ ૩૦॥
કિં કરોમિ ન બધ્નાતિ મમ નિષ્ઠુરતાં મનઃ ।
યૈઃ સન્ત્યજ્ય પિતૃસ્નેહં ધનલુબ્ધૈર્નિરાકૃતઃ ॥ ૧.૩૧॥ ૐ ઐં હ્રીં નમઃ ॥ ૩૧॥
પતિસ્વજનહાર્દં ચ હાર્દિતેષ્વેવ મે મનઃ ।

કિમેતન્નાભિજાનામિ જાનન્નપિ મહામતે ॥ ૧.૩૨॥ ૐ ઐં ક્રૂં નમઃ ॥ ૩૨॥
યત્પ્રેમપ્રવણં ચિત્તં વિગુણેષ્વપિ બન્ધુષુ ।
તેષાં કૃતે મે નિઃશ્વાસો દૌર્મનસ્યં ચ જાયતે ॥ ૧.૩૩॥ ૐ ઐં સં નમઃ ॥ ૩૩॥
કરોમિ કિં યન્ન મનસ્તેષ્વપ્રીતિષુ નિષ્ઠુરમ્ ॥ ૧.૩૪॥ ૐ ઐં કં નમઃ ॥ ૩૪॥
માર્કણ્ડેય ઉવાચ ॥ ૧.૩૫॥ ૐ ઐં શ્રીં નમઃ ॥ ૩૫॥
તતસ્તૌ સહિતૌ વિપ્ર તં મુનિં સમુપસ્થિતૌ ॥ ૧.૩૬॥ ૐ ઐં ત્રોં નમઃ ॥ ૩૬॥
સમાધિર્નામ વૈશ્યોઽસૌ સ ચ પાર્થિવસત્તમઃ ।
કૃત્વા તુ તૌ યથાન્યાયં યથાર્હં તેન સંવિદમ્ ॥ ૧.૩૭॥ ૐ ઐં સ્ત્રાં નમઃ ॥ ૩૭॥
ઉપવિષ્ટૌ કથાઃ કાશ્ચિચ્ચક્રતુર્વૈશ્યપાર્થિવૌ ॥ ૧.૩૮॥ ૐ ઐં જ્યં નમઃ ॥ ૩૮॥
રાજોવાચ ॥ ૧.૩૯॥ ૐ ઐં રૌં નમઃ ॥ ૩૯॥
ભગવંસ્ત્વામહં પ્રષ્ટુમિચ્છામ્યેકં વદસ્વ તત્ ॥ ૧.૪૦॥ ૐ ઐં દ્રાં નમઃ ॥ ૪૦॥
દુઃખાય યન્મે મનસઃ સ્વચિત્તાયત્તતાં વિના ।
મમત્વં ગતરાજ્યસ્ય રાજ્યાઙ્ગેષ્વખિલેષ્વપિ ॥ ૧.૪૧॥ ૐ ઐં હ્રાં (દ્રીં, દ્રોં) નમઃ ॥ ૪૧॥
જાનતોઽપિ યથાજ્ઞસ્ય કિમેતન્મુનિસત્તમ ।
અયં ચ નિકૃતઃ પુત્રૈર્દારૈર્ભૃત્યૈસ્તથોજ્ઝિતઃ ॥ ૧.૪૨॥ ૐ ઐં હ્રાં નમઃ ॥ ૪૨॥
સ્વજનેન ચ સન્ત્યક્તસ્તેષુ હાર્દી તથાપ્યતિ ।
એવમેષ તથાહં ચ દ્વાવપ્યત્યન્તદુઃખિતૌ ॥ ૧.૪૩॥ ૐ ઐં દ્રૂં નમઃ ॥ ૪૩॥
દૃષ્ટદોષેઽપિ વિષયે મમત્વાકૃષ્ટમાનસૌ ।
તત્કિમેતન્મહાભાગ યન્મોહો જ્ઞાનિનોરપિ ॥ ૧.૪૪॥ ૐ ઐં શાં નમઃ ॥ ૪૪॥
મમાસ્ય ચ ભવત્યેષા વિવેકાન્ધસ્ય મૂઢતા ॥ ૧.૪૫॥ ૐ ઐં ક્રીં (મ્રીં, મીં) નમઃ ॥ ૪૫॥
ઋષિરુવાચ ॥ ૧.૪૬॥ ૐ ઐં શ્રૌં નમઃ ॥ ૪૬॥
જ્ઞાનમસ્તિ સમસ્તસ્ય જન્તોર્વિષયગોચરે ॥ ૧.૪૭॥ ૐ ઐં જું નમઃ ॥ ૪૭॥
વિષયાશ્ચ મહાભાગ યાન્તિ ચૈવં પૃથક્પૃથક્ ।
દિવાન્ધાઃ પ્રાણિનઃ કેચિદ્રાત્રાવન્ધાસ્તથાપરે ॥ ૧.૪૮॥ ૐ ઐં હ્લૂં નમઃ ॥ ૪૮॥
કેચિદ્દિવા તથા રાત્રૌ પ્રાણિનસ્તુલ્યદૃષ્ટયઃ ।
જ્ઞાનિનો મનુજાઃ સત્યં કિં તુ તે ન હિ કેવલમ્ ॥ ૧.૪૯॥ ૐ ઐં શ્રૂં નમઃ ॥ ૪૯॥
યતો હિ જ્ઞાનિનઃ સર્વે પશુપક્ષિમૃગાદયઃ ।
જ્ઞાનં ચ તન્મનુષ્યાણાં યત્તેષાં મૃગપક્ષિણામ્ ॥ ૧.૫૦॥ ૐ ઐં પ્રીં નમઃ ॥ ૫૦॥
મનુષ્યાણાં ચ યત્તેષાં તુલ્યમન્યત્તથોભયોઃ ।
જ્ઞાનેઽપિ સતિ પશ્યૈતાન્ પતઙ્ગાઞ્છાવચઞ્ચુષુ ॥ ૧.૫૧॥ ૐ ઐં રં નમઃ ॥ ૫૧॥
કણમોક્ષાદૃતાન્ મોહાત્પીડ્યમાનાનપિ ક્ષુધા ।
માનુષા મનુજવ્યાઘ્ર સાભિલાષાઃ સુતાન્ પ્રતિ ॥ ૧.૫૨॥ ૐ ઐં વં નમઃ ॥ ૫૨॥

લોભાત્ પ્રત્યુપકારાય નન્વેતાન્ કિં ન પશ્યસિ ।
તથાપિ મમતાવર્ત્તે મોહગર્તે નિપાતિતાઃ ॥ ૧.૫૩॥ ૐ ઐં બ્રોં (વ્રીં) નમઃ ॥ ૫૩॥
મહામાયાપ્રભાવેણ સંસારસ્થિતિકારિણા ।
તન્નાત્ર વિસ્મયઃ કાર્યો યોગનિદ્રા જગત્પતેઃ ॥ ૧.૫૪॥ ૐ ઐં બ્લં (બ્લૂં) નમઃ ॥ ૫૪॥
મહામાયા હરેશ્ચૈષા તયા સમ્મોહ્યતે જગત્ ।
જ્ઞાનિનામપિ ચેતાંસિ દેવી ભગવતી હિ સા ॥ ૧.૫૫॥ ૐ ઐં સ્રાં (સ્ત્રાં, સ્ત્રૌં) નમઃ ॥ ૫૫॥
બલાદાકૃષ્ય મોહાય મહામાયા પ્રયચ્છતિ ।
તયા વિસૃજ્યતે વિશ્વં જગદેતચ્ચરાચરમ્ ॥ ૧.૫૬॥ ૐ ઐં લ્વાં (વ્લાં) નમઃ ॥ ૫૬॥
સૈષા પ્રસન્ના વરદા નૃણાં ભવતિ મુક્તયે ।
સા વિદ્યા પરમા મુક્તેર્હેતુભૂતા સનાતની ॥ ૧.૫૭॥ ૐ ઐં લૂં નમઃ ॥ ૫૭॥
સંસારબન્ધહેતુશ્ચ સૈવ સર્વેશ્વરેશ્વરી ॥ ૧.૫૮॥
રાજોવાચ ॥ ૧.૫૯॥ ૐ ઐં સાં નમઃ ॥ ૫૮॥
ભગવન્ કા હિ સા દેવી મહામાયેતિ યાં ભવાન્ ॥ ૧.૬૦॥ ૐ ઐં રૌં નમઃ ॥ ૫૯॥
બ્રવીતિ કથમુત્પન્ના સા કર્માસ્યાશ્ચ કિં દ્વિજ । ૐ ઐં સ્હૌં (શૌં) નમઃ ॥ ૬૦॥
યત્પ્રભાવા ચ સા દેવી યત્સ્વરૂપા યદુદ્ભવા ॥ ૧.૬૧॥ ૐ ઐં કૂં નમઃ ॥ ૬૧॥
તત્સર્વં શ્રોતુમિચ્છામિ ત્વત્તો બ્રહ્મવિદાં વર ॥ ૧.૬૨॥ ૐ ઐં શૌં નમઃ ॥ ૬૨॥
ઋષિરુવાચ ॥ ૧.૬૩॥ ૐ ઐં શ્રૌં નમઃ ॥ ૬૩॥
નિત્યૈવ સા જગન્મૂર્તિસ્તયા સર્વમિદં તતમ્ ॥ ૧.૬૪॥ ૐ ઐં વં નમઃ ॥ ૬૪॥
તથાપિ તત્સમુત્પત્તિર્બહુધા શ્રૂયતાં મમ ।
દેવાનાં કાર્યસિદ્ધ્યર્થમાવિર્ભવતિ સા યદા ॥ ૧.૬૫॥ ૐ ઐં ત્રૂં નમઃ ॥ ૬૫॥
ઉત્પન્નેતિ તદા લોકે સા નિત્યાપ્યભિધીયતે ।
યોગનિદ્રાં યદા વિષ્ણુર્જગત્યેકાર્ણવીકૃતે ॥ ૧.૬૬॥ ૐ ઐં ક્રૌં નમઃ ॥ ૬૬॥
આસ્તીર્ય શેષમભજત્ કલ્પાન્તે ભગવાન્ પ્રભુઃ ।
તદા દ્વાવસુરૌ ઘોરૌ વિખ્યાતૌ મધુકૈટભૌ ॥ ૧.૬૭॥ ૐ ઐં ક્લૂં નમઃ ॥ ૬૭॥
વિષ્ણુકર્ણમલોદ્ભૂતૌ હન્તું બ્રહ્માણમુદ્યતૌ ।
સ નાભિકમલે વિષ્ણોઃ સ્થિતો બ્રહ્મા પ્રજાપતિઃ ॥ ૧.૬૮॥ ૐ ઐં ક્લીં નમઃ ॥ ૬૮॥
દૃષ્ટ્વા તાવસુરૌ ચોગ્રૌ પ્રસુપ્તં ચ જનાર્દનમ્ ।
તુષ્ટાવ યોગનિદ્રાં તામેકાગ્રહૃદયઃ સ્થિતઃ ॥ ૧.૬૯॥ ૐ ઐં શ્રીં નમઃ ॥ ૬૯॥
વિબોધનાર્થાય હરેર્હરિનેત્રકૃતાલયામ્ ।
વિશ્વેશ્વરીં જગદ્ધાત્રીં સ્થિતિસંહારકારિણીમ્ ॥ ૧.૭૦॥ ૐ ઐં બ્લૂં નમઃ ॥ ૭૦॥
નિદ્રાં ભગવતીં વિષ્ણોરતુલાં તેજસઃ પ્રભુઃ ॥ ૧.૭૧॥ ૐ ઐં ઠાં નમઃ ॥ ૭૧॥
બ્રહ્મોવાચ ॥ ૧.૭૨॥ ૐ ઐં હ્રૌં (ઠ્રીં) નમઃ ॥ ૭૨॥

ત્વં સ્વાહા ત્વં સ્વધા ત્વં હિ વષટ્કારઃ સ્વરાત્મિકા ॥ ૧.૭૩॥ ૐ ઐં સ્ત્રાં નમઃ ॥ ૭૩॥
સુધા ત્વમક્ષરે નિત્યે ત્રિધા માત્રાત્મિકા સ્થિતા ।
અર્ધમાત્રા સ્થિતા નિત્યા યાનુચ્ચાર્યાવિશેષતઃ ॥ ૧.૭૪॥ ૐ ઐં સ્લૂં નમઃ ॥ ૭૪॥
ત્વમેવ સન્ધ્યા સાવિત્રી ત્વં દેવિ જનની પરા ।
ત્વયૈતદ્ધાર્યતે વિશ્વં ત્વયૈતત્ સૃજ્યતે જગત્ ॥ ૧.૭૫॥ ૐ ઐં ક્લૈં નમઃ ॥ ૭૫॥
ત્વયૈતત્ પાલ્યતે દેવિ ત્વમત્સ્યન્તે ચ સર્વદા ।
વિસૃષ્ટૌ સૃષ્ટિરૂપા ત્વં સ્થિતિરૂપા ચ પાલને ॥ ૧.૭૬॥ ૐ ઐં ત્રાં (ગ્રાં) નમઃ ॥ ૭૬॥
તથા સંહૃતિરૂપાન્તે જગતોઽસ્ય જગન્મયે ।
મહાવિદ્યા મહામાયા મહામેધા મહાસ્મૃતિઃ ॥ ૧.૭૭॥ ૐ ઐં ક્ષ્રાં નમઃ ॥ ૭૭॥
મહામોહા ચ ભવતી મહાદેવી મહેશ્વરી ।
પ્રકૃતિસ્ત્વં ચ સર્વસ્ય ગુણત્રયવિભાવિની ॥ ૧.૭૮॥ ૐ ઐં જીં નમઃ ॥ ૭૮॥
કાલરાત્રિર્મહારાત્રિર્મોહરાત્રિશ્ચ દારુણા ।
ત્વં શ્રીસ્ત્વમીશ્વરી ત્વં હ્રીસ્ત્વં બુદ્ધિર્બોધલક્ષણા ॥ ૧.૭૯॥ ૐ ઐં લૂં નમઃ ॥ ૭૯॥
લજ્જા પુષ્ટિસ્તથા તુષ્ટિસ્ત્વં શાન્તિઃ ક્ષાન્તિરેવ ચ ।
ખડ્ગિની શૂલિની ઘોરા ગદિની ચક્રિણી તથા ॥ ૧.૮૦॥ ૐ ઐં સ્લૂં નમઃ ॥ ૮૦॥
શઙ્ખિની ચાપિની બાણભુશુણ્ડીપરિઘાયુધા ।
સૌમ્યા સૌમ્યતરાશેષસૌમ્યેભ્યસ્ત્વતિસુન્દરી ॥ ૧.૮૧॥ ૐ ઐં નોં નમઃ ॥ ૮૧॥
પરાપરાણાં પરમા ત્વમેવ પરમેશ્વરી ।
યચ્ચ કિઞ્ચિત્ક્વચિદ્વસ્તુ સદસદ્વાખિલાત્મિકે ॥ ૧.૮૨॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૮૨॥
તસ્ય સર્વસ્ય યા શક્તિઃ સા ત્વં કિં સ્તૂયસે મયા ।
યયા ત્વયા જગત્સ્રષ્ટા જગત્પાત્યત્તિ યો જગત્ ॥ ૧.૮૩॥ ૐ ઐં પ્રૂં નમઃ ॥ ૮૩॥
સોઽપિ નિદ્રાવશં નીતઃ કસ્ત્વાં સ્તોતુમિહેશ્વરઃ ।
વિષ્ણુઃ શરીરગ્રહણમહમીશાન એવ ચ ॥ ૧.૮૪॥ ૐ ઐં સૂં (સ્રૂં, સ્રં) નમઃ ॥ ૮૪॥
કારિતાસ્તે યતોઽતસ્ત્વાં કઃ સ્તોતું શક્તિમાન્ ભવેત્ ।
સા ત્વમિત્થં પ્રભાવૈઃ સ્વૈરુદારૈર્દેવિ સંસ્તુતા ॥ ૧.૮૫॥ ૐ ઐં જાં નમઃ ॥ ૮૫॥
મોહયૈતૌ દુરાધર્ષાવસુરૌ મધુકૈટભૌ ।
પ્રબોધં ચ જગત્સ્વામી નીયતામચ્યુતો લઘુ ॥ ૧.૮૬॥ ૐ ઐં બૌં નમઃ ॥ ૮૬॥
બોધશ્ચ ક્રિયતામસ્ય હન્તુમેતૌ મહાસુરૌ ॥ ૧.૮૭॥ ૐ ઐં ઓં નમઃ ॥ ૮૭॥
ઋષિરુવાચ ॥ ૧.૮૮॥ ૐ ઐં શ્રૌં નમઃ ॥ ૮૮॥
એવં સ્તુતા તદા દેવી તામસી તત્ર વેધસા ॥ ૧.૮૯॥ ૐ ઐં ઋ નમઃ ॥ ૮૯॥
વિષ્ણોઃ પ્રબોધનાર્થાય નિહન્તું મધુકૈટભૌ ।
નેત્રાસ્યનાસિકાબાહુહૃદયેભ્યસ્તથોરસઃ ॥ ૧.૯૦॥ ૐ ઐં રૂં નમઃ ॥ ૯૦॥

નિર્ગમ્ય દર્શને તસ્થૌ બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
ઉત્તસ્થૌ ચ જગન્નાથસ્તયા મુક્તો જનાર્દનઃ ॥ ૧.૯૧॥ ૐ ઐં ક્લીં નમઃ ॥ ૯૧॥
એકાર્ણવેઽહિશયનાત્તતઃ સ દદૃશે ચ તૌ ।
મધુકૈટભૌ દુરાત્માનાવતિવીર્યપરાક્રમૌ ॥ ૧.૯૨॥ ૐ ઐં દું નમઃ ॥ ૯૨॥
ક્રોધરક્તેક્ષણાવત્તું બ્રહ્માણં જનિતોદ્યમૌ ।
સમુત્થાય તતસ્તાભ્યાં યુયુધે ભગવાન્ હરિઃ ॥ ૧.૯૩॥ ૐ ઐં હ્રીં નમઃ ॥ ૯૩॥
પઞ્ચવર્ષસહસ્રાણિ બાહુપ્રહરણો વિભુઃ ।
તાવપ્યતિબલોન્મત્તૌ મહામાયાવિમોહિતૌ ॥ ૧.૯૪॥ ૐ ઐં ગૂં નમઃ ॥ ૯૪॥
ઉક્તવન્તૌ વરોઽસ્મત્તો વ્રિયતામિતિ કેશવમ્ ॥ ૧.૯૫॥ ૐ ઐં લાં નમઃ ॥ ૯૫॥
શ્રીભગવાનુવાચ ॥ ૧.૯૬॥ ૐ ઐં હ્રાં નમઃ ॥ ૯૬॥
ભવેતામદ્ય મે તુષ્ટૌ મમ વધ્યાવુભાવપિ ॥ ૧.૯૭॥ ૐ ઐં ગં નમઃ ॥ ૯૭॥
કિમન્યેન વરેણાત્ર એતાવદ્ધિ વૃતં મયા ॥ ૧.૯૮॥ ૐ ઐં ઐં નમઃ ॥ ૯૮॥
ઋષિરુવાચ ॥ ૧.૯૯॥ ૐ ઐં શ્રૌં નમઃ ॥ ૯૯॥
વઞ્ચિતાભ્યામિતિ તદા સર્વમાપોમયં જગત્ ॥ ૧.૧૦૦॥ ૐ ઐં જૂં નમઃ ॥ ૧૦૦॥
વિલોક્ય તાભ્યાં ગદિતો ભગવાન્ કમલેક્ષણઃ ।
આવાં જહિ ન યત્રોર્વી સલિલેન પરિપ્લુતા ॥ ૧.૧૦૧॥ ૐ ઐં ડેં નમઃ ॥ ૧૦૧॥
ઋષિરુવાચ ॥ ૧.૧૦૨॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧૦૨॥
તથેત્યુક્ત્વા ભગવતા શઙ્ખચક્રગદાભૃતા ।
કૃત્વા ચક્રેણ વૈ છિન્ને જઘને શિરસી તયોઃ ॥ ૧.૧૦૩॥ ૐ ઐં છાં (છ્રાં) નમઃ ॥ ૧૦૩॥
એવમેષા સમુત્પન્ના બ્રહ્મણા સંસ્તુતા સ્વયમ્ ।
પ્રભાવમસ્યા દેવ્યાસ્તુ ભૂયઃ શ‍ૃણુ વદામિ તે ॥ ૧.૧૦૪॥ ૐ ઐં ક્લીં નમઃ ॥ ૧૦૪॥
। ઐં ૐ ॥

"ૐ શ્રીં ક્લીં હ્રીં હ્રીં ફટ્ સ્વાહા ॥૧॥"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કાંપીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
વાગ્ભવબીજાધિષ્ઠાત્ર્યૈ મહાકાલ્યૈ મહાહુતિં સમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
બીજાત્મક તન્ત્ર દુર્ગા સપ્તશતી કે પ્રત્યેક બીજ મન્ત્ર કે અન્ત મેં સ્વાહા લગાકર હવન કરેં તથા પ્રથમ અધ્યાય કે અન્ત મેં નિમ્ન મન્ત્ર સે હવન કરેં-

ૐ ઐં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
વાગ્બીજાધિષ્ઠાત્ર્યૈ મહાકાલિકાયૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
મધુકૈટભવધો નામ પ્રથમોऽધ્યાયઃ ॥ ૧॥
ઉવાચ ૧૪, અર્ધશ્લોકાઃ ૨૪, શ્લોકાઃ ૬૬, એવમાદિતઃ ॥ ૧૦૪॥

## ॥ ૨. મહિષાસુરસૈન્યવધો નામ દ્વિતીયોऽધ્યાયઃ ॥

વિનિયોગઃ
અસ્ય શ્રી મધ્યમચરિત્રસ્ય વિષ્ણુરૃષિઃ ।
શ્રીમહાલક્ષ્મીર્દેવતા ।
ઉષ્ણિક્ છન્દઃ । શાકમ્ભરી શક્તિઃ । દુર્ગા બીજમ્ ।
વાયુસ્તત્ત્વમ્ ।
યજુર્વેદઃ સ્વરૂપમ્ । શ્રીમહાલક્ષ્મીપ્રીત્યર્થે
મધ્યમચરિત્રજપે (પાઠે) વિનિયોગઃ ।
ધ્યાનમ્ ।
ૐ અક્ષસ્રક્પરશું ગદેષુકુલિશં પદ્મં ધનુઃ કુણ્ડિકાં (ધનુષ્કુણ્ડિકાં)
દણ્ડં શક્તિમસિં ચ ચર્મ જલજં ઘણ્ટાં સુરાભાજનમ્ ।
શૂલં પાશસુદર્શને ચ દધતીં હસ્તૈઃ પ્રવાલપ્રભાં (પ્રસન્નાનનાં)
સેવે સૈરિભમર્દિનીમિહ મહાલક્ષ્મીં સરોજસ્થિતામ્ ॥
ૐ હ્રીં ઋષિરુવાચ ॥ ૨.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
દેવાસુરમભૂદ્યુદ્ધં પૂર્ણમબ્દશતં પુરા ।
મહિષેऽસુરાણામધિપે દેવાનાં ચ પુરન્દરે ॥ ૨.૨॥ ૐ ઐં શ્રીં નમઃ ॥ ૨॥
તત્રાસુરૈર્મહાવીર્યૈર્દેવસૈન્યં પરાજિતમ્ ।
જિત્વા ચ સકલાન્ દેવાનિન્દ્રોऽભૂન્મહિષાસુરઃ ॥ ૨.૩॥ ૐ ઐં હ્સૂં નમઃ ॥ ૩॥
તતઃ પરાજિતા દેવાઃ પદ્મયોનિં પ્રજાપતિમ્ ।
પુરસ્કૃત્ય ગતાસ્તત્ર યત્રેશગરુડધ્વજૌ ॥ ૨.૪॥ ૐ ઐં હૌં નમઃ ॥ ૪॥
યથાવૃત્તં તયોસ્તદ્વન્મહિષાસુરચેષ્ટિતમ્ ।
ત્રિદશાઃ કથયામાસુર્દેવાભિભવવિસ્તરમ્ ॥ ૨.૫॥ ૐ ઐં હ્રીં નમઃ ॥ ૫॥
સૂર્યેન્દ્રાગ્ન્યનિલેન્દૂનાં યમસ્ય વરુણસ્ય ચ ।
અન્યેષાં ચાધિકારાન્સ સ્વયમેવાધિતિષ્ઠતિ ॥ ૨.૬॥ ૐ ઐં અં નમઃ ॥ ૬॥
સ્વર્ગાન્નિરાકૃતાઃ સર્વે તેન દેવગણા ભુવિ ।

વિચરન્તિ યથા મર્ત્યા મહિષેણ દુરાત્મના ॥ ૨.૭॥ ૐ ઐં ક્લીં નમઃ ॥ ૭॥
એતદ્વઃ કથિતં સર્વમમરારિવિચેષ્ટિતમ્ ।
શરણં વઃ પ્રપન્નાઃ સ્મો વધસ્તસ્ય વિચિન્ત્યતામ્ ॥ ૨.૮॥ ૐ ઐં ચાં નમઃ ॥ ૮॥
ઇત્થં નિશમ્ય દેવાનાં વચાંસિ મધુસૂદનઃ ।
ચકાર કોપં શમ્ભુશ્ચ ભ્રુકુટીકુટિલાનનૌ ॥ ૨.૯॥ ૐ ઐં મું નમઃ ॥ ૯॥
તતોઽતિકોપપૂર્ણસ્ય ચક્રિણો વદનાત્તતઃ ।
નિશ્ચક્રામ મહત્તેજો બ્રહ્મણઃ શઙ્કરસ્ય ચ ॥ ૨.૧૦॥ ૐ ઐં ડાં નમઃ ॥ ૧૦॥
અન્યેષાં ચૈવ દેવાનાં શક્રાદીનાં શરીરતઃ ।
નિર્ગતં સુમહત્તેજસ્તચ્ચૈક્યં સમગચ્છત ॥ ૨.૧૧॥ ૐ ઐં યૈં નમઃ ॥ ૧૧॥
અતીવ તેજસઃ કૂટં જ્વલન્તમિવ પર્વતમ્ ।
દદૃશુસ્તે સુરાસ્તત્ર જ્વાલાવ્યાપ્તદિગન્તરમ્ ॥ ૨.૧૨॥ ૐ ઐં વિં નમઃ ॥ ૧૨॥
અતુલં તત્ર તત્તેજઃ સર્વદેવશરીરજમ્ ।
એકસ્થં તદભૂન્નારી વ્યાપ્તલોકત્રયં ત્વિષા ॥ ૨.૧૩॥ ૐ ઐં ચ્ચેં નમઃ ॥ ૧૩॥
યદભૂચ્છામ્ભવં તેજસ્તેનાજાયત તન્મુખમ્ ।
યામ્યેન ચાભવન્ કેશા બાહવો વિષ્ણુતેજસા ॥ ૨.૧૪॥ ૐ ઐં ઇં નમઃ ॥ ૧૪॥
સૌમ્યેન સ્તનયોર્યુગ્મં મધ્યં ચૈન્દ્રેણ ચાભવત્ ।
વારુણેન ચ જઙ્ઘોરૂ નિતમ્બસ્તેજસા ભુવઃ ॥ ૨.૧૫॥ ૐ ઐં સૌં નમઃ ॥ ૧૫॥
બ્રહ્મણસ્તેજસા પાદૌ તદઙ્ગુલ્યોઽર્કતેજસા ।
વસૂનાં ચ કરાઙ્ગુલ્યઃ કૌબેરેણ ચ નાસિકા ॥ ૨.૧૬॥ ૐ ઐં ગં નમઃ ॥ ૧૬॥
તસ્યાસ્તુ દન્તાઃ સમ્ભૂતાઃ પ્રાજાપત્યેન તેજસા ।
નયનત્રિતયં જજ્ઞે તથા પાવકતેજસા ॥ ૨.૧૭॥ ૐ ઐં ત્રૌં નમઃ ॥ ૧૭॥
ભ્રુવૌ ચ સન્ધ્યયોસ્તેજઃ શ્રવણાવનિલસ્ય ચ ।
અન્યેષાં ચૈવ દેવાનાં સમ્ભવસ્તેજસાં શિવા ॥ ૨.૧૮॥ ૐ ઐં લૂં નમઃ ॥ ૧૮॥
તતઃ સમસ્તદેવાનાં તેજોરાશિસમુદ્ભવામ્ ।
તાં વિલોક્ય મુદં પ્રાપુરમરા મહિષાર્દિતાઃ ।
તતો દેવા દદુસ્તસ્યૈ સ્વાનિ સ્વાન્યાયુધાનિ ચ ॥ ૨.૧૯॥ ૐ ઐં વં નમઃ ॥ ૧૯॥
શૂલં શૂલાદ્વિનિષ્કૃષ્ય દદૌ તસ્યૈ પિનાકધૃક્ ।
ચક્રં ચ દત્તવાન્ કૃષ્ણઃ સમુત્પાટ્ય સ્વચક્રતઃ ॥ ૨.૨૦॥ ૐ ઐં હ્રાં નમઃ ॥ ૨૦॥
શઙ્ખં ચ વરુણઃ શક્તિં દદૌ તસ્યૈ હુતાશનઃ ।
મારુતો દત્તવાંશ્ચાપં બાણપૂર્ણે તથેષુધી ॥ ૨.૨૧॥ ૐ ઐં ક્રીં નમઃ ॥ ૨૧॥
વજ્રમિન્દ્રઃ સમુત્પાટ્ય કુલિશાદમરાધિપઃ ।
દદૌ તસ્યૈ સહસ્રાક્ષો ઘણ્ટામૈરાવતાદ્ગજાત્ ॥ ૨.૨૨॥ ૐ ઐં સૌં નમઃ ॥ ૨૨॥

કાલદણ્ડાદ્યમો દણ્ડં પાશં ચામ્બુપતિર્દદૌ ।
પ્રજાપતિશ્ચાક્ષમાલાં દદૌ બ્રહ્મા કમણ્ડલુમ્ ॥ ૨.૨૩॥ ૐ ઐં યં નમઃ ॥ ૨૩॥
સમસ્તરોમકૂપેષુ નિજરશ્મીન્ દિવાકરઃ ।
કાલશ્ચ દત્તવાન્ ખડ્ગં તસ્યૈ ચર્મ ચ નિર્મલમ્ ॥ ૨.૨૪॥ ૐ ઐં ઐં નમઃ ॥ ૨૪॥
ક્ષીરોદશ્ચામલં હારમજરે ચ તથામ્બરે ।
ચૂડામણિં તથા દિવ્યં કુણ્ડલે કટકાનિ ચ ॥ ૨.૨૫॥ ૐ ઐં મૂં નમઃ ॥ ૨૫॥
અર્ધચન્દ્રં તથા શુભ્રં કેયૂરાન્ સર્વબાહુષુ ।
નૂપુરૌ વિમલૌ તદ્વદ્ ગ્રૈવેયકમનુત્તમમ્ ॥ ૨.૨૬॥ ૐ ઐં સં નમઃ ॥ ૨૬॥
અઙ્ગુલીયકરત્નાનિ સમસ્તાસ્વઙ્ગુલીષુ ચ ।
વિશ્વકર્મા દદૌ તસ્યૈ પરશું ચાતિનિર્મલમ્ ॥ ૨.૨૭॥ ૐ ઐં હં નમઃ ॥ ૨૭॥
અસ્ત્રાણ્યનેકરૂપાણિ તથાભેદ્યં ચ દંશનમ્ ।
અમ્લાનપઙ્કજાં માલાં શિરસ્યુરસિ ચાપરામ્ ॥ ૨.૨૮॥ ૐ ઐં સં નમઃ ॥ ૨૮॥
અદદજ્જલધિસ્તસ્યૈ પઙ્કજં ચાતિશોભનમ્ ।
હિમવાન્ વાહનં સિંહં રત્નાનિ વિવિધાનિ ચ ॥ ૨.૨૯॥ ૐ ઐં સોં નમઃ ॥ ૨૯॥
દદાવશૂન્યં સુરયા પાનપાત્રં ધનાધિપઃ ।
શેષશ્ચ સર્વનાગેશો મહામણિવિભૂષિતમ્ ॥ ૨.૩૦॥ ૐ ઐં શં નમઃ ॥ ૩૦॥
નાગહારં દદૌ તસ્યૈ ધત્તે યઃ પૃથિવીમિમામ્ ।
અન્યૈરપિ સુરૈર્દેવી ભૂષણૈરાયુધૈસ્તથા ॥ ૨.૩૧॥ ૐ ઐં હં નમઃ ॥ ૩૧॥
સમ્માનિતા નનાદોચ્ચૈઃ સાટ્ટહાસં મુહુર્મુહુઃ ।
તસ્યા નાદેન ઘોરેણ કૃત્સ્નમાપૂરિતં નભઃ ॥ ૨.૩૨॥ ૐ ઐં હ્રૌં નમઃ ॥ ૩૨॥
અમાયતાતિમહતા પ્રતિશબ્દો મહાનભૂત્ ।
ચુક્ષુભુઃ સકલા લોકાઃ સમુદ્રાશ્ચ ચકમ્પિરે ॥ ૨.૩૩॥ ૐ ઐં મ્લીં નમઃ ॥ ૩૩॥
ચચાલ વસુધા ચેલુઃ સકલાશ્ચ મહીધરાઃ ।
જયેતિ દેવાશ્ચ મુદા તામૂચુઃ સિંહવાહિનીમ્ ॥ ૨.૩૪॥ ૐ ઐં યૂં (યં) નમઃ ॥ ૩૪॥
તુષ્ટુવુર્મુનયશ્ચૈનાં ભક્તિનમ્રાત્મમૂર્તયઃ ।
દૃષ્ટ્વા સમસ્તં સઙ્ક્ષુબ્ધં ત્રૈલોક્યમમરારયઃ ॥ ૨.૩૫॥ ૐ ઐં ત્રૂં નમઃ ॥ ૩૫॥
સન્નદ્ધાખિલસૈન્યાસ્તે સમુત્તસ્થુરુદાયુધાઃ ।
આઃ કિમેતદિતિ ક્રોધાદાભાષ્ય મહિષાસુરઃ ॥ ૨.૩૬॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૩૬॥
અભ્યધાવત તં શબ્દમશેષૈરસુરૈર્વૃતઃ ।
સ દદર્શ તતો દેવીં વ્યાપ્તલોકત્રયાં ત્વિષા ॥ ૨.૩૭॥ ૐ ઐં આં નમઃ ॥ ૩૭॥
પાદાક્રાન્ત્યા નતભુવં કિરીટોલ્લિખિતામ્બરામ્ ।
ક્ષોભિતાશેષપાતાલાં ધનુર્જ્યાનિઃસ્વનેન તામ્ ॥ ૨.૩૮॥ ૐ ઐં પ્રેં નમઃ ॥ ૩૮॥

દિશો ભુજસહસ્રેણ સમન્તાદ્વ્યાપ્ય સંસ્થિતામ્ ।
તતઃ પ્રવવૃતે યુદ્ધં તયા દેવ્યા સુરદ્વિષામ્ ॥ ૨.૩૯॥ ૐ ઐં શં નમઃ ॥ ૩૯॥
શસ્ત્રાસ્ત્રૈર્બહુધા મુક્તૈરાદીપિતદિગન્તરમ્ ।
મહિષાસુરસેનાનીશ્ચિક્ષુરાખ્યો મહાસુરઃ ॥ ૨.૪૦॥ ૐ ઐં હ્રાં નમઃ ॥ ૪૦॥
યુયુધે ચામરશ્ચાન્યૈશ્ચતુરઙ્ગબલાન્વિતઃ ।
રથાનામયુતૈઃ ષડ્ભિરુદગ્રાખ્યો મહાસુરઃ ॥ ૨.૪૧॥ ૐ ઐં સ્મૂં નમઃ ॥ ૪૧॥
અયુધ્યતાયુતાનાં ચ સહસ્રેણ મહાહનુઃ ।
પઞ્ચાશદ્ભિશ્ચ નિયુતૈરસિલોમા મહાસુરઃ ॥ ૨.૪૨॥ ૐ ઐં ઊં નમઃ ॥ ૪૨॥
અયુતાનાં શતૈઃ ષડ્ભિર્બાષ્કલો યુયુધે રણે ।
ગજવાજિસહસ્રૌઘૈરનેકૈઃ પરિવારિતઃ ॥ ૨.૪૩॥ ૐ ઐં ગૂં નમઃ ॥ ૪૩॥
વૃતો રથાનાં કોટ્યા ચ યુદ્ધે તસ્મિન્નયુધ્યત ।
બિડાલાખ્યોઽયુતાનાં ચ પઞ્ચાશદ્ભિરથાયુતૈઃ ॥ ૨.૪૪॥ ૐ ઐં વ્યં નમઃ ॥ ૪૪॥
યુયુધે સંયુગે તત્ર રથાનાં પરિવારિતઃ ।
અન્યે ચ તત્રાયુતશો રથનાગહયૈર્વૃતાઃ ॥ ૨.૪૫॥ ૐ ઐં હ્રૂં નમઃ ॥ ૪૫॥
યુયુધુઃ સંયુગે દેવ્યા સહ તત્ર મહાસુરાઃ ।
કોટિકોટિસહસ્રૈસ્તુ રથાનાં દન્તિનાં તથા ॥ ૨.૪૬॥ ૐ ઐં ભૈં નમઃ ॥ ૪૬॥
હયાનાં ચ વૃતો યુદ્ધે તત્રાભૂન્મહિષાસુરઃ ।
તોમરૈર્ભિન્દિપાલૈશ્ચ શક્તિભિર્મુસલૈસ્તથા ॥ ૨.૪૭॥ ૐ ઐં હ્રાં નમઃ ॥ ૪૭॥
યુયુધુઃ સંયુગે દેવ્યા ખડ્ગૈઃ પરશુપટ્ટિશૈઃ ।
કેચિચ્ચ ચિક્ષિપુઃ શક્તીઃ કેચિત્ પાશાંસ્તથાપરે ॥ ૨.૪૮॥ ૐ ઐં ક્રૂં નમઃ ॥ ૪૮॥
દેવીં ખડ્ગપ્રહારૈસ્તુ તે તાં હન્તું પ્રચક્રમુઃ ।
સાપિ દેવી તતસ્તાનિ શસ્ત્રાણ્યસ્ત્રાણિ ચણ્ડિકા ॥ ૨.૪૯॥ ૐ ઐં મૂં નમઃ ॥ ૪૯॥
લીલયૈવ પ્રચિચ્છેદ નિજશસ્ત્રાસ્ત્રવર્ષિણી ।
અનાયસ્તાનના દેવી સ્તૂયમાના સુરર્ષિભિઃ ॥ ૨.૫૦॥ ૐ ઐં લ્રીં નમઃ ॥ ૫૦॥
મુમોચાસુરદેહેષુ શસ્ત્રાણ્યસ્ત્રાણિ ચેશ્વરી ।
સોઽપિ ક્રુદ્ધો ધુતસટો દેવ્યા વાહનકેસરી ॥ ૨.૫૧॥ ૐ ઐં શ્રાં નમઃ ॥ ૫૧॥
ચચારાસુરસૈન્યેષુ વનેષ્વિવ હુતાશનઃ ।
નિઃશ્વાસાન્ મુમુચે યાંશ્ચ યુધ્યમાના રણેઽમ્બિકા ॥ ૨.૫૨॥ ૐ ઐં દ્રૂં નમઃ ॥ ૫૨॥
ત એવ સદ્યઃ સમ્ભૂતા ગણાઃ શતસહસ્રશઃ ।
યુયુધુસ્તે પરશુભિર્ભિન્દિપાલાસિપટ્ટિશૈઃ ॥ ૨.૫૩॥ ૐ ઐં હ્રૂં (હ્રૂં) નમઃ ॥ ૫૩॥
નાશયન્તોઽસુરગણાન્ દેવીશક્ત્યુપબૃંહિતાઃ ।
અવાદયન્ત પટહાન્ ગણાઃ શઙ્ખાંસ્તથાપરે ॥ ૨.૫૪॥ ૐ ઐં હ્સૌં નમઃ ॥ ૫૪॥

મૃદઙ્ગાંશ્ચ તથૈવાન્યે તસ્મિન્ યુદ્ધમહોત્સવે ।
તતો દેવી ત્રિશૂલેન ગદયા શક્તિવૃષ્ટિભિઃ ॥ ૨.૫૫॥ ૐ ઐં ક્રાં નમઃ ॥ ૫૫॥
ખડ્ગાદિભિશ્ચ શતશો નિજઘાન મહાસુરાન્ ।
પાતયામાસ ચૈવાન્યાન્ ઘણ્ટાસ્વનવિમોહિતાન્ ॥ ૨.૫૬॥ ૐ ઐં સ્હૌં નમઃ ॥ ૫૬॥
અસુરાન્ ભુવિ પાશેન બદ્ધ્વા ચાન્યાનકર્ષયત્ ।
કેચિદ્ દ્વિધાકૃતાસ્તીક્ષ્ણૈઃ ખડ્ગપાતૈસ્તથાપરે ॥ ૨.૫૭॥ ૐ ઐં મ્લૂં નમઃ ॥ ૫૭॥
વિપોથિતા નિપાતેન ગદયા ભુવિ શેરતે ।
વેમુશ્ચ કેચિદ્રુધિરં મુસલેન ભૃશં હતાઃ ॥ ૨.૫૮॥ ૐ ઐં શ્રીં નમઃ ॥ ૫૮॥
કેચિન્નિપતિતા ભૂમૌ ભિન્નાઃ શૂલેન વક્ષસિ ।
નિરન્તરાઃ શરૌઘેણ કૃતાઃ કેચિદ્રણાજિરે ॥ ૨.૫૯॥ ૐ ઐં ગૈં નમઃ ॥ ૫૯॥
શ્યેનાનુકારિણઃ પ્રાણાન્ મુમુચુસ્ત્રિદશાર્દનાઃ ।
કેષાઞ્ચિદ્ બાહવશ્છિન્નાશ્છિન્નગ્રીવાસ્તથાપરે ॥ ૨.૬૦॥ ૐ ઐં ક્રીં નમઃ ॥ ૬૦॥
શિરાંસિ પેતુરન્યેષામન્યે મધ્યે વિદારિતાઃ ।
વિચ્છિન્નજઙ્ઘાસ્ત્વપરે પેતુરુર્વ્યાં મહાસુરાઃ ॥ ૨.૬૧॥ ૐ ઐં ત્રીં નમઃ ॥ ૬૧॥
એકબાહ્વક્ષિચરણાઃ કેચિદ્દેવ્યા દ્વિધાકૃતાઃ ।
છિન્નેઽપિ ચાન્યે શિરસિ પતિતાઃ પુનરુત્થિતાઃ ॥ ૨.૬૨॥ ૐ ઐં ક્સીં નમઃ ॥ ૬૨॥
કબન્ધા યુયુધુર્દેવ્યા ગૃહીતપરમાયુધાઃ ।
નનૃતુશ્ચાપરે તત્ર યુદ્ધે તૂર્યલયાશ્રિતાઃ ॥ ૨.૬૩॥ ૐ ઐં ફ્રોં (કં) નમઃ ॥ ૬૩॥
કબન્ધાશ્છિન્નશિરસઃ ખડ્ગશક્ત્યૃષ્ટિપાણયઃ ।
તિષ્ઠ તિષ્ઠેતિ ભાષન્તો દેવીમન્યે મહાસુરાઃ ॥ ૨.૬૪॥ ૐ ઐં ફ્રોં (ફ્રૌં) નમઃ ॥ ૬૪॥
પાતિતૈ રથનાગાશ્વૈરસુરૈશ્ચ વસુન્ધરા ।
અગમ્યા સાભવત્તત્ર યત્રાભૂત્ સ મહારણઃ ॥ ૨.૬૫॥ ૐ ઐં હ્રીં નમઃ ॥ ૬૫॥
શોણિતૌઘા મહાનદ્યઃ સદ્યસ્તત્ર પ્રસુસ્રુવુઃ ।
મધ્યે ચાસુરસૈન્યસ્ય વારણાસુરવાજિનામ્ ॥ ૨.૬૬॥ ૐ ઐં શાં નમઃ ॥ ૬૬॥
ક્ષણેન તન્મહાસૈન્યમસુરાણાં તથામ્બિકા ।
નિન્યે ક્ષયં યથા વહ્નિસ્તૃણદારુમહાચયમ્ ॥ ૨.૬૭॥ ૐ ઐં ક્ષ્મ્રીં નમઃ ॥ ૬૭॥
સ ચ સિંહો મહાનાદમુત્સૃજન્ ધુતકેસરઃ ।
શરીરેભ્યોઽમરારીણામસૂનિવ વિચિન્વતિ ॥ ૨.૬૮॥ ૐ ઐં રોં નમઃ ॥ ૬૮॥
દેવ્યા ગણૈશ્ચ તૈસ્તત્ર કૃતં યુદ્ધં તથાસુરૈઃ ।
યથૈષાં તુતુષુર્દેવાઃ પુષ્પવૃષ્ટિમુચો દિવિ ॥ ૨.૬૯॥ ૐ ઐં ડૂં (ડું, ડું) નમઃ ॥ ૬૯॥
“ૐ ઐં ક્રીં ક્રાં સૌં સઃ ફટ્ સ્વાહા ॥ ૨॥”
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ હ્રીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
મહિષાસુરસૈન્યવધો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥
ઉવાચ ૧, અર્ધશ્લોકાઃ ૬૮, શ્લોકાઃ ૬૯, એવમાદિતઃ ॥ ૧૭૩॥

## ॥ ૩. મહિષાસુરવધો નામ તૃતીયોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ ઉદ્યદ્ભાનુસહસ્રકાન્તિમરુણક્ષૌમાં શિરોમાલિકાં
રક્તાલિપ્તપયોધરાં જપવટીં વિદ્યામભીતિં વરમ્ ।
હસ્તાબ્જૈર્દધતીં ત્રિનેત્રવિલસદ્વક્ત્રારવિન્દશ્રિયં
દેવીં બદ્ધહિમાંશુરત્નમુકુટાં વન્દેઽરવિન્દસ્થિતામ્ ।
ૐ ઋષિરુવાચ ॥ ૩.૧॥ ૐ ઐં શ્રીં (શ્રૌં, શ્રોં) નમઃ ॥ ૧॥
નિહન્યમાનં તત્સૈન્યમવલોક્ય મહાસુરઃ ।
સેનાનીશ્ચિક્ષુરઃ કોપાદ્યયૌ યોદ્ધુમથામ્બિકામ્ ॥ ૩.૨॥ ૐ ઐં ક્લીં નમઃ ॥ ૨॥
સ દેવીં શરવર્ષેણ વવર્ષ સમરેઽસુરઃ ।
યથા મેરુગિરેઃ શૃઙ્ગં તોયવર્ષેણ તોયદઃ ॥ ૩.૩॥ ૐ ઐં સાં નમઃ ॥ ૩॥
તસ્ય છિત્વા તતો દેવી લીલયૈવ શરોત્કરાન્ ।
જઘાન તુરગાન્બાણૈર્યન્તારં ચૈવ વાજિનામ્ ॥ ૩.૪॥ ૐ ઐં ત્રોં નમઃ ॥ ૪॥
ચિચ્છેદ ચ ધનુઃ સદ્યો ધ્વજં ચાતિસમુચ્છૃતમ્ ।
વિવ્યાધ ચૈવ ગાત્રેષુ છિન્નધન્વાનમાશુગૈઃ ॥ ૩.૫॥ ૐ ઐં પ્રૂં નમઃ ॥ ૫॥
સચ્છિન્નધન્વા વિરથો હતાશ્વો હતસારથિઃ ।
અભ્યધાવત તાં દેવીં ખડ્ગચર્મધરોઽસુરઃ ॥ ૩.૬॥ ૐ ઐં મ્લીં નમઃ ॥ ૬॥
સિંહમાહત્ય ખડ્ગેન તીક્ષ્ણધારેણ મૂર્ધનિ ।
આજઘાન ભુજે સવ્યે દેવીમપ્યતિવેગવાન્ ॥ ૩.૭॥ ૐ ઐં ક્રૌં નમઃ ॥ ૭॥

તસ્યાઃ ખડ્ગો ભુજં પ્રાપ્ય પફાલ નૃપનન્દન ।
તતો જગ્રાહ શૂલં સ કોપાદરુણલોચનઃ ॥ ૩.૮॥ ૐ ઐં વ્રીં નમઃ ॥ ૮॥
ચિક્ષેપ ચ તતસ્તત્તુ ભદ્રકાલ્યાં મહાસુરઃ ।
જાજ્વલ્યમાનં તેજોભી રવિબિમ્બમિવામ્બરાત્ ॥ ૩.૯॥ ૐ ઐં સ્લીં નમઃ ॥ ૯॥
દૃષ્ટ્વા તદાપતચ્છૂલં દેવી શૂલમમુઞ્ચત ।
તેન તચ્છતધા નીતં શૂલં સ ચ મહાસુરઃ ॥ ૩.૧૦॥ ૐ ઐં હ્લીં નમઃ ॥ ૧૦॥
હતે તસ્મિન્મહાવીર્યે મહિષસ્ય ચમૂપતૌ ।
આજગામ ગજારૂઢશ્ચામરસ્ત્રિદશાર્દનઃ ॥ ૩.૧૧॥ ૐ ઐં હૌં નમઃ ॥ ૧૧॥
સોઽપિ શક્તિં મુમોચાથ દેવ્યાસ્તામમ્બિકા દ્રુતમ્ ।
હુઙ્કારાભિહતાં ભૂમૌ પાતયામાસ નિષ્પ્રભામ્ ॥ ૩.૧૨॥ ૐ ઐં શ્રાં નમઃ ॥ ૧૨॥
ભગ્નાં શક્તિં નિપતિતાં દૃષ્ટ્વા ક્રોધસમન્વિતઃ ।
ચિક્ષેપ ચામરઃ શૂલં બાણૈસ્તદપિ સાચ્છિનત્ ॥ ૩.૧૩॥ ૐ ઐં ગ્રોં નમઃ ॥ ૧૩॥
તતઃ સિંહઃ સમુત્પત્ય ગજકુમ્ભાન્તરે સ્થિતઃ ।
બાહુયુદ્ધેન યુયુધે તેનોચ્ચૈસ્ત્રિદશારિણા ॥ ૩.૧૪॥ ૐ ઐં ક્રૂં નમઃ ॥ ૧૪॥
યુધ્યમાનૌ તતસ્તૌ તુ તસ્માન્નાગાન્મહીં ગતૌ ।
યુયુધાતેઽતિસંરબ્ધૌ પ્રહારૈરતિદારુણૈઃ ॥ ૩.૧૫॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૫॥
તતો વેગાત્ ખમુત્પત્ય નિપત્ય ચ મૃગારિણા ।
કરપ્રહારેણ શિરશ્ચામરસ્ય પૃથક્ કૃતમ્ ॥ ૩.૧૬॥ ૐ ઐં યાં નમઃ ॥ ૧૬॥
ઉદગ્રશ્ચ રણે દેવ્યા શિલાવૃક્ષાદિભિર્હતઃ ।
દન્તમુષ્ટિતલૈશ્ચૈવ કરાલશ્ચ નિપાતિતઃ ॥ ૩.૧૭॥ ૐ ઐં દ્લૂં નમઃ ॥ ૧૭॥
દેવી ક્રુદ્ધા ગદાપાતૈશ્ચૂર્ણયામાસ ચોદ્ધતમ્ ।
બાષ્કલં ભિન્દિપાલેન બાણૈસ્તામ્રં તથાન્ધકમ્ ॥ ૩.૧૮॥ ૐ ઐં દ્રૂં નમઃ ॥ ૧૮॥
ઉગ્રાસ્યમુગ્રવીર્યં ચ તથૈવ ચ મહાહનુમ્ ।
ત્રિનેત્રા ચ ત્રિશૂલેન જઘાન પરમેશ્વરી ॥ ૩.૧૯॥ ૐ ઐં ક્ષં નમઃ ॥ ૧૯॥
બિડાલસ્યાસિના કાયાત્ પાતયામાસ વૈ શિરઃ ।
દુર્ધરં દુર્મુખં ચોભૌ શરૈર્નિન્યે યમક્ષયમ્ ॥ ૩.૨૦॥ ૐ ઐં ઓં નમઃ ॥ ૨૦॥
એવં સઙ્ક્ષીયમાણે તુ સ્વસૈન્યે મહિષાસુરઃ ।
માહિષેણ સ્વરૂપેણ ત્રાસયામાસ તાન્ ગણાન્ ॥ ૩.૨૧॥ ૐ ઐં ક્રૌં નમઃ ॥ ૨૧॥
કાંશ્ચિત્તુણ્ડપ્રહારેણ ખુરક્ષેપૈસ્તથાપરાન્ ।
લાઙ્ગૂલતાડિતાંશ્ચાન્યાન્ શ ૃઙ્ગાભ્યાં ચ વિદારિતાન્ ॥ ૩.૨૨॥ ૐ ઐં ક્ષ્મ્ક્લ્રીં નમઃ ॥ ૨૨॥
વેગેન કાંશ્ચિદપરાન્નાદેન ભ્રમણેન ચ ।
નિઃશ્વાસપવનેનાન્યાન્પાતયામાસ ભૂતલે ॥ ૩.૨૩॥ ૐ ઐં વાં નમઃ ॥ ૨૩॥

નિપાત્ય પ્રમથાનીકમભ્યધાવત સોઽસુરઃ ।
સિંહં હન્તું મહાદેવ્યાઃ કોપં ચક્રે તતોઽમ્બિકા ॥ ૩.૨૪॥ ૐ ઐં શ્રૂં નમઃ ॥ ૨૪॥
સોઽપિ કોપાન્મહાવીર્યઃ ખુરક્ષુણ્ણમહીતલઃ ।
શ‍ૃઙ્ગાભ્યાં પર્વતાનુચ્ચાંશ્ચિક્ષેપ ચ નનાદ ચ ॥ ૩.૨૫॥ ૐ ઐં બ્લૂં નમઃ ॥ ૨૫॥
વેગભ્રમણવિક્ષુણ્ણા મહી તસ્ય વ્યશીર્યત ।
લાઙ્ગૂલેનાહતશ્ચાબ્ધિઃ પ્લાવયામાસ સર્વતઃ ॥ ૩.૨૬॥ ૐ ઐં લ્રીં નમઃ ॥ ૨૬॥
ધુતશ‍ૃઙ્ગવિભિન્નાશ્ચ ખણ્ડં ખણ્ડં યયુર્ઘનાઃ ।
શ્વાસાનિલાસ્તાઃ શતશો નિપેતુર્નભસોઽચલાઃ ॥ ૩.૨૭॥ ૐ ઐં પ્રેં નમઃ ॥ ૨૭॥
ઇતિ ક્રોધસમાધ્માતમાપતન્તં મહાસુરમ્ ।
દૃષ્ટ્વા સા ચણ્ડિકા કોપં તદ્વધાય તદાકરોત્ ॥ ૩.૨૮॥ ૐ ઐં હૂં નમઃ ॥ ૨૮॥
સા ક્ષિપ્ત્વા તસ્ય વૈ પાશં તં બબન્ધ મહાસુરમ્ ।
તત્યાજ માહિષં રૂપં સોઽપિ બદ્ધો મહામૃધે ॥ ૩.૨૯॥ ૐ ઐં હ્રૌં નમઃ ॥ ૨૯॥
તતઃ સિંહોઽભવત્સદ્યો યાવત્તસ્યામ્બિકા શિરઃ ।
છિનત્તિ તાવત્ પુરુષઃ ખડ્ગપાણિરદૃશ્યત ॥ ૩.૩૦॥ ૐ ઐં દેં નમઃ ॥ ૩૦॥
તત એવાશુ પુરુષં દેવી ચિચ્છેદ સાયકૈઃ ।
તં ખડ્ગચર્મણા સાર્ધં તતઃ સોઽભૂન્મહાગજઃ ॥ ૩.૩૧॥ ૐ ઐં નૂં નમઃ ॥ ૩૧॥
કરેણ ચ મહાસિંહં તં ચકર્ષ જગર્જ ચ ।
કર્ષતસ્તુ કરં દેવી ખડ્ગેન નિરકૃન્તત ॥ ૩.૩૨॥ ૐ ઐં આં નમઃ ॥ ૩૨॥
તતો મહાસુરો ભૂયો માહિષં વપુરાસ્થિતઃ ।
તથૈવ ક્ષોભયામાસ ત્રૈલોક્યં સચરાચરમ્ ॥ ૩.૩૩॥ ૐ ઐં ફ્રાં નમઃ ॥ ૩૩॥
તતઃ ક્રુદ્ધા જગન્માતા ચણ્ડિકા પાનમુત્તમમ્ ।
પપૌ પુનઃ પુનશ્ચૈવ જહાસારુણલોચના ॥ ૩.૩૪॥ ૐ ઐં પ્રીં નમઃ ॥ ૩૪॥
નનર્દ ચાસુરઃ સોઽપિ બલવીર્યમદોદ્ધતઃ ।
વિષાણાભ્યાં ચ ચિક્ષેપ ચણ્ડિકાં પ્રતિ ભૂધરાન્ ॥ ૩.૩૫॥ ૐ ઐં દૂં નમઃ ॥ ૩૫॥
સા ચ તાન્પ્રહિતાંસ્તેન ચૂર્ણયન્તી શરોત્કરૈઃ ।
ઉવાચ તં મદોદ્ધૂતમુખરાગાકુલાક્ષરમ્ ॥ ૩.૩૬॥ ૐ ઐં ફ્રીં નમઃ ॥ ૩૬॥
દેવ્યુવાચ ॥ ૩.૩૭॥ ૐ ઐં હ્રીં નમઃ ॥ ૩૭॥
ગર્જ ગર્જ ક્ષણં મૂઢ મધુ યાવત્પિબામ્યહમ્ ।
મયા ત્વયિ હતેઽત્રૈવ ગર્જિષ્યન્ત્યાશુ દેવતાઃ ॥ ૩.૩૮॥ ૐ ઐં ગૂં નમઃ ॥ ૩૮॥
ઋષિરુવાચ ॥ ૩.૩૯॥ ૐ ઐં શ્રૌં નમઃ ॥ ૩૯॥
એવમુક્ત્વા સમુત્પત્ય સારૂઢા તં મહાસુરમ્ ।
પાદેનાક્રમ્ય કણ્ઠે ચ શૂલેનૈનમતાડયત્ ॥ ૩.૪૦॥ ૐ ઐં સાં નમઃ ॥ ૪૦॥

તતઃ સોઽપિ પદાક્રાન્તસ્તયા નિજમુખાત્તદા ।
અર્ધનિષ્ક્રાન્ત એવાસીદ્દેવ્યા વીર્યેણ સંવૃતઃ ॥ ૩.૪૧॥ ૐ ઐં શ્રીં નમઃ ॥ ૪૧॥
અર્ધનિષ્ક્રાન્ત એવાસૌ યુધ્યમાનો મહાસુરઃ ।
તયા મહાસિના દેવ્યા શિરશ્છિત્ત્વા નિપાતિતઃ ॥ ૩.૪૨॥ ૐ ઐં જું નમઃ ॥ ૪૨॥
તતો હાહાકૃતં સર્વં દૈત્યસૈન્યં નનાશ તત્ ।
પ્રહર્ષં ચ પરં જગ્મુઃ સકલા દેવતાગણાઃ ॥ ૩.૪૩॥ ૐ ઐં હં નમઃ ॥ ૪૩॥
તુષ્ટુવુસ્તાં સુરા દેવીં સહદિવ્યૈર્મહર્ષિભિઃ ।
જગુર્ગન્ધર્વપતયો નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૩.૪૪॥ ૐ ઐં સં નમઃ ॥ ૪૪॥
"ૐ હ્રીં શ્રીં કું ફટ્ સ્વાહા ॥ ૩॥"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ હ્રીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
મહિષાસુરવધો નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥
ઉવાચ ૩, અર્ધશ્લોકાઃ ૪૧, શ્લોકાઃ ૪૪, એવમાદિતઃ ॥ ૨૧૭॥

## ॥ ૪. શક્રાદિસ્તુતિર્નામ ચતુર્થોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ કાલાભ્રાભાં કટાક્ષૈરરિકુલભયદાં મૌલિબદ્ધેન્દુરેખાં
શઙ્ખં ચક્રં કૃપાણં ત્રિશિખમપિ કરૈરુદ્વહન્તીં ત્રિનેત્રામ્ ।
સિંહસ્કન્ધાધિરૂઢાં ત્રિભુવનમખિલં તેજસા પૂરયન્તીં
ધ્યાયેદ્દુર્ગાં જયાખ્યાં ત્રિદશપરિવૃતાં સેવિતાં સિદ્ધિકામૈઃ ॥
ૐ ઋષિરુવાચ ॥ ૪.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
શક્રાદયઃ સુરગણા નિહતેઽતિવીર્યે
તસ્મિન્દુરાત્મનિ સુરારિબલે ચ દેવ્યા ।
તાં તુષ્ટુવુઃ પ્રણતિનમ્રશિરોધરાંસા

વાગ્ભિઃ પ્રહર્ષપુલકોદ્ગમચારુદેહાઃ ॥ ૪.૨॥ ૐ ઐં સૌં નમઃ ॥ ૨॥
દેવ્યા યયા તતમિદં જગદાત્મશક્ત્યા
નિઃશેષદેવગણશક્તિસમૂહમૂર્ત્યા ।
તામમ્બિકામખિલદેવમહર્ષિપૂજ્યાં
ભક્ત્યા નતાઃ સ્મ વિદધાતુ શુભાનિ સા નઃ ॥ ૪.૩॥ ૐ ઐં દિં (દોં) નમઃ ॥ ૩॥
યસ્યાઃ પ્રભાવમતુલં ભગવાનનન્તો
બ્રહ્મા હરશ્ચ ન હિ વક્તુમલં બલં ચ ।
સા ચણ્ડિકાખિલજગત્પરિપાલનાય
નાશાય ચાશુભભયસ્ય મતિં કરોતુ ॥ ૪.૪॥ ૐ ઐં પ્રેં નમઃ ॥ ૪॥
યા શ્રીઃ સ્વયં સુકૃતિનાં ભવનેષ્વલક્ષ્મીઃ
પાપાત્મનાં કૃતધિયાં હૃદયેષુ બુદ્ધિઃ ।
શ્રદ્ધા સતાં કુલજનપ્રભવસ્ય લજ્જા
તાં ત્વાં નતાઃ સ્મ પરિપાલય દેવિ વિશ્વમ્ ॥ ૪.૫॥ ૐ ઐં યાં નમઃ ॥ ૫॥
કિં વર્ણયામ તવ રૂપમચિન્ત્યમેતત્
કિઞ્ચાતિવીર્યમસુરક્ષયકારિ ભૂરિ ।
કિં ચાહવેષુ ચરિતાનિ તવાતિ યાનિ
સર્વેષુ દેવ્યસુરદેવગણાદિકેષુ ॥ ૪.૬॥ ૐ ઐં રૂં નમઃ ॥ ૬॥
હેતુઃ સમસ્તજગતાં ત્રિગુણાપિ દોષૈ-
ર્ન જ્ઞાયસે હરિહરાદિભિરપ્યપારા ।
સર્વાશ્રયાખિલમિદં જગદંશભૂત-
મવ્યાકૃતા હિ પરમા પ્રકૃતિસ્ત્વમાદ્યા ॥ ૪.૭॥ ૐ ઐં ભં નમઃ ॥ ૭॥
યસ્યાઃ સમસ્તસુરતા સમુદીરણેન
તૃપ્તિં પ્રયાતિ સકલેષુ મખેષુ દેવિ ।
સ્વાહાસિ વૈ પિતૃગણસ્ય ચ તૃપ્તિહેતુ-
રુચ્ચાર્યસે ત્વમત એવ જનૈઃ સ્વધા ચ ॥ ૪.૮॥ ૐ ઐં સૂં નમઃ ॥ ૮॥
યા મુક્તિહેતુરવિચિન્ત્યમહાવ્રતા ત્વં
અભ્યસ્યસે સુનિયતેન્દ્રિયતત્ત્વસારૈઃ ।
મોક્ષાર્થિભિર્મુનિભિરસ્તસમસ્તદોષૈ-
ર્વિદ્યાસિ સા ભગવતી પરમા હિ દેવિ ॥ ૪.૯॥ ૐ ઐં શ્રાં નમઃ ॥ ૯॥
શબ્દાત્મિકા સુવિમલર્ગ્યજુષાં નિધાન-
મુદ્ગીથરમ્યપદપાઠવતાં ચ સામ્નામ્ ।
દેવિ ત્રયી ભગવતી ભવભાવનાય

વાર્તાસિ સર્વજગતાં પરમાર્તિહન્ત્રી ॥ ૪.૧૦॥ ૐ ઐં ઔં નમઃ ॥ ૧૦॥
મેધાસિ દેવિ વિદિતાખિલશાસ્ત્રસારા
દુર્ગાસિ દુર્ગભવસાગરનૌરસઙ્ગા ।
શ્રીઃ કૈટભારિહૃદયૈકકૃતાધિવાસા
ગૌરી ત્વમેવ શશિમૌલિકૃતપ્રતિષ્ઠા ॥ ૪.૧૧॥ ૐ ઐં લૂં નમઃ ॥ ૧૧॥
ઈષત્સહાસમમલં પરિપૂર્ણચન્દ્ર-
બિમ્બાનુકારિ કનકોત્તમકાન્તિકાન્તમ્ ।
અત્યદ્ભુતં પ્રહૃતમાત્તરુષા તથાપિ
વક્ત્રં વિલોક્ય સહસા મહિષાસુરેણ ॥ ૪.૧૨॥ ૐ ઐં ડૂં નમઃ ॥ ૧૨॥
દૃષ્ટ્વા તુ દેવિ કુપિતં ભ્રુકુટીકરાલ-
મુદ્યચ્છશાઙ્કસદૃશચ્છવિ યન્ન સદ્યઃ ।
પ્રાણાન્ મુમોચ મહિષસ્તદતીવ ચિત્રં
કૈર્જીવ્યતે હિ કુપિતાન્તકદર્શનેન ॥ ૪.૧૩॥ ૐ ઐં જૂં નમઃ ॥ ૧૩॥
દેવિ પ્રસીદ પરમા ભવતી ભવાય
સદ્યો વિનાશયસિ કોપવતી કુલાનિ ।
વિજ્ઞાતમેતદધુનૈવ યદસ્તમેત-
ન્નીતં બલં સુવિપુલં મહિષાસુરસ્ય ॥ ૪.૧૪॥ ૐ ઐં ધૂં નમઃ ॥ ૧૪॥
તે સમ્મતા જનપદેષુ ધનાનિ તેષાં
તેષાં યશાંસિ ન ચ સીદતિ બન્ધુવર્ગઃ ।
ધન્યાસ્ત એવ નિભૃતાત્મજભૃત્યદારા
યેષાં સદાભ્યુદયદા ભવતી પ્રસન્ના ॥ ૪.૧૫॥ ૐ ઐં ત્રેં નમઃ ॥ ૧૫॥
ધર્મ્યાણિ દેવિ સકલાનિ સદૈવ કર્મા-
ણ્યત્યાદૃતઃ પ્રતિદિનં સુકૃતી કરોતિ ।
સ્વર્ગં પ્રયાતિ ચ તતો ભવતી પ્રસાદા-
લ્લોકત્રયેઽપિ ફલદા નનુ દેવિ તેન ॥ ૪.૧૬॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૬॥
દુર્ગે સ્મૃતા હરસિ ભીતિમશેષજન્તોઃ
સ્વસ્થૈઃ સ્મૃતા મતિમતીવ શુભાં દદાસિ ।
દારિદ્ર્યદુઃખભયહારિણિ કા ત્વદન્યા
સર્વોપકારકરણાય સદાર્દ્રચિત્તા ॥ ૪.૧૭॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૭॥
એભિર્હતૈર્જગદુપૈતિ સુખં તથૈતે
કુર્વન્તુ નામ નરકાય ચિરાય પાપમ્ ।
સઙ્ગ્રામમૃત્યુમધિગમ્ય દિવં પ્રયાન્તુ

મત્વેતિ નૂનમહિતાન્વિનિહંસિ દેવિ ॥ ૪.૧૮॥ ૐ ઐં ઇં નમઃ ॥ ૧૮॥
દૃષ્ટ્વૈવ કિં ન ભવતી પ્રકરોતિ ભસ્મ
સર્વાસુરાનરિષુ યત્પ્રહિણોષિ શસ્ત્રમ્ ।
લોકાન્પ્રયાન્તુ રિપવોઽપિ હિ શસ્ત્રપૂતા
ઇત્થં મતિર્ભવતિ તેષ્વહિતેષુસાધ્વી ॥ ૪.૧૯॥ ૐ ઐં હ્રાં નમઃ ॥ ૧૯॥
ખડ્ગપ્રભાનિકરવિસ્ફુરણૈસ્તથોગ્રૈઃ
શૂલાગ્રકાન્તિનિવહેન દૃશોઽસુરાણામ્ ।
યન્નાગતા વિલયમંશુમદિન્દુખણ્ડ-
યોગ્યાનનં તવ વિલોકયતાં તદેતત્ ॥ ૪.૨૦॥ ૐ ઐં હ્રૂં નમઃ ॥ ૨૦॥
દુર્વૃત્તવૃત્તશમનં તવ દેવિ શીલં
રૂપં તથૈતદવિચિન્ત્યમતુલ્યમન્યૈઃ ।
વીર્યં ચ હન્તૃ હૃતદેવપરાક્રમાણાં
વૈરિષ્વપિ પ્રકટિતૈવ દયા ત્વયેત્થમ્ ॥ ૪.૨૧॥ ૐ ઐં ક્લૂં નમઃ ॥ ૨૧॥
કેનોપમા ભવતુ તેઽસ્ય પરાક્રમસ્ય
રૂપં ચ શત્રુભયકાર્યતિહારિ કુત્ર ।
ચિત્તે કૃપા સમરનિષ્ઠુરતા ચ દૃષ્ટા
ત્વય્યેવ દેવિ વરદે ભુવનત્રયેઽપિ ॥ ૪.૨૨॥ ૐ ઐં ક્રાં નમઃ ॥ ૨૨॥
ત્રૈલોક્યમેતદખિલં રિપુનાશનેન
ત્રાતં ત્વયા સમરમૂર્ધનિ તેઽપિ હત્વા ।
નીતા દિવં રિપુગણા ભયમપ્યપાસ્તમ્
અસ્માકમુન્મદસુરારિભવં નમસ્તે ॥ ૪.૨૩॥ ૐ ઐં લ્લૂં નમઃ ॥ ૨૩॥
શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટાસ્વનેન નઃ પાહિ ચાપજ્યાનિસ્વનેન ચ ॥ ૪.૨૪॥ ૐ ઐં ફ્રેં નમઃ ॥ ૨૪॥
પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાન્તથેશ્વરિ ॥ ૪.૨૫॥ ૐ ઐં ક્રીં નમઃ ॥ ૨૫॥
સૌમ્યાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।
યાનિ ચાત્યર્થતઘોરાણિ તૈ રક્ષાસ્માંસ્તથા ભુવમ્ ॥ ૪.૨૬॥ ૐ ઐં મ્લૂં નમઃ ॥ ૨૬॥
ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાનિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્રક્ષ સર્વતઃ ॥ ૪.૨૭॥ ૐ ઐં ઘ્રેં નમઃ ॥ ૨૭॥
ઋષિરુવાચ ॥ ૪.૨૮॥ ૐ ઐં શ્રૌં નમઃ ॥ ૨૮॥
એવં સ્તુતા સુરૈર્દિવ્યૈઃ કુસુમૈર્નન્દનોદ્ભવૈઃ ।
અર્ચિતા જગતાં ધાત્રી તથા ગન્ધાનુલેપનૈઃ ॥ ૪.૨૯॥ ૐ ઐં હ્રૌં નમઃ ॥ ૨૯॥

ભક્ત્યા સમસ્તૈસ્ત્રિદશૈર્દિવ્યૈર્ધૂપૈઃ સુધૂપિતા ।
પ્રાહ પ્રસાદસુમુખી સમસ્તાન્ પ્રણતાન્ સુરાન્ ॥ ૪.૩૦॥ ૐ ઐં વ્રીં નમઃ ॥ ૩૦॥
દેવ્યુવાચ ॥ ૪.૩૧॥ ૐ ઐં હ્રીં નમઃ ॥ ૩૧॥
વ્રિયતાં ત્રિદશાઃ સર્વે યદસ્મત્તોઽભિવાઞ્છિતમ્ ॥ ૪.૩૨॥ ૐ ઐં ત્રૌં નમઃ ॥ ૩૨॥
દેવા ઊચુઃ ॥ ૪.૩૩॥ ૐ ઐં હ્લ્લૌં (હસૌં) નમઃ ॥ ૩૩॥
ભગવત્યા કૃતં સર્વં ન કિઞ્ચિદવશિષ્યતે ॥ ૪.૩૪॥ ૐ ઐં ગીં નમઃ ॥ ૩૪॥
યદયં નિહતઃ શત્રુરસ્માકં મહિષાસુરઃ ।
યદિ ચાપિ વરો દેયસ્ત્વયાસ્માકં મહેશ્વરિ ॥ ૪.૩૫॥ ૐ ઐં યૂં નમઃ ॥ ૩૫॥
સંસ્મૃતા સંસ્મૃતા ત્વં નો હિંસેથાઃ પરમાપદઃ ।
યશ્ચ મર્ત્યઃ સ્તવૈરેભિસ્ત્વાં સ્તોષ્યત્યમલાનને ॥ ૪.૩૬॥ ૐ ઐં લ્હીં નમઃ ॥ ૩૬॥
તસ્ય વિત્તર્દ્ધિવિભવૈર્ધનદારાદિસમ્પદામ્ ।
વૃદ્ધયેઽસ્મત્પ્રસન્ના ત્વં ભવેથાઃ સર્વદામ્બિકે ॥ ૪.૩૭॥ ૐ ઐં લ્હૂં નમઃ ॥ ૩૭॥
ઋષિરુવાચ ॥ ૪.૩૮॥ ૐ ઐં શ્રૌં નમઃ ॥ ૩૮॥
ઇતિ પ્રસાદિતા દેવૈર્જગતોઽર્થે તથાત્મનઃ ।
તથેત્યુક્ત્વા ભદ્રકાલી બભૂવાન્તર્હિતા નૃપ ॥ ૪.૩૯॥ ૐ ઐં ઓં નમઃ ॥ ૩૯॥
ઇત્યેતત્કથિતં ભૂપ સમ્ભૂતા સા યથા પુરા ।
દેવી દેવશરીરેભ્યો જગત્ત્રયહિતૈષિણી ॥ ૪.૪૦॥ ૐ ઐં અં નમઃ ॥ ૪૦॥
પુનશ્ચ ગૌરીદેહાત્સા સમુદ્ભૂતા યથાભવત્ ।
વધાય દુષ્ટદૈત્યાનાં તથા શુમ્ભનિશુમ્ભયોઃ ॥ ૪.૪૧॥ ૐ ઐં મ્હૌં નમઃ ॥ ૪૧॥
રક્ષણાય ચ લોકાનાં દેવાનામુપકારિણી ।
તચ્છૃણુષ્વ મયાખ્યાતં યથાવત્કથયામિ તે ॥ ૪.૪૨॥ ૐ ઐં પ્રીં નમઃ ॥ ૪૨॥
હ્રીં ૐ ।

“ૐ અં હ્રીં શ્રીં હંસઃ ફટ્ સ્વાહા ॥ ૪॥ (ૐ અં હ્રીં હંસઃ ફટ્ સ્વાહા)”
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ હ્રીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
હૃલ્લેખાબીજાધિષ્ઠાત્ર્યૈ મહાલક્ષ્મ્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥

॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે
દેવીમાહાત્મ્યે શક્રાદિસ્તુતિર્નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥
ઉવાચ ૫, અર્ધશ્લોકૌ ૨, શ્લોકાઃ ૩૫, એવમાદિતઃ ॥ ૨૫૯॥

## ॥ ૫. દેવ્યા દૂતસંવાદો નામ પઞ્ચમોઽધ્યાયઃ ॥

વિનિયોગઃ
અસ્ય શ્રી ઉત્તરચરિત્રસ્ય રુદ્ર ઋષિઃ ।
શ્રીમહાસરસ્વતી દેવતા ।
અનુષ્ટુપ્ છન્દઃ । ભીમા શક્તિઃ । ભ્રામરી બીજમ્ ।
સૂર્યસ્તત્ત્વમ્ ।
સામવેદઃ સ્વરૂપમ્ । શ્રીમહાસરસ્વતીપ્રીત્યર્થે
ઉત્તરચરિત્રપાઠે વિનિયોગઃ ।
ધ્યાનમ્ ।
ઘણ્ટાશૂલહલાનિ શઙ્ખમુસલે ચક્રં ધનુઃ સાયકં
હસ્તાબ્જૈર્દધતીં ઘનાન્તવિલસચ્છીતાંશુતુલ્યપ્રભામ્ ।
ગૌરીદેહસમુદ્ભવાં ત્રિજગતામાધારભૂતાં મહા-
પૂર્વામત્ર સરસ્વતીમનુભજે શુમ્ભાદિદૈત્યાર્દિનીમ્ ॥
ૐ ક્લીં ઋષિરુવાચ ॥ ૫.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
પુરા શુમ્ભનિશુમ્ભાભ્યામસુરાભ્યાં શચીપતેઃ ।
ત્રૈલોક્યં યજ્ઞભાગાશ્ચ હૃતા મદબલાશ્રયાત્ ॥ ૫.૨॥ ૐ ઐં પ્રીં નમઃ ॥ ૨॥
તાવેવ સૂર્યતાં તદ્વદધિકારં તથૈન્દવમ્ ।
કૌબેરમથ યામ્યં ચ ચક્રાતે વરુણસ્ય ચ ॥ ૫.૩॥ ૐ ઐં આં નમઃ ॥ ૩॥
તાવેવ પવનર્દ્ધિં ચ ચક્રતુર્વહ્નિકર્મ ચ ।
તતો દેવા વિનિર્ધૂતા ભ્રષ્ટરાજ્યાઃ પરાજિતાઃ ॥ ૫.૪॥ ૐ ઐં હ્રીં નમઃ ॥ ૪॥
હૃતાધિકારાસ્ત્રિદશાસ્તાભ્યાં સર્વે નિરાકૃતાઃ ।
મહાસુરાભ્યાં તાં દેવીં સંસ્મરન્ત્યપરાજિતામ્ ॥ ૫.૫॥ ૐ ઐં લ્રીં નમઃ ॥ ૫॥
તયાસ્માકં વરો દત્તો યથાપત્સુ સ્મૃતાખિલાઃ ।
ભવતાં નાશયિષ્યામિ તત્ક્ષણાત્પરમાપદઃ ॥ ૫.૬॥ ૐ ઐં ત્રોં નમઃ ॥ ૬॥
ઇતિ કૃત્વા મતિં દેવા હિમવન્તં નગેશ્વરમ્ ।
જગ્મુસ્તત્ર તતો દેવીં વિષ્ણુમાયાં પ્રતુષ્ટુવુઃ ॥ ૫.૭॥ ૐ ઐં ક્રીં નમઃ ॥ ૭॥
દેવા ઊચુઃ ॥ ૫.૮॥ ૐ ઐં હ્સૌં નમઃ ॥ ૮॥

નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૫.૯॥ ૐ ઐં હ્રીં નમઃ ॥ ૯॥
રૌદ્રાયૈ નમો નિત્યાયૈ ગૌર્યૈ ધાત્ર્યૈ નમો નમઃ ।
જ્યોત્સ્નાયૈ ચેન્દુરૂપિણ્યૈ સુખાયૈ સતતં નમઃ ॥ ૫.૧૦॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૦॥
કલ્યાણ્યૈ પ્રણતાં વૃદ્ધ્યૈ સિદ્ધ્યૈ કુર્મો નમો નમઃ ।
નૈરૃત્યૈ ભૂભૃતાં લક્ષ્મ્યૈ શર્વાણ્યૈ તે નમો નમઃ ॥ ૫.૧૧॥ ૐ ઐં હૂં નમઃ ॥ ૧૧॥
દુર્ગાયૈ દુર્ગપારાયૈ સારાયૈ સર્વકારિણ્યૈ ।
ખ્યાત્યૈ તથૈવ કૃષ્ણાયૈ ધૂમ્રાયૈ સતતં નમઃ ॥ ૫.૧૨॥ ૐ ઐં ક્લીં નમઃ ॥ ૧૨॥
અતિસૌમ્યાતિરૌદ્રાયૈ નતાસ્તસ્યૈ નમો નમઃ ।
નમો જગત્પ્રતિષ્ઠાયૈ દેવ્યૈ કૃત્યૈ નમો નમઃ ॥ ૫.૧૩॥ ૐ ઐં રૌં નમઃ ॥ ૧૩॥
યા દેવી સર્વભૂતેષુ વિષ્ણુમાયેતિ શબ્દિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૧૪-૧૬॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૧૪॥ ૐ ઐં મ્લીં નમઃ ॥ ૧૫॥ ૐ ઐં પ્લૂં નમઃ ॥ ૧૬॥
યા દેવી સર્વભૂતેષુ ચેતનેત્યભિધીયતે ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૧૭-૧૯॥ ૐ ઐં સ્હાં નમઃ ॥ ૧૭॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૧૮॥ ૐ ઐં ગ્લૂં નમઃ ॥ ૧૯॥
યા દેવી સર્વભૂતેષુ બુદ્ધિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૦-૨૨॥ ૐ ઐં વ્રીં નમઃ ॥ ૨૦॥ ૐ ઐં સૌં નમઃ ॥ ૨૧॥ ૐ ઐં લૂં નમઃ ॥ ૨૨॥
યા દેવી સર્વભૂતેષુ નિદ્રારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૩-૨૫॥ ૐ ઐં લ્લૂં નમઃ ॥ ૨૩॥ ઐં દ્રાં નમઃ ॥ ૨૪॥ ૐ ઐં ક્સાં નમઃ ॥ ૨૫॥
યા દેવી સર્વભૂતેષુ ક્ષુધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૬-૨૮॥ ૐ ઐં ક્ષ્મ્રીં નમઃ ॥ ૨૬॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૨૭॥ ૐ ઐં સ્કૂઁ (સ્કૂં, સ્કં) નમઃ ॥ ૨૮॥
યા દેવી સર્વભૂતેષુ છાયારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૯-૩૧॥ ૐ ઐં ત્રૂં નમઃ ॥ ૨૯॥ ૐ ઐં સ્ક્લૂં નમઃ ॥ ૩૦॥ ૐ ઐં ક્રૌં નમઃ ॥ ૩૧॥
યા દેવી સર્વભૂતેષુ શક્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૨-૩૪॥ ૐ ઐં છ્રીં નમઃ ॥ ૩૨॥ ૐ ઐં મ્લૂં નમઃ ॥ ૩૩॥ ૐ ઐં ક્લૂં નમઃ ॥ ૩૪॥
યા દેવી સર્વભૂતેષુ તૃષ્ણારૂપેણ સંસ્થિતા ।

નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૫-૩૭॥ ૐ ઐં શાં નમઃ ॥ ૩૫॥ ૐ ઐં લ્હીં નમઃ ॥ ૩૬॥
ૐ ઐં સ્ત્રૂં નમઃ ॥ ૩૭॥
યા દેવી સર્વભૂતેષુ ક્ષાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૮-૪૦॥ ૐ ઐં લ્લીં નમઃ ॥ ૩૮॥ ૐ ઐં લીં નમઃ ॥ ૩૯॥
ૐ ઐં સં નમઃ ॥ ૪૦॥
યા દેવી સર્વભૂતેષુ જાતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૧-૪૩॥ ૐ ઐં લૂં નમઃ ૪૧॥ ૐ ઐં હ્સૂં નમઃ ॥ ૪૨॥ ૐ
ઐં શ્રૂં નમઃ ॥ ૪૩॥
યા દેવી સર્વભૂતેષુ લજ્જારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૪-૪૬॥ ૐ ઐં જૂં નમઃ ॥ ૪૪॥ ૐ ઐં હ્સ્લ્રીં નમઃ ॥ ૪૫॥
ૐ ઐં સ્કીં નમઃ ॥ ૪૬॥
યા દેવી સર્વભૂતેષુ શાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૭-૪૯॥ ૐ ઐં ક્લાં નમઃ ॥ ૪૭॥ ૐ ઐં શ્રૂં નમઃ ॥ ૪૮॥
ૐ ઐં હં નમઃ ॥ ૪૯॥
યા દેવી સર્વભૂતેષુ શ્રદ્ધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૦-૫૨॥ ૐ ઐં હ્લીં નમઃ ॥ ૫૦॥ ૐ ઐં ક્સ્રૂં નમઃ ॥ ૫૧॥
ૐ ઐં દ્રૌં નમઃ ॥ ૫૨॥
યા દેવી સર્વભૂતેષુ કાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૩-૫૫॥ ૐ ઐં ક્લૂં નમઃ ॥ ૫૩॥ ૐ ઐં ગાં નમઃ ॥ ૫૪॥
ૐ ઐ સં નમઃ ॥ ૫૫॥
યા દેવી સર્વભૂતેષુ લક્ષ્મીરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૬-૫૮॥ ૐ ઐં લ્સ્રાં નમઃ ॥ ૫૬॥ ૐ ઐં ફ્રીં નમઃ ॥ ૫૭॥
ૐ ઐં સ્લાં નમઃ ॥ ૫૮॥
યા દેવી સર્વભૂતેષુ વૃત્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૯-૬૧॥ ૐ ઐં લ્લૂં નમઃ ॥ ૫૯॥ ૐ ઐં ફ્રેં નમઃ ॥ ૬૦॥
ૐ ઐં ઓં નમઃ ॥ ૬૧॥
યા દેવી સર્વભૂતેષુ સ્મૃતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૨-૬૪॥ ૐ ઐં સ્મલીં (સ્મ્લીં) નમઃ ॥ ૬૨॥ ૐ ઐં હ્રાં નમઃ
॥ ૬૩॥ ૐ ઐં ૐ (ઓં, ઊં) નમઃ ॥ ૬૪॥
યા દેવી સર્વભૂતેષુ દયારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૫-૬૭॥ ૐ ઐં હ્લૂં નમઃ ॥ ૬૫॥ ૐ ઐં હૂઁ (હૂં) નમઃ ॥ ૬૬॥
ૐ ઐં નં નમઃ ॥ ૬૭॥

યા દેવી સર્વભૂતેષુ તુષ્ટિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૮-૭૦॥ ૐ ઐં સ્રાં નમઃ ॥ ૬૮॥ ૐ ઐં વં નમઃ ॥ ૬૯॥
ૐ ઐં મં નમઃ ॥ ૭૦॥
યા દેવી સર્વભૂતેષુ માતૃરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૧-૭૩॥ ૐ ઐં મ્ક્લીં નમઃ ॥ ૭૧॥ ૐ ઐં શાં નમઃ ॥ ૭૨॥
ૐ ઐં લં નમઃ ॥ ૭૩॥
યા દેવી સર્વભૂતેષુ ભ્રાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૪-૭૬॥ ૐ ઐં ભૈં નમઃ ॥ ૭૪॥ ૐ ઐં લ્લૂં નમઃ ॥ ૭૫॥
ૐ ઐં હૌં નમઃ ॥ ૭૬॥
ઇન્દ્રિયાણામધિષ્ઠાત્રી ભૂતાનાં ચાખિલેષુ યા ।
ભૂતેષુ સતતં તસ્યૈ વ્યાપ્ત્યૈ દેવ્યૈ નમો નમઃ ॥ ૫.૭૭॥ ૐ ઐં ઈં નમઃ ॥ ૭૭॥
ચિતિરૂપેણ યા કૃત્સ્નમેતદ્ વ્યાપ્ય સ્થિતા જગત્ ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૮-૮૦॥ ૐ ઐં ચેં નમઃ ॥ ૭૮॥ ૐ ઐં લ્ક્રીં નમઃ ॥ ૭૯॥
ૐ ઐં હ્લીં નમઃ ॥ ૮૦॥
સ્તુતા સુરૈઃ પૂર્વમભીષ્ટસંશ્રયા-
ત્તથા સુરેન્દ્રેણ દિનેષુ સેવિતા ।
કરોતુ સા નઃ શુભહેતુરીશ્વરી
શુભાનિ ભદ્રાણ્યભિહન્તુ ચાપદઃ ॥ ૫.૮૧॥ ૐ ઐં ક્ષ્મ્લ્રીં નમઃ ॥ ૮૧॥
યા સામ્પ્રતં ચોદ્ધતદૈત્યતાપિતૈ-
રસ્માભિરીશા ચ સુરૈર્નમસ્યતે ।
યા ચ સ્મૃતા તત્ક્ષણમેવ હન્તિ નઃ
સર્વાપદો ભક્તિવિનમ્રમૂર્તિભિઃ ॥ ૫.૮૨॥ ૐ ઐં યૂં નમઃ ॥ ૮૨॥
ઋષિરુવાચ ॥ ૫.૮૩॥ ૐ ઐં શ્રૌં નમઃ ॥ ૮૩॥
એવં સ્તવાભિયુક્તાનાં દેવાનાં તત્ર પાર્વતી ।
સ્નાતુમભ્યાયયૌ તોયે જાહ્નવ્યા નૃપનન્દન ॥ ૫.૮૪॥ ૐ ઐં હ્રૌં નમઃ ॥ ૮૪॥
સાબ્રવીત્તાન્ સુરાન્ સુભ્રૂર્ભવદ્ભિઃ સ્તૂયતેઽત્ર કા ।
શરીરકોશતશ્ચાસ્યાઃ સમુદ્ભૂતાબ્રવીચ્છિવા ॥ ૫.૮૫॥ ૐ ઐં ભ્રૂં નમઃ ॥ ૮૫॥
સ્તોત્રં મમૈતત્ક્રિયતે શુમ્ભદૈત્યનિરાકૃતૈઃ ।
દેવૈઃ સમેતૈઃ સમરે નિશુમ્ભેન પરાજિતૈઃ ॥ ૫.૮૬॥ ૐ ઐં ક્સ્ત્રીં નમઃ ॥ ૮૬॥
શરીરકોશાદ્યત્તસ્યાઃ પાર્વત્યા નિઃસૃતામ્બિકા ।
કૌશિકીતિ સમસ્તેષુ તતો લોકેષુ ગીયતે ॥ ૫.૮૭॥ ૐ ઐં આં નમઃ ॥ ૮૭॥
તસ્યાં વિનિર્ગતાયાં તુ કૃષ્ણાભૂત્સાપિ પાર્વતી ।

કાલિકેતિ સમાખ્યાતા હિમાચલકૃતાશ્રયા ॥ ૫.૮૮॥ ૐ ઐં ક્રૂં નમઃ ॥ ૮૮॥
તતોઽમ્બિકાં પરં રૂપં બિભ્રાણાં સુમનોહરમ્ ।
દદર્શ ચણ્ડો મુણ્ડશ્ચ ભૃત્યૌ શુમ્ભનિશુમ્ભયોઃ ॥ ૫.૮૯॥ ૐ ઐં ત્રૂં નમઃ ॥ ૮૯॥
તાભ્યાં શુમ્ભાય ચાખ્યાતા સાતીવ સુમનોહરા ।
કાપ્યાસ્તે સ્ત્રી મહારાજ ભાસયન્તી હિમાચલમ્ ॥ ૫.૯૦॥ ૐ ઐં ડૂં નમઃ ॥ ૯૦॥
નૈવ તાદૃક્ ક્વચિદ્રૂપં દૃષ્ટં કેનચિદુત્તમમ્ ।
જ્ઞાયતાં કાપ્યસૌ દેવી ગૃહ્યતાં ચાસુરેશ્વર ॥ ૫.૯૧॥ ૐ ઐં જાં નમઃ ॥ ૯૧॥
સ્ત્રીરત્નમતિચાર્વઙ્ગી દ્યોતયન્તી દિશસ્ત્વિષા ।
સા તુ તિષ્ઠતિ દૈત્યેન્દ્ર તાં ભવાન્ દ્રષ્ટુમર્હતિ ॥ ૫.૯૨॥ ૐ ઐં હ્લ્રૂં (હ્લૂં) નમઃ ॥ ૯૨॥
યાનિ રત્નાનિ મણયો ગજાશ્વાદીનિ વૈ પ્રભો ।
ત્રૈલોક્યે તુ સમસ્તાનિ સામ્પ્રતં ભાન્તિ તે ગૃહે ॥ ૫.૯૩॥ ૐ ઐં ફ્રૌં નમઃ ॥ ૯૩॥
ઐરાવતઃ સમાનીતો ગજરત્નં પુરન્દરાત્ ।
પારિજાતતરુશ્ચાયં તથૈવોચ્ચૈઃશ્રવા હયઃ ॥ ૫.૯૪॥ ૐ ઐં ક્રૌં નમઃ ॥ ૯૪॥
વિમાનં હંસસંયુક્તમેતત્તિષ્ઠતિ તેઽઙ્ગણે ।
રત્નભૂતમિહાનીતં યદાસીદ્વેધસોઽદ્ભુતમ્ ॥ ૫.૯૫॥ ૐ ઐં કિં નમઃ ॥ ૯૫॥
નિધિરેષ મહાપદ્મઃ સમાનીતો ધનેશ્વરાત્ ।
કિઞ્જલ્કિનીં દદૌ ચાબ્ધિર્માલામમ્લાનપઙ્કજામ્ ॥ ૫.૯૬॥ ૐ ઐં ગ્લૂં નમઃ ॥ ૯૬॥
છત્રં તે વારુણં ગેહે કાઞ્ચનસ્રાવિ તિષ્ઠતિ ।
તથાયં સ્યન્દનવરો યઃ પુરાસીત્પ્રજાપતેઃ ॥ ૫.૯૭॥ ૐ ઐં છ્ક્લીં નમઃ ॥ ૯૭॥
મૃત્યોરુત્ક્રાન્તિદા નામ શક્તિરીશ ત્વયા હૃતા ।
પાશઃ સલિલરાજસ્ય ભ્રાતુસ્તવ પરિગ્રહે ॥ ૫.૯૮॥ ૐ ઐં રં નમઃ ॥ ૯૮॥
નિશુમ્ભસ્યાબ્ધિજાતાશ્ચ સમસ્તા રત્નજાતયઃ ।
વહ્નિરપિ દદૌ તુભ્યમગ્નિશૌચે ચ વાસસી ॥ ૫.૯૯॥ ૐ ઐં ક્સૈં નમઃ ॥ ૯૯॥
એવં દૈત્યેન્દ્ર રત્નાનિ સમસ્તાન્યાહૃતાનિ તે ।
સ્ત્રીરત્નમેષા કલ્યાણી ત્વયા કસ્માન્ન ગૃહ્યતે ॥ ૫.૧૦૦॥ ૐ ઐં સ્હું નમઃ ॥ ૧૦૦॥
ઋષિરુવાચ ॥ ૫.૧૦૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧૦૧॥
નિશમ્યેતિ વચઃ શુમ્ભઃ સ તદા ચણ્ડમુણ્ડયોઃ ।
પ્રેષયામાસ સુગ્રીવં દૂતં દેવ્યા મહાસુરમ્ ॥ ૫.૧૦૨॥ ૐ ઐં હ્શ્રીં નમઃ ॥ ૧૦૨॥
ઇતિ ચેતિ ચ વક્તવ્યા સા ગત્વા વચનાન્મમ ।
યથા ચાભ્યેતિ સમ્પ્રીત્યા તથા કાર્યં ત્વયા લઘુ ॥ ૫.૧૦૩॥ ૐ ઐં ઓં નમઃ ॥ ૧૦૩॥
સ તત્ર ગત્વા યત્રાસ્તે શૈલોદ્દેશેઽતિશોભને ।
તાં ચ દેવીં તતઃ પ્રાહ શ્લક્ષ્ણં મધુરયા ગિરા ॥ ૫.૧૦૪॥ ૐ ઐં લૂં નમઃ ॥ ૧૦૪॥

દૂત ઉવાચ ॥ પ.૧૦૫॥ ૐ ઐં લ્હૂં નમઃ ॥ ૧૦૫॥
દેવિ દૈત્યેશ્વરઃ શુમ્ભસ્ત્રૈલોક્યે પરમેશ્વરઃ ।
દૂતોઽહં પ્રેષિતસ્તેન ત્વત્સકાશમિહાગતઃ ॥ પ.૧૦૬॥ ૐ ઐં લ્લૂં (લ્લૂં) નમઃ ॥ ૧૦૬॥
અવ્યાહતાજ્ઞઃ સર્વાસુ યઃ સદા દેવયોનિષુ ।
નિર્જિતાખિલદૈત્યારિઃ સ યદાહ શ ૃણુષ્વ તત્ ॥ પ.૧૦૭॥ ૐ ઐં સ્ક્રીં નમઃ ॥ ૧૦૭॥
મમ ત્રૈલોક્યમખિલં મમ દેવા વશાનુગાઃ ।
યજ્ઞભાગાનહં સર્વાનુપાશ્નામિ પૃથક્ પૃથક્ ॥ પ.૧૦૮॥ ૐ ઐં સ્સ્રૌં નમઃ ॥ ૧૦૮॥
ત્રૈલોક્યે વરરત્નાનિ મમ વશ્યાન્યશેષતઃ ।
તથૈવ ગજરત્નં ચ હૃતં દેવેન્દ્રવાહનમ્ ॥ પ.૧૦૯॥ ૐ ઐં સ્શ્રૂં નમઃ ॥ ૧૦૯॥
ક્ષીરોદમથનોદ્ભૂતમશ્વરત્નં મમામરૈઃ ।
ઉચ્ચૈઃશ્રવસસઞ્જ્ઞં તત્પ્રણિપત્ય સમર્પિતમ્ ॥ પ.૧૧૦॥ ૐ ઐં ક્ષ્મ્ક્લીં નમઃ ॥ ૧૧૦॥
યાનિ ચાન્યાનિ દેવેષુ ગન્ધર્વેષૂરગેષુ ચ ।
રત્નભૂતાનિ ભૂતાનિ તાનિ મય્યેવ શોભને ॥ પ.૧૧૧॥ ૐ ઐં વ્રીં નમઃ ॥ ૧૧૧॥
સ્ત્રીરત્નભૂતાં ત્વાં દેવિ લોકે મન્યામહે વયમ્ ।
સા ત્વમસ્માનુપાગચ્છ યતો રત્નભુજો વયમ્ ॥ પ.૧૧૨॥ ૐ ઐં સીં નમઃ ॥ ૧૧૨॥
માં વા મમાનુજં વાપિ નિશુમ્ભમુરુવિક્રમમ્ ।
ભજ ત્વં ચઞ્ચલાપાઙ્ગિ રત્નભૂતાસિ વૈ યતઃ ॥ પ.૧૧૩॥ ૐ ઐં ભ્રૂં નમઃ ॥ ૧૧૩॥
પરમૈશ્વર્યમતુલં પ્રાપ્સ્યસે મત્પરિગ્રહાત્ ।
એતદ્બુદ્ધ્યા સમાલોચ્ય મત્પરિગ્રહતાં વ્રજ ॥ પ.૧૧૪॥ ૐ ઐં લાં નમઃ ॥ ૧૧૪॥
ઋષિરુવાચ ॥ પ.૧૧૫॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧૧૫॥
ઇત્યુક્તા સા તદા દેવી ગમ્ભીરાન્તઃસ્મિતા જગૌ ।
દુર્ગા ભગવતી ભદ્રા યયેદં ધાર્યતે જગત્ ॥ પ.૧૧૬॥ ૐ ઐં સ્હૈં નમઃ ॥ ૧૧૬॥
દેવ્યુવાચ ॥ પ.૧૧૭॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૧૭॥
સત્યમુક્તં ત્વયા નાત્ર મિથ્યા કિઞ્ચિત્ત્વયોદિતમ્ ।
ત્રૈલોક્યાધિપતિઃ શુમ્ભો નિશુમ્ભશ્ચાપિ તાદૃશઃ ॥ પ.૧૧૮॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૧૮॥
કિં ત્વત્ર યત્પ્રતિજ્ઞાતં મિથ્યા તત્ક્રિયતે કથમ્ ।
શ્રૂયતામલ્પબુદ્ધિત્વાત્પ્રતિજ્ઞા યા કૃતા પુરા ॥ પ.૧૧૯॥ ૐ ઐં ફ્રેં નમઃ ॥ ૧૧૯॥
યો માં જયતિ સઙ્ગ્રામે યો મે દર્પં વ્યપોહતિ ।
યો મે પ્રતિબલો લોકે સ મે ભર્તા ભવિષ્યતિ ॥ પ.૧૨૦॥ ૐ ઐં રૂં નમઃ ॥ ૧૨૦॥
તદાગચ્છતુ શુમ્ભોઽત્ર નિશુમ્ભો વા મહાબલઃ ।
માં જિત્વા કિં ચિરેણાત્ર પાણિં ગૃહ્ણાતુ મે લઘુ ॥ પ.૧૨૧॥ ૐ ઐં ચ્છૂં નમઃ ॥ ૧૨૧॥
દૂત ઉવાચ ॥ પ.૧૨૨॥ ૐ ઐં લ્હૂં નમઃ ॥ ૧૨૨॥

અવલિપ્તાસિ મૈવં ત્વં દેવિ બ્રૂહિ મમાગ્રતઃ ।
ત્રૈલોક્યે કઃ પુમાંસ્તિષ્ઠેદગ્રે શુમ્ભનિશુમ્ભયોઃ ॥ ૫.૧૨૩॥ ૐ ઐં કં નમઃ ॥ ૧૨૩॥
અન્યેષામપિ દૈત્યાનાં સર્વે દેવા ન વૈ યુધિ ।
તિષ્ઠન્તિ સમ્મુખે દેવિ કિં પુનઃ સ્ત્રી ત્વમેકિકા ॥ ૫.૧૨૪॥ ૐ ઐં દ્રૈં નમઃ ॥ ૧૨૪॥
ઇન્દ્રાદ્યાઃ સકલા દેવાસ્તસ્થુર્યેષાં ન સંયુગે ।
શુમ્ભાદીનાં કથં તેષાં સ્ત્રી પ્રયાસ્યસિ સમ્મુખમ્ ॥ ૫.૧૨૫॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૨૫॥
સા ત્વં ગચ્છ મયૈવોક્તા પાર્શ્વં શુમ્ભનિશુમ્ભયોઃ ।
કેશાકર્ષણનિર્ધૂતગૌરવા મા ગમિષ્યસિ ॥ ૫.૧૨૬॥ ૐ ઐં સાં નમઃ ॥ ૧૨૬॥
દેવ્યુવાચ ॥ ૫.૧૨૭॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૨૭॥
એવમેતદ્ બલી શુમ્ભો નિશુમ્ભશ્ચાપિતાદૃશઃ ।
કિં કરોમિ પ્રતિજ્ઞા મે યદનાલોચિતા પુરા ॥ ૫.૧૨૮॥ ૐ ઐં ઐં નમઃ ॥ ૧૨૮॥
સ ત્વં ગચ્છ મયોક્તં તે યદેતત્સર્વમાદૃતઃ ।
તદાચક્ષ્વાસુરેન્દ્રાય સ ચ યુક્તં કરોતુ યત્ ॥ ૫.૧૨૯॥ ૐ ઐં સ્ક્લીં નમઃ ॥ ૧૨૯॥
“ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે સ્વાહા ॥ ૫॥”
(બીજમન્ત્ર ઉપલબ્ધ નહીં હૈ । અતઃ ઇસ કે સ્થાન પર નવર્ણમન્ત્ર સે હવન કિયા જા સકતા હૈ ।)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
દેવ્યા દૂતસંવાદો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥
ઉવાચ ૯, ત્રિપાન્મન્ત્રાઃ ૬૬, શ્લોકાઃ ૫૪, એવમાદિતઃ ॥ ૩૮૮॥

## ॥ ૬. શુમ્ભનિશુમ્ભસેનાનીધૂમ્રલોચનવધો નામ ષષ્ઠોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ નાગાધીશ્વરવિષ્ટરાં ફણિફણોત્તંસોરુ રત્નાવલી-
ભાસ્વદ્દેહલતાં દિવાકરનિભાં નેત્રત્રયોદ્ભાસિતામ્ ।
માલાકુમ્ભકપાલનીરજકરાં ચન્દ્રાર્ધચૂડાં પરાં

સર્વજ્ઞેશ્વરભૈરવાઙ્ગનિલયાં પદ્માવતીં ચિન્તયે ॥
ૐ ઋષિરુવાચ ॥ ૬.૧॥ ૐ ઐં શ્રીં નમઃ ॥ ૧॥
ઇત્યાકર્ણ્ય વચો દેવ્યાઃ સ દૂતોઽમર્ષપૂરિતઃ ।
સમાચષ્ટ સમાગમ્ય દૈત્યરાજાય વિસ્તરાત્ ॥ ૬.૨॥ ૐ ઐં ઓં નમઃ ॥ ૨॥
તસ્ય દૂતસ્ય તદ્વાક્યમાકર્ણ્યાસુરરાટ્ તતઃ ।
સક્રોધઃ પ્રાહ દૈત્યાનામધિપં ધૂમ્રલોચનમ્ ॥ ૬.૩॥ ૐ ઐં ત્રૂં નમઃ ॥ ૩॥
હે ધૂમ્રલોચનાશુ ત્વં સ્વસૈન્યપરિવારિતઃ ।
તામાનય બલાદ્દુષ્ટાં કેશાકર્ષણવિહ્વલામ્ ॥ ૬.૪॥ ૐ ઐં હ્રૌં નમઃ ॥ ૪॥
તત્પરિત્રાણદઃ કશ્ચિદ્યદિ વોત્તિષ્ઠતેઽપરઃ ।
સ હન્તવ્યોઽમરો વાપિ યક્ષો ગન્ધર્વ એવ વા ॥ ૬.૫॥ ૐ ઐં ક્રૌં નમઃ ॥ ૫॥
ઋષિરુવાચ ॥ ૬.૬॥ ૐ ઐં હ્રીં (શ્રૌં) નમઃ ॥ ૬॥
તેનાજ્ઞપ્તસ્તતઃ શીઘ્રં સ દૈત્યો ધૂમ્રલોચનઃ ।
વૃતઃ ષષ્ટ્યા સહસ્રાણામસુરાણાં દ્રુતં યયૌ ॥ ૬.૭॥ ૐ ઐં ત્રૌં (ત્રીં) નમઃ ॥ ૭॥
સ દૃષ્ટ્વા તાં તતો દેવીં તુહિનાચલસંસ્થિતામ્ ।
જગાદોચ્ચૈઃ પ્રયાહીતિ મૂલં શુમ્ભનિશુમ્ભયોઃ ॥ ૬.૮॥ ૐ ઐં ક્લીં નમઃ ॥ ૮॥
ન ચેત્પ્રીત્યાદ્ય ભવતી મદ્ભર્તારમુપૈષ્યતિ ।
તતો બલાન્નયામ્યેષ કેશાકર્ષણવિહ્વલામ્ ॥ ૬.૯॥ ૐ ઐં પ્રીં નમઃ ॥ ૯॥
દેવ્યુવાચ ॥ ૬.૧૦॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૦॥
દૈત્યેશ્વરેણ પ્રહિતો બલવાન્બલસંવૃતઃ ।
બલાન્નયસિ મામેવં તતઃ કિં તે કરોમ્યહમ્ ॥ ૬.૧૧॥ ૐ ઐં હ્રૌં નમઃ ॥ ૧૧॥
ઋષિરુવાચ ॥ ૬.૧૨॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧૨॥
ઇત્યુક્તઃ સોઽભ્યધાવત્તામસુરો ધૂમ્રલોચનઃ ।
હુઙ્કારેણૈવ તં ભસ્મ સા ચકારામ્બિકા તદા ॥ ૬.૧૩॥ ૐ ઐં ઐં નમઃ ॥ ૧૩॥
અથ ક્રુદ્ધં મહાસૈન્યમસુરાણાં તથામ્બિકા ।
વવર્ષ સાયકૈસ્તીક્ષ્ણૈસ્તથા શક્તિપરશ્વધૈઃ ॥ ૬.૧૪॥ ૐ ઐં ઓં નમઃ ॥ ૧૪॥
તતો ધુતસટઃ કોપાત્કૃત્વા નાદં સુભૈરવમ્ ।
પપાતાસુરસેનાયાં સિંહો દેવ્યાઃ સ્વવાહનઃ ॥ ૬.૧૫॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૫॥
કાંશ્ચિત્કરપ્રહારેણ દૈત્યાનાસ્યેન ચાપરાન્ ।
આક્રાન્ત્યા ચાધરેણાન્યાન્ જઘાન સ મહાસુરાન્ ॥ ૬.૧૬॥ ૐ ઐં ક્રાં નમઃ ॥ ૧૬॥
કેષાઞ્ચિત્પાટયામાસ નખૈઃ કોષ્ઠાનિ કેસરી ।
તથા તલપ્રહારેણ શિરાંસિ કૃતવાન્પૃથક્ ॥ ૬.૧૭॥ ૐ ઐં હૂં નમઃ ॥ ૧૭॥
વિચ્છિન્નબાહુશિરસઃ કૃતાસ્તેન તથાપરે ।

પપૌ ચ રુધિરં કોષ્ઠાદન્યેષાં ધુતકેસરઃ ॥ ૬.૧૮॥ ૐ ઐં છ્રાં ક્લીં નમઃ ॥ ૧૮॥
ક્ષણેન તદ્બલં સર્વં ક્ષયં નીતં મહાત્મના ।
તેન કેસરિણા દેવ્યા વાહનેનાતિકોપિના ॥ ૬.૧૯॥ ૐ ઐં ક્ષ્મ્ક્લ્રીં નમઃ ॥ ૧૯॥
શ્રુત્વા તમસુરં દેવ્યા નિહતં ધૂમ્રલોચનમ્ ।
બલં ચ ક્ષયિતં કૃત્સ્નં દેવીકેસરિણા તતઃ ॥ ૬.૨૦॥ ૐ ઐં લ્વૂં નમઃ ॥ ૨૦॥
ચુકોપ દૈત્યાધિપતિઃ શુમ્ભઃ પ્રસ્ફુરિતાધરઃ ।
આજ્ઞાપયામાસ ચ તૌ ચણ્ડમુણ્ડૌ મહાસુરૌ ॥ ૬.૨૧॥ ૐ ઐં સૌં નમઃ ॥ ૨૧॥
હે ચણ્ડ હે મુણ્ડ બલૈર્બહુભિઃ પરિવારિતૌ ।
તત્ર ગચ્છત ગત્વા ચ સા સમાનીયતાં લઘુ ॥ ૬.૨૨॥ ૐ ઐં હ્લૌં નમઃ ॥ ૨૨॥
કેશેષ્વાકૃષ્ય બદ્ધ્વા વા યદિ વઃ સંશયો યુધિ ।
તદાશેષાયુધૈઃ સર્વૈરસુરૈર્વિનિહન્યતામ્ ॥ ૬.૨૩॥ ૐ ઐં ક્રૂં નમઃ ॥ ૨૩॥
તસ્યાં હતાયાં દુષ્ટાયાં સિંહે ચ વિનિપાતિતે ।
શીઘ્રમાગમ્યતાં બદ્ધ્વા ગૃહીત્વા તામથામ્બિકામ્ ॥ ૬.૨૪॥ ૐ ઐં સૌં નમઃ ॥ ૨૪॥
"ૐ શ્રીં યં હ્રીં ક્લીં હ્લીં ફટ્ સ્વાહા ॥ ૬॥"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્રૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્રૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
શુમ્ભનિશુમ્ભસેનાનીધૂમ્રલોચનવધો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬॥
ઉવાચ ૪, શ્લોકાઃ ૨૪, એવમાદિતઃ ॥ ૪૧૨॥

## ॥ ૭. ચણ્ડમુણ્ડવધો નામ સપ્તમોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ ધ્યાયેયં રત્નપીઠે શુકકલપઠિતં શ‍ૃણ્વતીં શ્યામલાઙ્ગીં
ન્યસ્તૈકાઙ્ઘ્રિં સરોજે શશિશકલધરાં વલ્લકીં વાદયન્તીમ્ ।
કહ્લારાબદ્ધમાલાં નિયમિતવિલસચ્ચોલિકાં રક્તવસ્ત્રાં

માતઙ્ગી શઙ્ખપાત્રાં મધુરમધુમદાં ચિત્રકોદ્ભાસિભાલામ્ ॥
ૐ ઋષિરુવાચ ॥ ૭.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
આજ્ઞપ્તાસ્તે તતો દૈત્યાશ્ચણ્ડમુણ્ડપુરોગમાઃ ।
ચતુરઙ્ગબલોપેતા યયુરભ્યુદ્યતાયુધાઃ ॥ ૭.૨॥ ૐ ઐં કૂં નમઃ ॥ ૨॥
દદૃશુસ્તે તતો દેવીમીષદ્ધાસાં વ્યવસ્થિતામ્ ।
સિંહસ્યોપરિ શૈલેન્દ્રશૃઙ્ગે મહતિ કાઞ્ચને ॥ ૭.૩॥ ૐ ઐં શ્લૌં નમઃ ॥ ૩॥
તે દૃષ્ટ્વા તાં સમાદાતુમુદ્યમં ચક્રુરુદ્યતાઃ ।
આકૃષ્ટચાપાસિધરાસ્તથાન્યે તત્સમીપગાઃ ॥ ૭.૪॥ ૐ ઐં હ્રૂં નમઃ ॥ ૪॥
તતઃ કોપં ચકારોચ્ચૈરમ્બિકા તાનરીન્પ્રતિ ।
કોપેન ચાસ્યા વદનં મષીવર્ણમભૂત્તદા ॥ ૭.૫॥ ૐ ઐં મૂં નમઃ ॥ ૫॥
ભ્રુકુટીકુટિલાત્તસ્યા લલાટફલકાદ્દ્રુતમ્ ।
કાલી કરાલવદના વિનિષ્ક્રાન્તાસિપાશિની ॥ ૭.૬॥ ૐ ઐં ત્રૌં નમઃ ॥ ૬॥
વિચિત્રખટ્વાઙ્ગધરા નરમાલાવિભૂષણા ।
દ્વીપિચર્મપરીધાના શુષ્કમાંસાતિભૈરવા ॥ ૭.૭॥ ૐ ઐં હ્રૌં નમઃ ॥ ૭॥
અતિવિસ્તારવદના જિહ્વાલલનભીષણા ।
નિમગ્નારક્તનયના નાદાપૂરિતદિઙ્મુખા ॥ ૭.૮॥ ૐ ઐં ઓં નમઃ ॥ ૮॥
સા વેગેનાભિપતિતા ઘાતયન્તી મહાસુરાન્ ।
સૈન્યે તત્ર સુરારીણામભક્ષયત તદ્બલમ્ ॥ ૭.૯॥ ૐ ઐં હ્સૂં નમઃ ॥ ૯॥
પાર્ષ્ણિગ્રાહાઙ્કુશગ્રાહયોધઘણ્ટાસમન્વિતાન્ ।
સમાદાયૈકહસ્તેન મુખે ચિક્ષેપ વારણાન્ ॥ ૭.૧૦॥ ૐ ઐં ક્લૂં નમઃ ॥ ૧૦॥
તથૈવ યોધં તુરગૈ રથં સારથિના સહ ।
નિક્ષિપ્ય વક્ત્રે દશનૈશ્ચર્વયન્ત્યતિભૈરવમ્ ॥ ૭.૧૧॥ ૐ ઐં કેં (કેં) નમઃ ॥ ૧૧॥
એકં જગ્રાહ કેશેષુ ગ્રીવાયામથ ચાપરમ્ ।
પાદેનાક્રમ્ય ચૈવાન્યમુરસાન્યમપોથયત્ ॥ ૭.૧૨॥ ૐ ઐં નેં નમઃ ॥ ૧૨॥
તૈર્મુક્તાનિ ચ શસ્ત્રાણિ મહાસ્ત્રાણિ તથાસુરૈઃ ।
મુખેન જગ્રાહ રુષા દશનૈર્મથિતાન્યપિ ॥ ૭.૧૩॥ ૐ ઐં લૂં નમઃ ॥ ૧૩॥
બલિનાં તદ્બલં સર્વમસુરાણાં દુરાત્મનામ્ ।
મમર્દાભક્ષયચ્ચાન્યાનન્યાંશ્ચાતાડયત્તદા ॥ ૭.૧૪॥ ૐ ઐં હ્સ્લીં નમઃ ॥ ૧૪॥
અસિના નિહતાઃ કેચિત્કેચિત્ખટ્વાઙ્ગતાડિતાઃ ।
જગ્મુર્વિનાશમસુરા દન્તાગ્રાભિહતાસ્તથા ॥ ૭.૧૫॥ ૐ ઐં પ્લૂં નમઃ ॥ ૧૫॥
ક્ષણેન તદ્બલં સર્વમસુરાણાં નિપાતિતમ્ ।
દૃષ્ટ્વા ચણ્ડોઽભિદુદ્રાવ તાં કાલીમતિભીષણામ્ ॥ ૭.૧૬॥ ૐ ઐં શાં નમઃ ॥ ૧૬॥

શરવર્ષૈર્મહાભીમૈર્ભીમાક્ષીં તાં મહાસુરઃ ।
છાદયામાસ ચક્રૈશ્ચ મુણ્ડઃ ક્ષિપ્તૈઃ સહસ્રશઃ ॥ ૭.૧૭॥ ૐ ઐં સ્લૂં નમઃ ॥ ૧૭॥
તાનિ ચક્રાણ્યનેકાનિ વિશમાનાનિ તન્મુખમ્ ।
બભુર્યથાર્કબિમ્બાનિ સુબહૂનિ ઘનોદરમ્ ॥ ૭.૧૮॥ ૐ ઐં પ્લીં નમઃ ॥ ૧૮॥
તતો જહાસાતિરુષા ભીમં ભૈરવનાદિની ।
કાલી કરાલવદના દુર્દર્શદશનોજ્જ્વલા ॥ ૭.૧૯॥ ૐ ઐં પ્રૈં નમઃ ॥ ૧૯॥
ઉત્થાય ચ મહાસિંહં દેવી ચણ્ડમધાવત ।
ગૃહીત્વા ચાસ્ય કેશેષુ શિરસ્તેનાસિનાચ્છિનત્ ॥ ૭.૨૦॥ ૐ ઐં અં નમઃ ॥ ૨૦॥
અથ મુણ્ડોઽભ્યધાવત્તાં દૃષ્ટ્વા ચણ્ડં નિપાતિતમ્ ।
તમપ્યપાતયદ્ભૂમૌ સા ખડ્ગાભિહતં રુષા ॥ ૭.૨૧॥ ૐ ઐં ઔં નમઃ ॥ ૨૧॥
હતશેષં તતઃ સૈન્યં દૃષ્ટ્વા ચણ્ડં નિપાતિતમ્ ।
મુણ્ડં ચ સુમહાવીર્યં દિશો ભેજે ભયાતુરમ્ ॥ ૭.૨૨॥ ૐ ઐં મ્લીં નમઃ ॥ ૨૨॥
શિરશ્ચણ્ડસ્ય કાલી ચ ગૃહીત્વા મુણ્ડમેવ ચ ।
પ્રાહ પ્રચણ્ડાટ્ટહાસમિશ્રમભ્યેત્ય ચણ્ડિકામ્ ॥ ૭.૨૩॥ ૐ ઐં શ્રાં નમઃ ॥ ૨૩॥
મયા તવાત્રોપહૃતૌ ચણ્ડમુણ્ડૌ મહાપશૂ ।
યુદ્ધયજ્ઞે સ્વયં શુમ્ભં નિશુમ્ભં ચ હનિષ્યસિ ॥ ૭.૨૪॥ ૐ ઐં સૌં નમઃ ॥ ૨૪॥
ઋષિરુવાચ ॥ ૭.૨૫॥ ૐ ઐં શ્રૌં નમઃ ॥ ૨૫॥
તાવાનીતૌ તતો દૃષ્ટ્વા ચણ્ડમુણ્ડૌ મહાસુરૌ ।
ઉવાચ કાલીં કલ્યાણી લલિતં ચણ્ડિકા વચઃ ॥ ૭.૨૬॥ ૐ ઐં પ્રીં નમઃ ॥ ૨૬॥
યસ્માચ્ચણ્ડં ચ મુણ્ડં ચ ગૃહીત્વા ત્વમુપાગતા ।
ચામુણ્ડેતિ તતો લોકે ખ્યાતા દેવી ભવિષ્યસિ ॥ ૭.૨૭॥ ૐ ઐં હ્સ્વ્રીં નમઃ ॥ ૨૭॥
"ૐ રં રં રં કં કં કં જં જં જં ચામુણ્ડાયૈ ફટ્ સ્વાહા ॥ ૭॥ (ૐ રં રં રં કં કં જં જં ચામુણ્ડાયૈ ફટ્ સ્વાહા)"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે

ચણ્ડમુણ્ડવધો નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥
ઉવાચ ૨, શ્લોકાઃ ૨૫, એવમાદિતઃ ॥ ૪૩૯॥

## ॥ ૮. રક્તબીજવધો નામાષ્ટમોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ અરુણાં કરુણાતરઙ્ગિતાક્ષીં
ધૃતપાશાઙ્કુશબાણાચાપહસ્તામ્ ।
અણિમાદિભિરાવૃતાં મયૂખૈ-
રહમિત્યેવ વિભાવયે ભવાનીમ્ ॥
ૐ ઋષિરુવાચ ॥ ૮.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
ચણ્ડે ચ નિહતે દૈત્યે મુણ્ડે ચ વિનિપાતિતે ।
બહુલેષુ ચ સૈન્યેષુ ક્ષયિતેષ્વસુરેશ્વરઃ ॥ ૮.૨॥ ૐ ઐં મ્લ્રીં નમઃ ॥ ૨॥
તતઃ કોપપરાધીનચેતાઃ શુમ્ભઃ પ્રતાપવાન્ ।
ઉદ્યોગં સર્વસૈન્યાનાં દૈત્યાનામાદિદેશ હ ॥ ૮.૩॥ ૐ ઐં પ્રૂં નમઃ ॥ ૩॥
અદ્ય સર્વબલૈર્દૈત્યાઃ ષડશીતિરુદાયુધાઃ ।
કમ્બૂનાં ચતુરશીતિર્નિર્યાન્તુ સ્વબલૈર્વૃતાઃ ॥ ૮.૪॥ ૐ ઐં ઐં નમઃ ॥ ૪॥
કોટિવીર્યાણિ પઞ્ચાશદસુરાણાં કુલાનિ વૈ ।
શતં કુલાનિ ધૌમ્રાણાં નિર્ગચ્છન્તુ મમાજ્ઞયા ॥ ૮.૫॥ ૐ ઐં ક્રોં નમઃ ॥ ૫॥
કાલકા દૌર્હૃદા મૌર્વાઃ કાલિકેયાસ્તથાસુરાઃ ।
યુદ્ધાય સજ્જા નિર્યાન્તુ આજ્ઞયા ત્વરિતા મમ ॥ ૮.૬॥ ૐ ઐં ઈં નમઃ ॥ ૬॥
ઇત્યાજ્ઞાપ્યાસુરપતિઃ શુમ્ભો ભૈરવશાસનઃ ।
નિર્જગામ મહાસૈન્યસહસ્રૈર્બહુભિર્વૃતઃ ॥ ૮.૭॥ ૐ ઐં ઐં નમઃ ॥ ૭॥
આયાન્તં ચણ્ડિકા દૃષ્ટ્વા તત્સૈન્યમતિભીષણમ્ ।
જ્યાસ્વનૈઃ પૂરયામાસ ધરણીગગનાન્તરમ્ ॥ ૮.૮॥ ૐ ઐં લ્રીં નમઃ ॥ ૮॥
તતઃ સિંહો મહાનાદમતીવ કૃતવાન્નૃપ ।
ઘણ્ટાસ્વનેન તાન્નાદાનમ્બિકા ચોપબૃંહયત્ ॥ ૮.૯॥ ૐ ઐં ફ્રૌં નમઃ ॥ ૯॥
ધનુર્જ્યાસિંહઘણ્ટાનાં નાદાપૂરિતદિઙ્મુખા ।
નિનાદૈર્ભીષણૈઃ કાલી જિગ્યે વિસ્તારિતાનના ॥ ૮.૧૦॥ ૐ ઐં મ્લૂં નમઃ ॥ ૧૦॥
તં નિનાદમુપશ્રુત્ય દૈત્યસૈન્યૈશ્ચતુર્દિશમ્ ।
દેવી સિંહસ્તથા કાલી સરોષૈઃ પરિવારિતાઃ ॥ ૮.૧૧॥ ૐ ઐં નોં નમઃ ॥ ૧૧॥
એતસ્મિન્નન્તરે ભૂપ વિનાશાય સુરદ્વિષામ્ ।

ભવાયામરસિંહાનામતિવીર્યબલાન્વિતાઃ ॥ ૮.૧૨॥ ૐ ઐં હૂં નમઃ ॥ ૧૨॥
બ્રહ્મેશગુહવિષ્ણૂનાં તથેન્દ્રસ્ય ચ શક્તયઃ ।
શરીરેભ્યો વિનિષ્ક્રમ્ય તદ્રૂપૈશ્ચણ્ડિકાં યયુઃ ॥ ૮.૧૩॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૩॥
યસ્ય દેવસ્ય યદ્રૂપં યથા ભૂષણવાહનમ્ ।
તદ્વદેવ હિ તચ્છક્તિરસુરાન્યોદ્ધુમાયયૌ ॥ ૮.૧૪॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૧૪॥
હંસયુક્તવિમાનાગ્રે સાક્ષસૂત્રકમણ્ડલુઃ ।
આયાતા બ્રહ્મણઃ શક્તિર્બ્રહ્માણીત્યભિધીયતે ॥ ૮.૧૫॥ ૐ ઐં સ્મૌં નમઃ ॥ ૧૫॥
માહેશ્વરી વૃષારૂઢા ત્રિશૂલવરધારિણી ।
મહાહિવલયા પ્રાપ્તા ચન્દ્રરેખાવિભૂષણા ॥ ૮.૧૬॥ ૐ ઐં સૌં નમઃ ॥ ૧૬॥
કૌમારી શક્તિહસ્તા ચ મયૂરવરવાહના ।
યોદ્ધુમભ્યાયયૌ દૈત્યાનમ્બિકા ગુહરૂપિણી ॥ ૮.૧૭॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૭॥
તથૈવ વૈષ્ણવી શક્તિર્ગરુડોપરિ સંસ્થિતા ।
શઙ્ખચક્રગદાશાર્ઙ્ગખડ્ગહસ્તાભ્યુપાયયૌ ॥ ૮.૧૮॥ ૐ ઐં સ્હૌં નમઃ ॥ ૧૮॥
યજ્ઞવારાહમતુલં રૂપં યા બિભ્રતો હરેઃ ।
શક્તિઃ સાપ્યાયયૌ તત્ર વારાહીં બિભ્રતી તનુમ્ ॥ ૮.૧૯॥ ૐ ઐં ખ્સેં નમઃ ॥ ૧૯॥
નારસિંહી નૃસિંહસ્ય બિભ્રતી સદૃશં વપુઃ ।
પ્રાપ્તા તત્ર સટાક્ષેપક્ષિપ્તનક્ષત્રસંહતિઃ ॥ ૮.૨૦॥ ૐ ઐં ક્ષ્મ્લીં નમઃ ॥ ૨૦॥
વજ્રહસ્તા તથૈવૈન્દ્રી ગજરાજોપરિ સ્થિતા ।
પ્રાપ્તા સહસ્રનયના યથા શક્રસ્તથૈવ સા ॥ ૮.૨૧॥ ૐ ઐં હ્રાં નમઃ ॥ ૨૧॥
તતઃ પરિવૃતસ્તાભિરીશાનો દેવશક્તિભિઃ ।
હન્યન્તામસુરાઃ શીઘ્રં મમ પ્રીત્યાહ ચણ્ડિકામ્ ॥ ૮.૨૨॥ ૐ ઐં વીં નમઃ ॥ ૨૨॥
તતો દેવીશરીરાત્તુ વિનિષ્ક્રાન્તાતિભીષણા ।
ચણ્ડિકા શક્તિરત્યુગ્રા શિવાશતનિનાદિની ॥ ૮.૨૩॥ ૐ ઐં લૂં નમઃ ॥ ૨૩॥
સા ચાહ ધૂમ્રજટિલમીશાનમપરાજિતા ।
દૂત ત્વં ગચ્છ ભગવન્ પાર્શ્વં શુમ્ભનિશુમ્ભયોઃ ॥ ૮.૨૪॥ ૐ ઐં લ્સીં નમઃ ॥ ૨૪॥
બ્રૂહિ શુમ્ભં નિશુમ્ભં ચ દાનવાવતિગર્વિતૌ ।
યે ચાન્યે દાનવાસ્તત્ર યુદ્ધાય સમુપસ્થિતાઃ ॥ ૮.૨૫॥ ૐ ઐં બ્લોં નમઃ ॥ ૨૫॥
ત્રૈલોક્યમિન્દ્રો લભતાં દેવાઃ સન્તુ હવિર્ભુજઃ ।
યૂયં પ્રયાત પાતાલં યદિ જીવિતુમિચ્છથ ॥ ૮.૨૬॥ ૐ ઐં ત્સ્રોં નમઃ ॥ ૨૬॥
બલાવલેપાદથ ચેદ્ભવન્તો યુદ્ધકાઙ્ક્ષિણઃ ।
તદાગચ્છત તૃપ્યન્તુ મચ્છિવાઃ પિશિતેન વઃ ॥ ૮.૨૭॥ ૐ ઐં વ્રૂં (બ્રૂં) નમઃ ॥ ૨૭॥
યતો નિયુક્તો દૌત્યેન તયા દેવ્યા શિવઃ સ્વયમ્ ।

શિવદૂતીતિ લોકેઽસ્મિંસ્તતઃ સા ખ્યાતિમાગતા ॥ ૮.૨૮॥ ૐ ઐં શ્ક્રીં નમઃ ॥ ૨૮॥
તેઽપિ શ્રુત્વા વચો દેવ્યાઃ શર્વાખ્યાતં મહાસુરાઃ ।
અમર્ષાપૂરિતા જગ્મુર્યત્ર કાત્યાયની સ્થિતા ॥ ૮.૨૯॥ ૐ ઐં શ્રૂં નમઃ ॥ ૨૯॥
તતઃ પ્રથમમેવાગ્રે શરશક્ત્યૃષ્ટિવૃષ્ટિભિઃ ।
વવર્ષુરુદ્ધતામર્ષાસ્તાં દેવીમમરારયઃ ॥ ૮.૩૦॥ ૐ ઐં હ્રીં નમઃ ॥ ૩૦॥
સા ચ તાન્ પ્રહિતાન્ બાણાઞ્છૂલશક્તિપરશ્વધાન્ ।
ચિચ્છેદ લીલયાધ્માતધનુર્મુક્તૈર્મહેષુભિઃ ॥ ૮.૩૧॥ ૐ ઐં શીં નમઃ ॥ ૩૧॥
તસ્યાગ્રતસ્તથા કાલી શૂલપાતવિદારિતાન્ ।
ખટ્વાઙ્ગપોથિતાંશ્ચારીન્કુર્વતી વ્યચરત્તદા ॥ ૮.૩૨॥ ૐ ઐં ક્લીં નમઃ ॥ ૩૨॥
કમણ્ડલુજલાક્ષેપહતવીર્યાન્ હતૌજસઃ ।
બ્રહ્માણી ચાકરોચ્છત્રૂન્યેન યેન સ્મ ધાવતિ ॥ ૮.૩૩॥ ૐ ઐં ક્લૌં નમઃ ॥ ૩૩॥
માહેશ્વરી ત્રિશૂલેન તથા ચક્રેણ વૈષ્ણવી ।
દૈત્યાઞ્જઘાન કૌમારી તથા શક્ત્યાતિકોપના ॥ ૮.૩૪॥ ૐ ઐં પ્રૂં નમઃ ॥ ૩૪॥
ઐન્દ્રી કુલિશપાતેન શતશો દૈત્યદાનવાઃ ।
પેતુર્વિદારિતાઃ પૃથ્વ્યાં રુધિરૌઘપ્રવર્ષિણઃ ॥ ૮.૩૫॥ ૐ ઐં હ્રૂં (હ્રૂં) નમઃ ॥ ૩૫॥
તુણ્ડપ્રહારવિધ્વસ્તા દંષ્ટ્રાગ્રક્ષતવક્ષસઃ ।
વારાહમૂર્ત્યા ન્યપતંશ્ચક્રેણ ચ વિદારિતાઃ ॥ ૮.૩૬॥ ૐ ઐં ક્લૂં નમઃ ॥ ૩૬॥
નખૈર્વિદારિતાંશ્ચાન્યાન્ ભક્ષયન્તી મહાસુરાન્ ।
નારસિંહી ચચારાજૌ નાદાપૂર્ણદિગમ્બરા ॥ ૮.૩૭॥ ૐ ઐં તૌં નમઃ ॥ ૩૭॥
ચણ્ડાટ્ટહાસૈરસુરાઃ શિવદૂત્યભિદૂષિતાઃ ।
પેતુઃ પૃથિવ્યાં પતિતાંસ્તાંશ્ચખાદાથ સા તદા ॥ ૮.૩૮॥ ૐ ઐં મ્લૂં નમઃ ॥ ૩૮॥
ઇતિ માતૃગણં ક્રુદ્ધં મર્દયન્તં મહાસુરાન્ ।
દૃષ્ટ્વાભ્યુપાયૈર્વિવિધૈર્નેશુર્દેવારિસૈનિકાઃ ॥ ૮.૩૯॥ ૐ ઐં હં નમઃ ॥ ૩૯॥
પલાયનપરાન્દૃષ્ટ્વા દૈત્યાન્માતૃગણાર્દિતાન્ ।
યોદ્ધુમભ્યાયયૌ ક્રુદ્ધો રક્તબીજો મહાસુરઃ ॥ ૮.૪૦॥ ૐ ઐં સ્લૂં નમઃ ॥ ૪૦॥
રક્તબિન્દુર્યદા ભૂમૌ પતત્યસ્ય શરીરતઃ ।
સમુત્પતતિ મેદિન્યાં તત્પ્રમાણો મહાસુરઃ ॥ ૮.૪૧॥ ૐ ઐં ઔં નમઃ ॥ ૪૧॥
યુયુધે સ ગદાપાણિરિન્દ્રશક્ત્યા મહાસુરઃ ।
તતશ્ચૈન્દ્રી સ્વવજ્રેણ રક્તબીજમતાડયત્ ॥ ૮.૪૨॥ ૐ ઐં લ્હીં નમઃ ॥ ૪૨॥
કુલિશેનાહતસ્યાશુ બહુ સુસ્રાવ શોણિતમ્ ।
સમુત્તસ્થુસ્તતો યોધાસ્તદ્રૂપાસ્તત્પરાક્રમાઃ ॥ ૮.૪૩॥ ૐ ઐં શ્ચીં નમઃ ॥ ૪૩॥
યાવન્તઃ પતિતાસ્તસ્ય શરીરાદ્રક્તબિન્દવઃ ।

તાવન્તઃ પુરુષા જાતાસ્તદ્વીર્યબલવિક્રમાઃ ॥ ૮.૪૪॥ ૐ ઐં યાં નમઃ ॥ ૪૪॥
તે ચાપિ યુયુધુસ્તત્ર પુરુષા રક્તસમ્ભવાઃ ।
સમં માતૃભિરત્યુગ્રશસ્ત્રપાતાતિભીષણમ્ ॥ ૮.૪૫॥ ૐ ઐં થ્લીં નમઃ ॥ ૪૫॥
પુનશ્ચ વજ્રપાતેન ક્ષતમસ્ય શિરો યદા ।
વવાહ રક્તં પુરુષાસ્તતો જાતાઃ સહસ્રશઃ ॥ ૮.૪૬॥ ૐ ઐં લ્હીં નમઃ ॥ ૪૬॥
વૈષ્ણવી સમરે ચૈનં ચક્રેણાભિજઘાન હ ।
ગદયા તાડયામાસ ઐન્દ્રી તમસુરેશ્વરમ્ ॥ ૮.૪૭॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૪૭॥
વૈષ્ણવીચક્રભિન્નસ્ય રુધિરસ્રાવસમ્ભવૈઃ ।
સહસ્રશો જગદ્વ્યાપ્તં તત્પ્રમાણૈર્મહાસુરૈઃ ॥ ૮.૪૮॥ ૐ ઐં હ્રૌં નમઃ ॥ ૪૮॥
શક્ત્યા જઘાન કૌમારી વારાહી ચ તથાસિના ।
માહેશ્વરી ત્રિશૂલેન રક્તબીજં મહાસુરમ્ ॥ ૮.૪૯॥ ૐ ઐં પ્રાં નમઃ ॥ ૪૯॥
સ ચાપિ ગદયા દૈત્યઃ સર્વા એવાહનત્ પૃથક્ ।
માતૃઃ કોપસમાવિષ્ટો રક્તબીજો મહાસુરઃ ॥ ૮.૫૦॥ ૐ ઐં ક્રીં નમઃ ॥ ૫૦॥
તસ્યાહતસ્ય બહુધા શક્તિશૂલાદિભિર્ભુવિ ।
પપાત યો વૈ રક્તૌઘસ્તેનાસઞ્છતશોઽસુરાઃ ॥ ૮.૫૧॥ ૐ ઐં ક્લીં નમઃ ॥ ૫૧॥
તૈશ્ચાસુરાસૃક્સમ્ભૂતૈરસુરૈઃ સકલં જગત્ ।
વ્યાપ્તમાસીત્તતો દેવા ભયમાજગ્મુરુત્તમમ્ ॥ ૮.૫૨॥ ૐ ઐં ન્સ્લૂં નમઃ ॥ ૫૨॥
તાન્ વિષણ્ણાન્ સુરાન્ દૃષ્ટ્વા ચણ્ડિકા પ્રાહસત્વરમ્ ।
ઉવાચ કાલીં ચામુણ્ડે વિસ્તીર્ણં વદનં કુરુ ॥ ૮.૫૩॥ ૐ ઐં હીં નમઃ ॥ ૫૩॥
મચ્છસ્ત્રપાતસમ્ભૂતાન્ રક્તબિન્દૂન્ મહાસુરાન્ ।
રક્તબિન્દોઃ પ્રતીચ્છ ત્વં વક્ત્રેણાનેન વેગિના ॥ ૮.૫૪॥ ૐ ઐં શ્લૌં નમઃ ॥ ૫૪॥
ભક્ષયન્તી ચર રણે તદુત્પન્નાન્મહાસુરાન્ ।
એવમેષ ક્ષયં દૈત્યઃ ક્ષેણરક્તો ગમિષ્યતિ ॥ ૮.૫૫॥ ૐ ઐં હ્રૈં નમઃ ॥ ૫૫॥
ભક્ષ્યમાણાસ્ત્વયા ચોગ્રા ન ચોત્પત્સ્યન્તિ ચાપરે ।
ઇત્યુક્ત્વા તાં તતો દેવી શૂલેનાભિજઘાન તમ્ ॥ ૮.૫૬॥ ૐ ઐં ભ્રં નમઃ ॥ ૫૬॥
મુખેન કાલી જગૃહે રક્તબીજસ્ય શોણિતમ્ ।
તતોઽસાવાજઘાનાથ ગદયા તત્ર ચણ્ડિકામ્ ॥ ૮.૫૭॥ ૐ ઐં સૌં નમઃ ॥ ૫૭॥
ન ચાસ્યા વેદનાં ચક્રે ગદાપાતોઽલ્પિકામપિ ।
તસ્યાહતસ્ય દેહાત્તુ બહુ સુસ્રાવ શોણિતમ્ ॥ ૮.૫૮॥ ૐ ઐં શ્રીં નમઃ ॥ ૫૮॥
યતસ્તતસ્તદ્વક્ત્રેણ ચામુણ્ડા સમ્પ્રતીચ્છતિ ।
મુખે સમુદ્ગતા યેઽસ્યા રક્તપાતાન્મહાસુરાઃ ॥ ૮.૫૯॥ ૐ ઐં સૂં નમઃ ॥ ૫૯॥
તાંશ્ચખાદાથ ચામુણ્ડા પપૌ તસ્ય ચ શોણિતમ્ ।

દેવી શૂલેન વજ્રેણ બાણૈરસિભિરૃષ્ટિભિઃ ॥ ૮.૬૦॥ ૐ ઐં દ્રૌં નમઃ ॥ ૬૦॥
જઘાન રક્તબીજં તં ચામુણ્ડાપીતશોણિતમ્ ।
સ પપાત મહીપૃષ્ઠે શસ્ત્રસઙ્ઘસમાહતઃ ॥ ૮.૬૧॥ ૐ ઐં સ્સ્રાં નમઃ ॥ ૬૧॥
નીરક્તશ્ચ મહીપાલ રક્તબીજો મહાસુરઃ ।
તતસ્તે હર્ષમતુલમવાપુસ્ત્રિદશા નૃપ ॥ ૮.૬૨॥ ૐ ઐં હ્સ્લીં નમઃ ॥ ૬૨॥
તેષાં માતૃગણો જાતો નનર્તાસૃઙ્મદોદ્ધતઃ ॥ ૮.૬૩॥ ૐ ઐં સ્લ્ક્રીં નમઃ ॥ ૬૩॥
"ૐ શાં સં શ્રીં શ્રં અં અઃ ક્લીં હ્રીં ફટ્ સ્વાહા ॥ ૮॥"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
રક્તબીજવધો નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥
ઉવાચ ૧, અર્ધશ્લોકઃ ૧, શ્લોકાઃ ૬૧, એવમાદિતઃ ॥ ૫૦૨॥

## ॥ ૯. નિશુમ્ભવધો નામ નવમોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ બન્ધૂકકાઞ્ચનનિભં રુચિરાક્ષમાલાં
પાશાઙ્કુશૌ ચ વરદાં નિજબાહુદણ્ડૈઃ ।
બિભ્રાણમિન્દુશકલાભરણં ત્રિનેત્ર-
મર્ધામ્બિકેશમનિશં વપુરાશ્રયામિ ॥
ૐ રાજોવાચ ॥ ૯.૧॥ ૐ ઐં રૌં નમઃ ॥ ૧॥
વિચિત્રમિદમાખ્યાતં ભગવન્ ભવતા મમ ।
દેવ્યાશ્ચરિતમાહાત્મ્યં રક્તબીજવધાશ્રિતમ્ ॥ ૯.૨॥ ૐ ઐં ક્લીં નમઃ ॥ ૨॥
ભૂયશ્ચેચ્છામ્યહં શ્રોતું રક્તબીજે નિપાતિતે ।
ચકાર શુમ્ભો યત્કર્મ નિશુમ્ભશ્ચાતિકોપનઃ ॥ ૯.૩॥ ૐ ઐં મ્લૌં નમઃ ॥ ૩॥
ઋષિરુવાચ ॥ ૯.૪॥ ૐ ઐં શ્રૌં નમઃ ॥ ૪॥

ચકાર કોપમતુલં રક્તબીજે નિપાતિતે ।
શુમ્ભાસુરો નિશુમ્ભશ્ચ હતેષ્વન્યેષુ ચાહવે ॥ ૯.૫॥ ૐ ઐં ગ્લીં નમઃ ॥ ૫॥
હન્યમાનં મહાસૈન્યં વિલોક્યામર્ષમુદ્વહન્ ।
અભ્યધાવન્નિશુમ્ભોઽથ મુખ્યયાસુરસેનયા ॥ ૯.૬॥ ૐ ઐં હ્રૌં નમઃ ॥ ૬॥
તસ્યાગ્રતસ્તથા પૃષ્ઠે પાર્શ્વયોશ્ચ મહાસુરાઃ ।
સન્દષ્ટૌષ્ઠપુટાઃ ક્રુદ્ધા હન્તું દેવીમુપાયયુઃ ॥ ૯.૭॥ ૐ ઐં હ્સૌં નમઃ ॥ ૭॥
આજગામ મહાવીર્યઃ શુમ્ભોઽપિ સ્વબલૈર્વૃતઃ ।
નિહન્તું ચણ્ડિકાં કોપાત્કૃત્વા યુદ્ધં તુ માતૃભિઃ ॥ ૯.૮॥ ૐ ઐં ઈં નમઃ ॥ ૮॥
તતો યુદ્ધમતીવાસીદ્દેવ્યા શુમ્ભનિશુમ્ભયોઃ ।
શરવર્ષમતીવોગ્રં મેઘયોરિવ વર્ષતોઃ ॥ ૯.૯॥ ૐ ઐં વ્રૂં (બ્રૂં) નમઃ ॥ ૯॥
ચિચ્છેદાસ્તાઞ્છરાંસ્તાભ્યાં ચણ્ડિકા સ્વશરોત્કરૈઃ ।
તાડયામાસ ચાઙ્ગેષુ શસ્ત્રૌઘૈરસુરેશ્વરૌ ॥ ૯.૧૦॥ ૐ ઐં શ્રાં નમઃ ॥ ૧૦॥
નિશુમ્ભો નિશિતં ખડ્ગં ચર્મ ચાદાય સુપ્રભમ્ ।
અતાડયન્મૂર્ધ્નિ સિંહં દેવ્યા વાહનમુત્તમમ્ ॥ ૯.૧૧॥ ૐ ઐં લૂં નમઃ ॥ ૧૧॥
તાડિતે વાહને દેવી ક્ષુરપ્રેણાસિમુત્તમમ્ ।
નિશુમ્ભસ્યાશુ ચિચ્છેદ ચર્મ ચાપ્યષ્ટચન્દ્રકમ્ ॥ ૯.૧૨॥ ૐ ઐં આં નમઃ ॥ ૧૨॥
છિન્ને ચર્મણિ ખડ્ગે ચ શક્તિં ચિક્ષેપ સોઽસુરઃ ।
તામપ્યસ્ય દ્વિધા ચક્રે ચક્રેણાભિમુખાગતામ્ ॥ ૯.૧૩॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૩॥
કોપાધ્માતો નિશુમ્ભોઽથ શૂલં જગ્રાહ દાનવઃ ।
આયાતં મુષ્ટિપાતેન દેવી તચ્ચાપ્યચૂર્ણયત્ ॥ ૯.૧૪॥ ૐ ઐં ક્રૌં નમઃ ॥ ૧૪॥
આવિધ્યાથ ગદાં સોઽપિ ચિક્ષેપ ચણ્ડિકાં પ્રતિ ।
સાપિ દેવ્યાસ્ ત્રિશૂલેન ભિન્ના ભસ્મત્વમાગતા ॥ ૯.૧૫॥ ૐ ઐં પ્રૂં નમઃ ॥ ૧૫॥
તતઃ પરશુહસ્તં તમાયાન્તં દૈત્યપુઙ્ગવમ્ ।
આહત્ય દેવી બાણૌઘૈરપાતયત ભૂતલે ॥ ૯.૧૬॥ ૐ ઐં ક્લીં નમઃ ॥ ૧૬॥
તસ્મિન્નિપતિતે ભૂમૌ નિશુમ્ભે ભીમવિક્રમે ।
ભ્રાતર્યતીવ સઙ્ક્રુદ્ધઃ પ્રયયૌ હન્તુમમ્બિકામ્ ॥ ૯.૧૭॥ ૐ ઐં ભ્રં નમઃ ॥ ૧૭॥
સ રથસ્થસ્તથાત્યુચ્ચૈર્ગૃહીતપરમાયુધૈઃ ।
ભુજૈરષ્ટાભિરતુલૈર્વ્યાપ્યાશેષં બભૌ નભઃ ॥ ૯.૧૮॥ ૐ ઐં હ્રૌં નમઃ ॥ ૧૮॥
તમાયાન્તં સમાલોક્ય દેવી શઙ્ખમવાદયત્ ।
જ્યાશબ્દં ચાપિ ધનુષશ્ચકારાતીવ દુઃસહમ્ ॥ ૯.૧૯॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૯॥
પૂરયામાસ કકુભો નિજઘણ્ટાસ્વનેન ચ ।
સમસ્તદૈત્યસૈન્યાનાં તેજોવધવિધાયિના ॥ ૯.૨૦॥ ૐ ઐં મ્લીં નમઃ ॥ ૨૦॥

તતઃ સિંહો મહાનાદૈસ્ત્યાજિતેભમહામદૈઃ ।
પૂરયામાસ ગગનં ગાં તથૈવ દિશો દશ ॥ ૯.૨૧॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૨૧॥
તતઃ કાલી સમુત્પત્ય ગગનં ક્ષ્મામતાડયત્ ।
કરાભ્યાં તન્નિનાદેન પ્રાક્સ્વનાસ્તે તિરોહિતાઃ ॥ ૯.૨૨॥ ૐ ઐં હ્સૂં નમઃ ॥ ૨૨॥
અટ્ટાટ્ટહાસમશિવં શિવદૂતી ચકાર હ ।
વૈઃ શબ્દૈરસુરાસ્ત્રેસુઃ શુમ્ભઃ કોપં પરં યયૌ ॥ ૯.૨૩॥ ૐ ઐં લ્પીં નમઃ ॥ ૨૩॥
દુરાત્મંસ્તિષ્ઠ તિષ્ઠેતિ વ્યાજહારામ્બિકા યદા ।
તદા જયેત્યભિહિતં દેવૈરાકાશસંસ્થિતૈઃ ॥ ૯.૨૪॥ ૐ ઐં હ્રૌં નમઃ ॥ ૨૪॥
શુમ્ભેનાગત્ય યા શક્તિર્મુક્તા જ્વાલાતિભીષણા ।
આયાન્તી વહ્નિકૂટાભા સા નિરસ્તા મહોલ્કયા ॥ ૯.૨૫॥ ૐ ઐં હ્સ્રાં નમઃ ॥ ૨૫॥
સિંહનાદેન શુમ્ભસ્ય વ્યાપ્તં લોકત્રયાન્તરમ્ ।
નિર્ઘાતનિઃસ્વનો ઘોરો જિતવાનવનીપતે ॥ ૯.૨૬॥ ૐ ઐં સ્હૌં નમઃ ॥ ૨૬॥
શુમ્ભમુક્તાઞ્છરાન્દેવી શુમ્ભસ્તત્પ્રહિતાઞ્છરાન્ ।
ચિચ્છેદ સ્વશરૈરુગ્રૈઃ શતશોઽથ સહસ્રશઃ ॥ ૯.૨૭॥ ૐ ઐં લ્લૂં નમઃ ॥ ૨૭॥
તતઃ સા ચણ્ડિકા ક્રુદ્ધા શૂલેનાભિજઘાન તમ્ ।
સ તદાભિહતો ભૂમૌ મૂર્ચ્છિતો નિપપાત હ ॥ ૯.૨૮॥ ૐ ઐં ક્સ્લીં નમઃ ॥ ૨૮॥
તતો નિશુમ્ભઃ સમ્પ્રાપ્ય ચેતનામાત્તકાર્મુકઃ ।
આજઘાન શરૈર્દેવીં કાલીં કેસરિણં તથા ॥ ૯.૨૯॥ ૐ ઐં શ્રીં નમઃ ॥ ૨૯॥
પુનશ્ચ કૃત્વા બાહૂનામયુતં દનુજેશ્વરઃ ।
ચક્રાયુધેન દિતિજશ્છાદયામાસ ચણ્ડિકામ્ ॥ ૯.૩૦॥ ૐ ઐં સ્તૂં નમઃ ॥ ૩૦॥
તતો ભગવતી ક્રુદ્ધા દુર્ગા દુર્ગાર્તિનાશિની ।
ચિચ્છેદ દેવી ચક્રાણિ સ્વશરૈઃ સાયકાંશ્ચ તાન્ ॥ ૯.૩૧॥ ૐ ઐં ચ્રેં નમઃ ॥ ૩૧॥
તતો નિશુમ્ભો વેગેન ગદામાદાય ચણ્ડિકામ્ ।
અભ્યધાવત વૈ હન્તું દૈત્યસૈન્યસમાવૃતઃ ॥ ૯.૩૨॥ ૐ ઐં વીં નમઃ ॥ ૩૨॥
તસ્યાપતત એવાશુ ગદાં ચિચ્છેદ ચણ્ડિકા ।
ખડ્ગેન શિતધારેણ સ ચ શૂલં સમાદદે ॥ ૯.૩૩॥ ૐ ઐં ક્ષ્લૂં નમઃ ॥ ૩૩॥
શૂલહસ્તં સમાયાન્તં નિશુમ્ભમમરાર્દનમ્ ।
હૃદિ વિવ્યાધ શૂલેન વેગાવિદ્ધેન ચણ્ડિકા ॥ ૯.૩૪॥ ૐ ઐં શ્લૂં નમઃ ॥ ૩૪॥
ભિન્નસ્ય તસ્ય શૂલેન હૃદયાન્નિઃસૃતોઽપરઃ ।
મહાબલો મહાવીર્યસ્તિષ્ઠેતિ પુરુષો વદન્ ॥ ૯.૩૫॥ ૐ ઐં ક્રૂં નમઃ ॥ ૩૫॥
તસ્ય નિષ્ક્રામતો દેવી પ્રહસ્ય સ્વનવત્તતઃ ।
શિરશ્ચિચ્છેદ ખડ્ગેન તતોઽસાવપતદ્ભુવિ ॥ ૯.૩૬॥ ૐ ઐં ક્રાં નમઃ ॥ ૩૬॥

તતઃ સિંહશ્ચખાદોગ્રદંષ્ટ્રાક્ષુણ્ણશિરોધરાન્ ।
અસુરાંસ્તાંસ્તથા કાલી શિવદૂતી તથાપરાન્ ॥ ૯.૩૭॥ ૐ ઐં હ્રૌં નમઃ ॥ ૩૭॥
કૌમારીશક્તિનિર્ભિન્નાઃ કેચિન્નેશુર્મહાસુરાઃ ।
બ્રહ્માણીમન્ત્રપૂતેન તોયેનાન્યે નિરાકૃતાઃ ॥ ૯.૩૮॥ ૐ ઐં ક્રાં નમઃ ॥ ૩૮॥
માહેશ્વરીત્રિશૂલેન ભિન્નાઃ પેતુસ્તથાપરે ।
વારાહીતુણ્ડઘાતેન કેચિચ્ચૂર્ણીકૃતા ભુવિ ॥ ૯.૩૯॥ ૐ ઐં સ્ક્ષ્લીં નમઃ ॥ ૩૯॥
ખણ્ડં ખણ્ડં ચ ચક્રેણ વૈષ્ણવ્યા દાનવાઃ કૃતાઃ ।
વજ્રેણ ચૈન્દ્રીહસ્તાગ્રવિમુક્તેન તથાપરે ॥ ૯.૪૦॥ ૐ ઐં સૂં નમઃ ॥ ૪૦॥
કેચિદ્વિનેશુરસુરાઃ કેચિન્નષ્ટા મહાહવાત્ ।
ભક્ષિતાશ્ચાપરે કાલીશિવદૂતીમૃગાધિપૈઃ ॥ ૯.૪૧॥ ૐ ઐં ક્રૂં નમઃ ॥ ૪૧॥
“ૐ ઐં હ્રીં શ્રીં સૌં ફટ્ સ્વાહા ॥ ૯॥”
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
નિશુમ્ભવધો નામ નવમોઽધ્યાયઃ ॥ ૯॥
ઉવાચ ૨, અર્ધશ્લોકાઃ ૩૯, શ્લોકાઃ ૪૧, એવમાદિતઃ ॥ ૫૪૩॥

## ॥ ૧૦. શુમ્ભવધો નામ દશમોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ ઉત્તપ્તહેમરુચિરાં રવિચન્દ્રવહ્નિ-
નેત્રાં ધનુશ્શરયુતાઙ્કુશપાશશૂલમ્ ।
રમ્યૈર્ભુજૈશ્ચ દધતીં શિવશક્તિરૂપાં
કામેશ્વરીં હૃદિ ભજામિ ધૃતેન્દુલેખામ્ ॥
ૐ ઋષિરુવાચ ॥ ૧૦.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
નિશુમ્ભં નિહતં દૃષ્ટ્વા ભ્રાતરં પ્રાણસમ્મિતમ્ ।

હન્યમાનં બલં ચૈવ શુમ્ભઃ ક્રુદ્ધોઽબ્રવીદ્વચઃ ॥ ૧૦.૨॥ ૐ ઐં હ્રીં નમઃ ॥ ૨॥
બલાવલેપદુષ્ટે ત્વં મા દુર્ગે ગર્વમાવહ ।
અન્યાસાં બલમાશ્રિત્ય યુદ્ધ્યસે ચાતિમાનિની ॥ ૧૦.૩॥ ૐ ઐં બ્લૂં નમઃ ॥ ૩॥
દેવ્યુવાચ ॥ ૧૦.૪॥ ૐ ઐં હ્રીં નમઃ ॥ ૪॥
એકૈવાહં જગત્યત્ર દ્વિતીયા કા મમાપરા ।
પશ્યૈતા દુષ્ટ મય્યેવ વિશન્ત્યો મદ્વિભૂતયઃ ॥ ૧૦.૫॥ ૐ ઐં મ્લૂં નમઃ ॥ ૫॥
તતઃ સમસ્તાસ્તા દેવ્યો બ્રહ્માણીપ્રમુખા લયમ્ ।
તસ્યા દેવ્યાસ્તનૌ જગ્મુરેકૈવાસીત્તદામ્બિકા ॥ ૧૦.૬॥ ૐ ઐં શ્રૌં નમઃ ॥ ૬॥
દેવ્યુવાચ ॥ ૧૦.૭॥ ૐ ઐં હ્રીં નમઃ ॥ ૭॥
અહં વિભૂત્યા બહુભિરિહ રૂપૈર્યદાસ્થિતા ।
તત્સંહૃતં મયૈકૈવ તિષ્ઠામ્યાજૌ સ્થિરો ભવ ॥ ૧૦.૮॥ ૐ ઐં ગ્લીં નમઃ ॥ ૮॥
ઋષિરુવાચ ॥ ૧૦.૯॥ ૐ ઐં શ્રૌં નમઃ ॥ ૯॥
તતઃ પ્રવવૃતે યુદ્ધં દેવ્યાઃ શુમ્ભસ્ય ચોભયોઃ ।
પશ્યતાં સર્વદેવાનામસુરાણાં ચ દારુણમ્ ॥ ૧૦.૧૦॥ ૐ ઐં ધ્રૂં નમઃ ॥ ૧૦॥
શરવર્ષૈઃ શિતૈઃ શસ્ત્રૈસ્તથા ચાસ્ત્રૈઃ સુદારુણૈઃ ।
તયોર્યુદ્ધમભૂદ્ભૂયઃ સર્વલોકભયઙ્કરમ્ ॥ ૧૦.૧૧॥ ૐ ઐં હું નમઃ ॥ ૧૧॥
દિવ્યાન્યસ્ત્રાણિ શતશો મુમુચે યાન્યથામ્બિકા ।
બભઞ્જ તાનિ દૈત્યેન્દ્રસ્તત્પ્રતીઘાતકર્તૃભિઃ ॥ ૧૦.૧૨॥ ૐ ઐં દ્રૌં નમઃ ॥ ૧૨॥
મુક્તાનિ તેન ચાસ્ત્રાણિ દિવ્યાનિ પરમેશ્વરી ।
બભઞ્જ લીલયૈવોગ્રહુઙ્કારોચ્ચારણાદિભિઃ ॥ ૧૦.૧૩॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૩॥
તતઃ શરશતૈર્દેવીમાચ્છાદયત સોઽસુરઃ ।
સાપિ તત્કુપિતા દેવી ધનુશ્ચિચ્છેદ ચેષુભિઃ ॥ ૧૦.૧૪॥ ૐ ઐં ત્રૂં (શ્રૂં) નમઃ ॥ ૧૪॥
છિન્ને ધનુષિ દૈત્યેન્દ્રસ્તથા શક્તિમથાદદે ।
ચિચ્છેદ દેવી ચક્રેણ તામપ્યસ્ય કરે સ્થિતામ્ ॥ ૧૦.૧૫॥ ૐ ઐ વ્રૂં (બ્રૂં) નમઃ ॥ ૧૫॥
તતઃ ખડ્ગમુપાદાય શતચન્દ્રં ચ ભાનુમત્ ।
અભ્યધા વત તાં દેવીં દૈત્યાનામધિપેશ્વરઃ ॥ ૧૦.૧૬॥ ૐ ઐં ક્રૂં નમઃ ॥ ૧૬॥
તસ્યાપતત એવાશુ ખડ્ગં ચિચ્છેદ ચણ્ડિકા ।
ધનુર્મુક્તૈઃ શિતૈર્બાણૈશ્ચર્મ ચાર્કકરામલમ્ ।
અશ્વાંશ્ચ પાતયામાસ રથં સારથિના સહ ॥ ( missing line and not taken in count below) ૧૦.૧૭॥ ૐ ઐં હ્રાં નમઃ ॥ ૧૭॥
હતાશ્વઃ સ તદા દૈત્યશ્છિન્નધન્વા વિસારથિઃ ।
જગ્રાહ મુદ્ગરં ઘોરમમ્બિકાનિધનોદ્યતઃ ॥ ૧૦.૧૮॥ ૐ ઐં જું નમઃ ॥ ૧૮॥

ચિચ્છેદાપતતસ્તસ્ય મુદ્ગરં નિશિતૈઃ શરૈઃ ।
તથાપિ સોઽભ્યધાવત્તાં મુષ્ટિમુદ્યમ્ય વેગવાન્ ॥ ૧૦.૧૯॥ ૐ ઐં સ્રૌં નમઃ ॥ ૧૯॥
સ મુષ્ટિં પાતયામાસ હૃદયે દૈત્યપુઙ્ગવઃ ।
દેવ્યાસ્તં ચાપિ સા દેવી તલેનોરસ્યતાડયત્ ॥ ૧૦.૨૦॥ ૐ ઐં સ્લૂં નમઃ ॥ ૨૦॥
તલપ્રહારાભિહતો નિપપાત મહીતલે ।
સ દૈત્યરાજઃ સહસા પુનરેવ તથોત્થિતઃ ॥ ૧૦.૨૧॥ ૐ ઐં પ્રેં નમઃ ॥ ૨૧॥
ઉત્પત્ય ચ પ્રગૃહ્યોચ્ચૈર્દેવીં ગગનમાસ્થિતઃ ।
તત્રાપિ સા નિરાધારા યુયુધે તેન ચણ્ડિકા ॥ ૧૦.૨૨॥ ૐ ઐં હ્સ્વાં નમઃ ॥ ૨૨॥
નિયુદ્ધં ખે તદા દૈત્યશ્ચણ્ડિકા ચ પરસ્પરમ્ ।
ચક્રતુઃ પ્રથમં સિદ્ધમુનિવિસ્મયકારકમ્ ॥ ૧૦.૨૩॥ ૐ ઐં પ્રીં નમઃ ॥ ૨૩॥
તતો નિયુદ્ધં સુચિરં કૃત્વા તેનામ્બિકા સહ ।
ઉત્પાટ્ય ભ્રામયામાસ ચિક્ષેપ ધરણીતલે ॥ (ઉત્પાત્ય) ૧૦.૨૪॥ ૐ ઐં ફ્રાં નમઃ ॥ ૨૪॥
સ ક્ષિપ્તો ધરણીં પ્રાપ્ય મુષ્ટિમુદ્યમ્ય વેગવાન્ ।
અભ્યધાવત દુષ્ટાત્મા ચણ્ડિકાનિધનેચ્છયા ॥ ૧૦.૨૫॥ ૐ ઐં ક્રીં નમઃ ॥ ૨૫॥
તમાયાન્તં તતો દેવી સર્વદૈત્યજનેશ્વરમ્ ।
જગત્યાં પાતયામાસ ભિત્ત્વા શૂલેન વક્ષસિ ॥ ૧૦.૨૬॥ ૐ ઐં શ્રીં નમઃ ॥ ૨૬॥
સ ગતાસુઃ પપાતોર્વ્યાં દેવી શૂલાગ્રવિક્ષતઃ ।
ચાલયન્ સકલાં પૃથ્વીં સાબ્ધિદ્વીપાં સપર્વતામ્ ॥ ૧૦.૨૭॥ ૐ ઐં ક્રાં નમઃ ॥ ૨૭॥
તતઃ પ્રસન્નમખિલં હતે તસ્મિન્ દુરાત્મનિ ।
જગત્સ્વાસ્થ્યમતીવાપ નિર્મલં ચાભવન્નભઃ ॥ ૧૦.૨૮॥ ૐ ઐં સઃ નમઃ ॥ ૨૮॥
ઉત્પાતમેઘાઃ સોલ્કા યે પ્રાગાસંસ્તે શમં યયુઃ ।
સરિતો માર્ગવાહિન્યસ્તથાસંસ્તત્ર પાતિતે ॥ ૧૦.૨૯॥ ૐ ઐં ક્લીં નમઃ ॥ ૨૯॥
તતો દેવગણાઃ સર્વે હર્ષનિર્ભરમાનસાઃ ।
બભૂવુર્નિહતે તસ્મિન્ ગન્ધર્વા લલિતં જગુઃ ॥ ૧૦.૩૦॥ ૐ ઐં વ્રેં નમઃ ॥ ૩૦॥
અવાદયંસ્તથૈવાન્યે નનૃતુશ્ચાપ્સરોગણાઃ ।
વવુઃ પુણ્યાસ્તથા વાતાઃ સુપ્રભોઽભૂદ્દિવાકરઃ ॥ ૧૦.૩૧॥ ૐ ઐં ઇં નમઃ ॥ ૩૧॥
જજ્વલુશ્ચાગ્નયઃ શાન્તાઃ શાન્તા દિગ્જનિતસ્વનાઃ ॥ ૧૦.૩૨॥ ૐ ઐં જ્સ્હ્રૂં નમઃ ॥ ૩૨॥ (var includes both ૐ ઐં જ્સ્હ્રૂં નમઃ । ૐ ઐં ગ્સ્હ્રીં નમઃ) ॥ ૩૩॥
"ૐ ઐં હ્રીં નમઃ ક્લીં હ્રીં ફટ્ સ્વાહા ॥ ૧૦॥ (ૐ ઐં હ્રીં નમઃ ક્લીં હ્લીં ફટ્ સ્વાહા)"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।

સસસ્ત્યશ્ચકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે
દેવીમાહાત્મ્યે શુમ્ભવધો નામ દશમોઽધ્યાયઃ ॥ ૧૦॥
ઉવાચ ૪, અર્ધશ્લોકઃ ૧, શ્લોકાઃ ૨૭, એવમાદિતઃ ॥ ૫૭૫॥

## ॥ નારાયણીસ્તુતિર્નામૈકાદશોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ બાલરવિદ્યુતિમિન્દુકિરીટાં તુઙ્ગકુચાં નયનત્રયયુક્તામ્ ।
સ્મેરમુખીં વરદાઙ્કુશપાશાભીતિકરાં પ્રભજે ભુવનેશીમ્ ॥
ૐ ઋષિરુવાચ ॥ ૧૧.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
દેવ્યા હતે તત્ર મહાસુરેન્દ્રે
સેન્દ્રાઃ સુરા વહ્નિપુરોગમાસ્તામ્ ।
કાત્યાયનીં તુષ્ટુવુરિષ્ટલાભાદ્
વિકાશિવક્ત્રાબ્જવિકાશિતાશાઃ ॥ ૧૧.૨॥ ૐ ઐં કૂં નમઃ ॥ ૨॥
દેવિ પ્રપન્નાર્તિહરે પ્રસીદ
પ્રસીદ માતર્જગતોઽખિલસ્ય ।
પ્રસીદ વિશ્વેશ્વરિ પાહિ વિશ્વં
ત્વમીશ્વરી દેવિ ચરાચરસ્ય ॥ ૧૧.૩॥ ૐ ઐં શ્રીં નમઃ ॥ ૩॥
આધારભૂતા જગતસ્ત્વમેકા
મહીસ્વરૂપેણ યતઃ સ્થિતાસિ ।
અપાં સ્વરૂપસ્થિતયા ત્વયૈત-
દાપ્યાયતે કૃત્સ્નમલઙ્ઘ્યવીર્યે ॥ ૧૧.૪॥ ૐ ઐં લ્લીં નમઃ ॥ ૪॥
ત્વં વૈષ્ણવીશક્તિરનન્તવીર્યા
વિશ્વસ્ય બીજં પરમાસિ માયા ।
સમ્મોહિતં દેવિ સમસ્તમેતત્
ત્વં વૈ પ્રસન્ના ભુવિ મુક્તિહેતુઃ ॥ ૧૧.૫॥ ૐ ઐં પ્રેં નમઃ ॥ ૫॥

વિદ્યાઃ સમસ્તાસ્તવ દેવિ ભેદાઃ
સ્ત્રિયઃ સમસ્તાઃ સકલા જગત્સુ ।
ત્વયૈકયા પૂરિતમમ્બયૈતત્
કા તે સ્તુતિઃ સ્તવ્યપરાપરોક્તિઃ ॥ ૧૧.૬॥ ૐ ઐં સૌં નમઃ ॥ ૬॥
સર્વભૂતા યદા દેવી ભુક્તિમુક્તિપ્રદાયિની ।
ત્વં સ્તુતા સ્તુતયે કા વા ભવન્તુ પરમોક્તયઃ ॥ ૧૧.૭॥ ૐ ઐં સ્હૌં નમઃ ॥ ૭॥
સર્વસ્ય બુદ્ધિરૂપેણ જનસ્ય હૃદિ સંસ્થિતે ।
સ્વર્ગાપવર્ગદે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૮॥ ૐ ઐં શ્રૂં નમઃ ॥ ૮॥
કલાકાષ્ઠાદિરૂપેણ પરિણામપ્રદાયિનિ ।
વિશ્વસ્યોપરતૌ શક્તે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૯॥ ૐ ઐં ક્લીં નમઃ ॥ ૯॥
સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૦॥ ૐ ઐં સ્ક્લીં નમઃ ॥ ૧૦॥
સૃષ્ટિસ્થિતિવિનાશાનાં શક્તિભૂતે સનાતનિ ।
ગુણાશ્રયે ગુણમયે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૧॥ ૐ ઐં પ્રીં નમઃ ॥ ૧૧॥
શરણાગતદીનાર્તપરિત્રાણપરાયણે ।
સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૨॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૧૨॥
હંસયુક્તવિમાનસ્થે બ્રહ્માણીરૂપધારિણિ ।
કૌશામ્ભઃક્ષરિકે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૩॥ ૐ ઐં હ્સ્હ્રીં (' ', હ્હ્રીં) નમઃ ॥ ૧૩॥
ત્રિશૂલચન્દ્રાહિધરે મહાવૃષભવાહિનિ ।
માહેશ્વરીસ્વરૂપેણ નારાયણિ નમોઽસ્તુતે ॥ ૧૧.૧૪॥ ૐ ઐં સ્તૌં નમઃ ॥ ૧૪॥
મયૂરકુક્કુટવૃતે મહાશક્તિધરેઽનઘે ।
કૌમારીરૂપસંસ્થાને નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૫॥ ૐ ઐં ક્લીં નમઃ ॥ ૧૫॥
શઙ્ખચક્રગદાશાર્ઙ્ગગૃહીતપરમાયુધે ।
પ્રસીદ વૈષ્ણવીરૂપે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૬॥ ૐ ઐં મ્લીં નમઃ ॥ ૧૬॥
ગૃહીતોગ્રમહાચક્રે દંષ્ટ્રોદ્ધૃતવસુન્ધરે ।
વરાહરૂપિણિ શિવે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૭॥ ૐ ઐં સ્તૂં નમઃ ॥ ૧૭॥
નૃસિંહરૂપેણોગ્રેણ હન્તું દૈત્યાન્ કૃતોદ્યમે ।
ત્રૈલોક્યત્રાણસહિતે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૮॥ ૐ ઐં જસ્હ્રીં (જસ્હ્રીં) નમઃ ॥ ૧૮॥
કિરીટિનિ મહાવજ્રે સહસ્રનયનોજ્જ્વલે ।
વૃત્રપ્રાણહરે ચૈન્દ્રિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૧૯॥ ૐ ઐં ક્રૂં નમઃ ॥ ૧૯॥
શિવદૂતીસ્વરૂપેણ હતદૈત્યમહાબલે ।
ઘોરરૂપે મહારાવે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૨૦॥ ૐ ઐં ક્રૂં નમઃ ॥ ૨૦॥

દંષ્ટ્રાકરાલવદને શિરોમાલાવિભૂષણે ।
ચામુણ્ડે મુણ્ડમથને નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૨૧॥ ૐ ઐં હ્રીં નમઃ ॥ ૨૧॥
લક્ષ્મિ લજ્જે મહાવિદ્યે શ્રદ્ધે પુષ્ટિ સ્વધે ધ્રુવે ।
મહારાત્રિ મહામાયે નારાયણિ નમોઽસ્તુ તે ॥ ૧૧.૨૨॥ ૐ ઐં લ્લૂં નમઃ ॥ ૨૨॥
મેધે સરસ્વતિ વરે ભૂતિ બાભ્રવિ તામસિ ।
નિયતે ત્વં પ્રસીદેશે નારાયણિ નમોઽસ્તુતે ॥ ૧૧.૨૩॥ ૐ ઐં ક્ષ્રીં નમઃ ॥ ૨૩॥
સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે ॥ ૧૧.૨૪॥ ૐ ઐં શ્રૂં નમઃ ॥ ૨૪॥
એતત્તે વદનં સૌમ્યં લોચનત્રયભૂષિતમ્ ।
પાતુ નઃ સર્વભૂતેભ્યઃ કાત્યાયનિ નમોઽસ્તુ તે ॥ ૧૧.૨૫॥ ૐ ઐં ઇં નમઃ ॥ ૨૫॥
જ્વાલાકરાલમત્યુગ્રમશેષાસુરસૂદનમ્ ।
ત્રિશૂલં પાતુ નો ભીતેર્ભદ્રકાલિ નમોઽસ્તુ તે ॥ ૧૧.૨૬॥ ૐ ઐં જું નમઃ ॥ ૨૬॥
હિનસ્તિ દૈત્યતેજાંસિ સ્વનેનાપૂર્ય યા જગત્ ।
સા ઘણ્ટા પાતુ નો દેવિ પાપેભ્યો નઃ સુતાનિવ ॥ ૧૧.૨૭॥ ૐ ઐં ત્રૈં નમઃ ॥ ૨૭॥
અસુરાસૃગ્વસાપઙ્કચર્ચિતસ્તે કરોજ્જ્વલઃ ।
શુભાય ખડ્ગો ભવતુ ચણ્ડિકે ત્વાં નતા વયમ્ ॥ ૧૧.૨૮॥ ૐ ઐં દ્રૂં નમઃ ॥ ૨૮॥
રોગાનશેષાનપહંસિ તુષ્ટા
રુષ્ટા તુ કામાન્ સકલાનભીષ્ટાન્ ।
ત્વામાશ્રિતાનાં ન વિપન્નરાણાં
ત્વામાશ્રિતા હ્યાશ્રયતાં પ્રયાન્તિ ॥ ૧૧.૨૯॥ ૐ ઐં હ્રૌં નમઃ ॥ ૨૯॥
એતત્કૃતં યત્કદનં ત્વયાદ્ય
ધર્મદ્વિષાં દેવિ મહાસુરાણામ્ ।
રૂપૈરનેકૈર્બહુધાત્મમૂર્તિં
કૃત્વામ્બિકે તત્પ્રકરોતિ કાન્યા ॥ ૧૧.૩૦॥ ૐ ઐં ક્લીં નમઃ ॥ ૩૦॥
વિદ્યાસુ શાસ્ત્રેષુ વિવેકદીપે-
ષ્વાદ્યેષુ વાક્યેષુ ચ કા ત્વદન્યા ।
મમત્વગર્તેઽતિમહાન્ધકારે
વિભ્રામયત્યેતદતીવ વિશ્વમ્ ॥ ૧૧.૩૧॥ ૐ ઐં સૂં નમઃ ॥ ૩૧॥
રક્ષાંસિ યત્રોગ્રવિષાશ્ચ નાગા
યત્રારયો દસ્યુબલાનિ યત્ર ।
દાવાનલો યત્ર તથાબ્ધિમધ્યે
તત્ર સ્થિતા ત્વં પરિપાસિ વિશ્વમ્ ॥ ૧૧.૩૨॥ ૐ ઐં હૌં નમઃ ॥ ૩૨॥

વિશ્વેશ્વરિ ત્વં પરિપાસિ વિશ્વં
વિશ્વાત્મિકા ધારયસીહ વિશ્વમ્ ।
વિશ્વેશવન્દ્યા ભવતી ભવન્તિ
વિશ્વાશ્રયા યે ત્વયિ ભક્તિનમ્રાઃ ॥ ૧૧.૩૩॥ ૐ ઐં મ્વ્રં (શ્વ્રં) નમઃ ॥ ૩૩॥
દેવિ પ્રસીદ પરિપાલય નોऽરિભીતે-
ર્નિત્યં યથાસુરવધાદધુનૈવ સદ્યઃ ।
પાપાનિ સર્વજગતાં પ્રશમં નયાશુ
ઉત્પાતપાકજનિતાંશ્ચ મહોપસર્ગાન્ ॥ ૧૧.૩૪॥ ૐ ઐં વ્રૂં નમઃ ॥ ૩૪॥
પ્રણતાનાં પ્રસીદ ત્વં દેવિ વિશ્વાર્તિહારિણિ ।
ત્રૈલોક્યવાસિનામીડ્યે લોકાનાં વરદા ભવ ॥ ૧૧.૩૫॥ ૐ ઐં ફ્રાં નમઃ ॥ ૩૫॥
દેવ્યુવાચ ॥ ૧૧.૩૬॥ ૐ ઐં હ્રીં નમઃ ॥ ૩૬॥
વરદાહં સુરગણા વરં યન્મનસેચ્છથ ।
તં વૃણુધ્વં પ્રયચ્છામિ જગતામુપકારકમ્ ॥ ૧૧.૩૭॥ ૐ ઐં લં નમઃ ॥ ૩૭॥
દેવા ઊચુઃ ॥ ૧૧.૩૮॥ ૐ ઐં હ્ સૌં (હ્સાં) નમઃ ॥ ૩૮॥
સર્વાબાધાપ્રશમનં ત્રૈલોક્યસ્યાખિલેશ્વરિ ।
એવમેવ ત્વયા કાર્યમસ્મદ્વૈરિવિનાશનમ્ ॥ ૧૧.૩૯॥ ૐ ઐં સેં નમઃ ॥ ૩૯॥
દેવ્યુવાચ ॥ ૧૧.૪૦॥ ૐ ઐં હ્રીં નમઃ ॥ ૪૦॥
વૈવસ્વતેऽન્તરે પ્રાપ્તે અષ્ટાવિંશતિમે યુગે ।
શુમ્ભો નિશુમ્ભશ્ચૈવાન્યાવુત્પત્સ્યેતે મહાસુરૌ ॥ ૧૧.૪૧॥ ૐ ઐં હ્રૌં નમઃ ॥ ૪૧॥
નન્દગોપગૃહે જાતા યશોદાગર્ભસમ્ભવા ।
તતસ્તૌ નાશયિષ્યામિ વિન્ધ્યાચલનિવાસિની ॥ ૧૧.૪૨॥ ૐ ઐં વિં નમઃ ॥ ૪૨॥
પુનરપ્યતિરૌદ્રેણ રૂપેણ પૃથિવીતલે ।
અવતીર્ય હનિષ્યામિ વૈપ્રચિત્તાંશ્ચ દાનવાન્ ॥ ૧૧.૪૩॥ ૐ ઐં પ્લીં નમઃ ॥ ૪૩॥
ભક્ષયન્ત્યાશ્ચ તાનુગ્રાન્ વૈપ્રચિત્તાન્ મહાસુરાન્ ।
રક્તા દન્તા ભવિષ્યન્તિ દાડિમીકુસુમોપમાઃ ॥ ૧૧.૪૪॥ ૐ ઐં ક્ષ્મ્ક્લીં નમઃ ॥ ૪૪॥
તતો માં દેવતાઃ સ્વર્ગે મર્ત્યલોકે ચ માનવાઃ ।
સ્તુવન્તો વ્યાહરિષ્યન્તિ સતતં રક્તદન્તિકામ્ ॥ ૧૧.૪૫॥ ૐ ઐં ત્સ્રાં નમઃ ॥ ૪૫॥
ભૂયશ્ચ શતવાર્ષિક્યામનાવૃષ્ટ્યામનમ્ભસિ ।
મુનિભિઃ સંસ્મૃતા ભૂમૌ સમ્ભવિષ્યામ્યયોનિજા ॥ ૧૧.૪૬॥ ૐ ઐં પ્રં નમઃ ॥ ૪૬॥
તતઃ શતેન નેત્રાણાં નિરીક્ષિષ્યામ્યહં મુનીન્ ।
કીર્તયિષ્યન્તિ મનુજાઃ શતાક્ષીમિતિ માં તતઃ ॥ ૧૧.૪૭॥ ૐ ઐં મ્લીં નમઃ ॥ ૪૭॥
તતોऽહમખિલં લોકમાત્મદેહસમુદ્ભવૈઃ ।

ભરિષ્યામિ સુરાઃ શાકૈરાવૃષ્ટેઃ પ્રાણધારકૈઃ ॥ ૧૧.૪૮॥ ૐ ઐં સ્રૂં નમઃ ॥ ૪૮॥
શાકમ્ભરીતિ વિખ્યાતિં તદા યાસ્યામ્યહં ભુવિ ।
તત્રૈવ ચ વધિષ્યામિ દુર્ગમાખ્યં મહાસુરમ્ ॥ ૧૧.૪૯॥ ૐ ઐં ક્ષ્માં નમઃ ॥ ૪૯॥
દુર્ગાદેવીતિ વિખ્યાતં તન્મે નામ ભવિષ્યતિ ।
પુનશ્ચાહં યદા ભીમં રૂપં કૃત્વા હિમાચલે ॥ ૧૧.૫૦॥ ૐ ઐં સ્તૂં નમઃ ॥ ૫૦॥
રક્ષાંસિ ભક્ષયિષ્યામિ મુનીનાં ત્રાણકારણાત્ ।
તદા માં મુનયઃ સર્વે સ્તોષ્યન્ત્યાનમ્રમૂર્તયઃ ॥ ૧૧.૫૧॥ ૐ ઐં સ્હ્રીં નમઃ ॥ ૫૧॥
ભીમાદેવીતિ વિખ્યાતં તન્મે નામ ભવિષ્યતિ ।
યદારુણાખ્યસ્ત્રૈલોક્યે મહાબાધાં કરિષ્યતિ ॥ ૧૧.૫૨॥ ૐ ઐં થ્રીં નમઃ ॥ ૫૨॥
તદાહં ભ્રામરં રૂપં કૃત્વાસઙ્ખ્યેયષટ્પદમ્ ।
ત્રૈલોક્યસ્ય હિતાર્થાય વધિષ્યામિ મહાસુરમ્ ॥ ૧૧.૫૩॥ ૐ ઐં ક્રૌં નમઃ ॥ ૫૩॥
ભ્રામરીતિ ચ માં લોકાસ્તદા સ્તોષ્યન્તિ સર્વતઃ ।
ઇત્થં યદા યદા બાધા દાનવોત્થા ભવિષ્યતિ ॥ ૧૧.૫૪॥ ૐ ઐં શ્રાં નમઃ ॥ ૫૪॥
તદા તદાવતીર્યાહં કરિષ્યામ્યરિસઙ્ક્ષયમ્ ॥ ૧૧.૫૫॥ ૐ ઐં મ્લીં નમઃ ॥ ૫૫॥
"ૐ ઐં હ્રીં ક્લીં શ્રીં સૌં નમઃ ફટ્ સ્વાહા ॥ ૧૧॥ (ૐ હ્રીં ક્લીં શ્રીં સૌં નમઃ ફટ્ સ્વાહા)"
(હવનમંત્ર)

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
નારાયણીસ્તુતિર્નામૈકાદશોઽધ્યાયઃ ॥ ૧૧॥
ઉવાચ ૪, અર્ધશ્લોકઃ ૧, શ્લોકાઃ ૫૦, એવમાદિતઃ ॥ ૬૩૦॥

## ॥ ૧૨. ભગવતી વાક્યં દ્વાદશોઽધ્યાયઃ ॥

ધ્યાનમ્ ।
ૐ વિદ્યુદ્દામસમપ્રભાં મૃગપતિસ્કન્ધસ્થિતાં ભીષણાં
કન્યાભિઃ કરવાલખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ।

હસ્તૈશ્ચક્રગદાસિખેટવિશિખાંશ્ચાપં ગુણં તર્જનીં
વિભ્રાણામનલાત્મિકાં શશિધરાં દુર્ગાં ત્રિનેત્રાં ભજે ॥
ॐ દેવ્યુવાચ ॥ ૧૨.૧॥ ॐ ઐં હ્રીં નમઃ ॥ ૧॥
એભિઃ સ્તવૈશ્ચ માં નિત્યં સ્તોષ્યતે યઃ સમાહિતઃ ।
તસ્યાહં સકલાં બાધાં શમયિષ્યામ્યસંશયમ્ ॥ ૧૨.૨॥ ॐ ઐં ઓં નમઃ ॥ ૨॥
મધુકૈટભનાશં ચ મહિષાસુરઘાતનમ્ ।
કીર્તયિષ્યન્તિ યે તદ્વદ્વધં શુમ્ભનિશુમ્ભયોઃ ॥ ૧૨.૩॥ ॐ ઐં શ્રીં નમઃ ॥ ૩॥
અષ્ટમ્યાં ચ ચતુર્દશ્યાં નવમ્યાં ચૈકચેતસઃ ।
શ્રોષ્યન્તિ ચૈવ યે ભક્ત્યા મમ માહાત્મ્યમુત્તમમ્ ॥ ૧૨.૪॥ ॐ ઐં ઇં નમઃ ॥ ૪॥
ન તેષાં દુષ્કૃતં કિઞ્ચિદ્દુષ્કૃતોત્થા ન ચાપદઃ ।
ભવિષ્યતિ ન દારિદ્ર્યં ન ચૈવેષ્ટવિયોજનમ્ ॥ ૧૨.૫॥ ॐ ઐં ક્લીં નમઃ ॥ ૫॥
શત્રુભ્યો ન ભયં તસ્ય દસ્યુતો વા ન રાજતઃ ।
ન શસ્ત્રાનલતોયૌઘાત્ કદાચિત્ સમ્ભવિષ્યતિ ॥ ૧૨.૬॥ ॐ ઐં ક્રૂં નમઃ ॥ ૬॥
તસ્માન્મમૈતન્માહાત્મ્યં પઠિતવ્યં સમાહિતૈઃ ।
શ્રોતવ્યં ચ સદા ભક્ત્યા પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૨.૭॥ ॐ ઐં શ્રૂં નમઃ ॥ ૭॥
ઉપસર્ગાનશેષાંસ્તુ મહામારીસમુદ્ભવાન્ ।
તથા ત્રિવિધમુત્પાતં માહાત્મ્યં શમયેન્મમ ॥ ૧૨.૮॥ ॐ ઐં પ્રાં નમઃ ॥ ૮॥
યત્રૈતત્પઠ્યતે સમ્યઙ્નિત્યમાયતને મમ ।
સદા ન તદ્વિમોક્ષ્યામિ સાન્નિધ્યં તત્ર મે સ્થિતમ્ ॥ ૧૨.૯॥ ॐ ઐં ક્રૂં નમઃ ॥ ૯॥
બલિપ્રદાને પૂજાયામગ્નિકાર્યે મહોત્સવે ।
સર્વં મમૈતન્માહાત્મ્યમ્ ઉચ્ચાર્યં શ્રાવ્યમેવ ચ ॥ ૧૨.૧૦॥ ॐ ઐં દિં નમઃ ॥ ૧૦॥
જાનતાજાનતા વાપિ બલિપૂજાં યથા કૃતામ્ ।
પ્રતીક્ષિષ્યામ્યહં પ્રીત્યા વહ્નિહોમં તથાકૃતમ્ ॥ ૧૨.૧૧॥ ॐ ઐં ફ્રેં નમઃ ॥ ૧૧॥
શરત્કાલે મહાપૂજા ક્રિયતે યા ચ વાર્ષિકી ।
તસ્યાં મમૈતન્માહાત્મ્યં શ્રુત્વા ભક્તિસમન્વિતઃ ॥ ૧૨.૧૨॥ ॐ ઐં હં નમઃ ॥ ૧૨॥
સર્વાબાધાવિનિર્મુક્તો ધનધાન્યસમન્વિતઃ ।
મનુષ્યો મત્પ્રસાદેન ભવિષ્યતિ ન સંશયઃ ॥ ૧૨.૧૩॥ ॐ ઐં સઃ નમઃ ॥ ૧૩॥
શ્રુત્વા મમૈતન્માહાત્મ્યં તથા ચોત્પત્તયઃ શુભાઃ ।
પરાક્રમં ચ યુદ્ધેષુ જાયતે નિર્ભયઃ પુમાન્ ॥ ૧૨.૧૪॥ ॐ ઐં ચેં નમઃ ॥ ૧૪॥
રિપવઃ સઙ્ક્ષયં યાન્તિ કલ્યાણં ચોપપદ્યતે ।
નન્દતે ચ કુલં પુંસાં માહાત્મ્યં મમ શૃણ્વતામ્ ॥ ૧૨.૧૫॥ ॐ ઐં સૂં નમઃ ॥ ૧૫॥
શાન્તિકર્મણિ સર્વત્ર તથા દુઃસ્વપ્નદર્શને ।

ગ્રહપીડાસુ ચોગ્રાસુ માહાત્મ્યં શ‍ૃણુયાન્મમ ॥ ૧૨.૧૬॥ ૐ ઐં પ્રીં નમઃ ॥ ૧૬॥
ઉપસર્ગાઃ શમં યાન્તિ ગ્રહપીડાશ્ચ દારુણાઃ ।
દુઃસ્વપ્નં ચ નૃભિર્દૃષ્ટં સુસ્વપ્નમુપજાયતે ॥ ૧૨.૧૭॥ ૐ ઐં વ્લૂં નમઃ ॥ ૧૭॥
બાલગ્રહાભિભૂતાનાં બાલાનાં શાન્તિકારકમ્ ।
સઙ્ઘાતભેદે ચ નૃણાં મૈત્રીકરણમુત્તમમ્ ॥ ૧૨.૧૮॥ ૐ ઐં આં નમઃ ॥ ૧૮॥
દુર્વૃત્તાનામશેષાણાં બલહાનિકરં પરમ્ ।
રક્ષોભૂતપિશાચાનાં પઠનાદેવ નાશનમ્ ॥ ૧૨.૧૯॥ ૐ ઐં ઔં નમઃ ॥ ૧૯॥
સર્વં મમૈતન્માહાત્મ્યં મમ સન્નિધિકારકમ્ ।
પશુપુષ્પાર્ઘ્યધૂપૈશ્ચ ગન્ધદીપૈસ્તથોત્તમૈઃ ॥ ૧૨.૨૦॥ ૐ ઐં હ્રીં નમઃ ॥ ૨૦॥
વિપ્રાણાં ભોજનૈર્હોમૈઃ પ્રોક્ષણીયૈરહર્નિશમ્ ।
અન્યૈશ્ચ વિવિધૈર્ભોગૈઃ પ્રદાનૈર્વત્સરેણ યા ॥ ૧૨.૨૧॥ ૐ ઐં ક્રીં નમઃ ॥ ૨૧॥
પ્રીતિર્મે ક્રિયતે સાસ્મિન્ સકૃદુચ્ચરિતે શ્રુતે ।
શ્રુતં હરતિ પાપાનિ તથારોગ્યં પ્રયચ્છતિ ॥ ૧૨.૨૨॥ ૐ ઐં દ્રાં નમઃ ॥ ૨૨॥
રક્ષાં કરોતિ ભૂતેભ્યો જન્મનાં કીર્તનં મમ ।
યુદ્ધેષુ ચરિતં યન્મે દુષ્ટદૈત્યનિબર્હણમ્ ॥ ૧૨.૨૩॥ ૐ ઐં શ્રીં નમઃ ॥ ૨૩॥
તસ્મિઞ્છ્રુતે વૈરિકૃતં ભયં પુંસાં ન જાયતે ।
યુષ્માભિઃ સ્તુતયો યાશ્ચ યાશ્ચ બ્રહ્મર્ષિભિઃ કૃતાઃ ॥ ૧૨.૨૪॥ ૐ ઐં સ્લીં નમઃ ॥ ૨૪॥
બ્રહ્મણા ચ કૃતાસ્તાસ્તુ પ્રયચ્છન્તુ શુભાં મતિમ્ ।
અરણ્યે પ્રાન્તરે વાપિ દાવાગ્નિપરિવારિતઃ ॥ ૧૨.૨૫॥ ૐ ઐં ક્લીં નમઃ ॥ ૨૫॥
દસ્યુભિર્વા વૃતઃ શૂન્યે ગૃહીતો વાપિ શત્રુભિઃ ।
સિંહવ્યાઘ્રાનુયાતો વા વને વા વનહસ્તિભિઃ ॥ ૧૨.૨૬॥ ૐ ઐં સ્લૂં નમઃ ॥ ૨૬॥
રાજ્ઞા ક્રુદ્ધેન ચાજ્ઞપ્તો વધ્યો બન્ધગતોઽપિ વા ।
આઘૂર્ણિતો વા વાતેન સ્થિતઃ પોતે મહાર્ણવે ॥ ૧૨.૨૭॥ ૐ ઐં હ્રીં નમઃ ॥ ૨૭॥
પતત્સુ ચાપિ શસ્ત્રેષુ સઙ્ગ્રામે ભૃશદારુણે ।
સર્વાબાધાસુ ઘોરાસુ વેદનાભ્યર્દિતોઽપિ વા ॥ ૧૨.૨૮॥ ૐ ઐં વ્લીં (બ્લીં) નમઃ ॥ ૨૮॥
સ્મરન્ મમૈતચ્ચરિતં નરો મુચ્યેત સઙ્કટાત્ ।
મમ પ્રભાવાત્સિંહાદ્યા દસ્યવો વૈરિણસ્તથા ॥ ૧૨.૨૯॥ ૐ ઐં ત્રોં નમઃ ॥ ૨૯॥
દૂરાદેવ પલાયન્તે સ્મરતશ્ચરિતં મમ ॥ ૧૨.૩૦॥ ૐ ઐં ઓં નમઃ ॥ ૩૦॥
ઋષિરુવાચ ॥ ૧૨.૩૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૩૧॥
ઇત્યુક્ત્વા સા ભગવતી ચણ્ડિકા ચણ્ડવિક્રમા ॥ ૧૨.૩૨॥ ૐ ઐં ઐં નમઃ ॥ ૩૨॥
પશ્યતાં સર્વદેવાનાં તત્રૈવાન્તરધીયત ।
તેઽપિ દેવા નિરાતઙ્કાઃ સ્વાધિકારાન્યથા પુરા ॥ ૧૨.૩૩॥ ૐ ઐં પ્રેં નમઃ ॥ ૩૩॥

યજ્ઞભાગભુજઃ સર્વે ચક્રુર્વિનિહતારયઃ ।
દૈત્યાશ્ચ દેવ્યા નિહતે શુમ્ભે દેવરિપૌ યુધિ ॥ ૧૨.૩૪॥ ॐ ઐં દ્રૂં નમઃ ॥ ૩૪॥
જગદ્વિધ્વંસકે તસ્મિન્ મહોગ્રેઽતુલવિક્રમે ।
નિશુમ્ભે ચ મહાવીર્યે શેષાઃ પાતાલમાયયુઃ ॥ ૧૨.૩૫॥ ॐ ઐં ક્લૂં નમઃ ॥ ૩૫॥
એવં ભગવતી દેવી સા નિત્યાપિ પુનઃ પુનઃ ।
સમ્ભૂય કુરુતે ભૂપ જગતઃ પરિપાલનમ્ ॥ ૧૨.૩૬॥ ॐ ઐં ઔં નમઃ ॥ ૩૬॥
તયૈતન્મોહ્યતે વિશ્વં સૈવ વિશ્વં પ્રસૂયતે ।
સા યાચિતા ચ વિજ્ઞાનં તુષ્ટા ઋદ્ધિં પ્રયચ્છતિ ॥ ૧૨.૩૭॥ ॐ ઐં સૂં નમઃ ॥ ૩૭॥
વ્યાપ્તં તયૈતત્સકલં બ્રહ્માણ્ડં મનુજેશ્વર ।
મહાદેવ્યા મહાકાલી મહામારીસ્વરૂપયા ॥ ૧૨.૩૮॥ ॐ ઐં ચેં નમઃ ॥ ૩૮॥
સૈવ કાલે મહામારી સૈવ સૃષ્ટિર્ભવત્યજા ।
સ્થિતિં કરોતિ ભૂતાનાં સૈવ કાલે સનાતની ॥ ૧૨.૩૯॥ ॐ ઐં હૈં નમઃ ॥ ૩૯॥
ભવકાલે નૃણાં સૈવ લક્ષ્મીર્વૃદ્ધિપ્રદા ગૃહે ।
સૈવાભાવે તથાલક્ષ્મીર્વિનાશાયોપજાયતે ॥ ૧૨.૪૦॥ ॐ ઐં પ્લીં નમઃ ॥ ૪૦॥
સ્તુતા સમ્પૂજિતા પુષ્પૈર્ગન્ધધૂપાદિભિસ્તથા ।
દદાતિ વિત્તં પુત્રાંશ્ચ મતિં ધર્મે ગતિં શુભામ્ ॥ ૧૨.૪૧॥ ॐ ઐં ક્ષાં નમઃ ॥ ૪૧॥
"ॐ યં યં યં રં રં રં ઠં ઠં ઠં ફટ્ સ્વાહા ॥ ૧૨॥"
(હવનમંત્ર)

ॐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ॐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ॐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
ભગવતી વાક્યં દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥
ઉવાચ ૨, અર્ધશ્લોકૌ ૨, શ્લોકાઃ ૩૭, એવમાદિતઃ ॥ ૬૭૧॥

## ॥ ૧૩. સુરથવૈશ્યયોર્વરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ ॥

ધ્યાનમ્ ।

ૐ બાલાર્કમણ્ડલાભાસાં ચતુર્બાહું ત્રિલોચનામ્ ।
પાશાઙ્કુશવરાભીતિર્ધારયન્તીં શિવાં ભજે ॥
ૐ ઋષિરુવાચ ॥ ૧૩.૧॥ ૐ ઐં શ્રૌં નમઃ ॥ ૧॥
એતત્તે કથિતં ભૂપ દેવીમાહાત્મ્યમુત્તમમ્ ।
એવં પ્રભાવા સા દેવી યયેદં ધાર્યતે જગત્ ॥ ૧૩.૨॥ ૐ ઐં વ્રીં નમઃ ॥ ૨॥
વિદ્યા તથૈવ ક્રિયતે ભગવદ્વિષ્ણુમાયયા ।
તયા ત્વમેષ વૈશ્યશ્ચ તથૈવાન્યે વિવેકિનઃ ॥ ૧૩.૩॥ ૐ ઐં ઓં નમઃ ॥ ૩॥
મોહ્યન્તે મોહિતાશ્ચૈવ મોહમેષ્યન્તિ ચાપરે ।
તામુપૈહિ મહારાજ શરણં પરમેશ્વરીમ્ ॥ ૧૩.૪॥ ૐ ઐં ઔં નમઃ ॥ ૪॥
આરાધિતા સૈવ નૃણાં ભોગસ્વર્ગાપવર્ગદા ॥ ૧૩.૫॥ ૐ ઐં હ્રાં નમઃ ॥ ૫॥
માર્કણ્ડેય ઉવાચ ॥ ૧૩.૬॥ ૐ ઐં શ્રીં નમઃ ॥ ૬॥
ઇતિ તસ્ય વચઃ શ્રુત્વા સુરથઃ સ નરાધિપઃ ॥ ૧૩.૭॥ ૐ ઐં શ્રાં નમઃ ॥ ૭॥
પ્રણિપત્ય મહાભાગં તમૃષિં સંશિતવ્રતમ્ ।
નિર્વિણ્ણોઽતિમમત્વેન રાજ્યાપહરણેન ચ ॥ ૧૩.૮॥ ૐ ઐં ઓં નમઃ ॥ ૮॥
જગામ સદ્યસ્તપસે સ ચ વૈશ્યો મહામુને ।
સન્દર્શનાર્થમમ્બાયા નદીપુલિનમાસ્થિતઃ ॥ ૧૩.૯॥ ૐ ઐં પ્લીં નમઃ ॥ ૯॥
સ ચ વૈશ્યસ્તપસ્તેપે દેવીસૂક્તં પરં જપન્ ।
તૌ તસ્મિન્ પુલિને દેવ્યાઃ કૃત્વા મૂર્તિં મહીમયીમ્ ॥ ૧૩.૧૦॥ ૐ ઐં સૌં નમઃ ॥ ૧૦॥
અર્હણાં ચક્રતુસ્તસ્યાઃ પુષ્પધૂપાગ્નિતર્પણૈઃ ।
નિરાહારૌ યતાત્માનૌ તન્મનસ્કૌ સમાહિતૌ ॥ ૧૩.૧૧॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૧॥
દદતુસ્તૌ બલિં ચૈવ નિજગાત્રાસૃગુક્ષિતમ્ ।
એવં સમારાધયતોસ્ત્રિભિર્વર્ષૈર્યતાત્મનોઃ ॥ ૧૩.૧૨॥ ૐ ઐં ક્રીં નમઃ ॥ ૧૨॥
પરિતુષ્ટા જગદ્ધાત્રી પ્રત્યક્ષં પ્રાહ ચણ્ડિકા ॥ ૧૩.૧૩॥ ૐ ઐં લ્લૂં નમઃ ॥ ૧૩॥
દેવ્યુવાચ ॥ ૧૩.૧૪॥ ૐ ઐં ક્લીં નમઃ ॥ ૧૪॥
યત્પ્રાર્થ્યતે ત્વયા ભૂપ ત્વયા ચ કુલનન્દન ।
મત્તસ્તત્પ્રાપ્યતાં સર્વં પરિતુષ્ટા દદામિતે ॥ ૧૩.૧૫॥ ૐ ઐં હ્રીં નમઃ ॥ ૧૫॥
માર્કણ્ડેય ઉવાચ ॥ ૧૩.૧૬॥ ૐ ઐં પ્લીં નમઃ ॥ ૧૬॥
તતો વવ્રે નૃપો રાજ્યમવિભ્રંશ્યન્યજન્મનિ ।
અત્રૈવ ચ નિજં રાજ્યં હતશત્રુબલં બલાત્ ॥ ૧૩.૧૭॥ ૐ ઐં શ્રીં નમઃ ॥ ૧૭॥
સોઽપિ વૈશ્યસ્તતો જ્ઞાનં વવ્રે નિર્વિણ્ણમાનસઃ ।
મમેત્યહમિતિ પ્રાજ્ઞઃ સઙ્ગવિચ્યુતિકારકમ્ ॥ ૧૩.૧૮॥ ૐ ઐં લ્લીં નમઃ ॥ ૧૮॥
દેવ્યુવાચ ॥ ૧૩.૧૯॥ ૐ ઐં શ્રૂં નમઃ ॥ ૧૯॥

સ્વલ્પૈરહોભિર્નૃપતે સ્વં રાજ્યં પ્રાપ્સ્યતે ભવાન્ ॥ ૧૩.૨૦॥ ૐ ઐં હ્રીં નમઃ ॥ ૨૦॥
હત્વા રિપૂનસ્ખલિતં તવ તત્ર ભવિષ્યતિ ॥ ૧૩.૨૧॥ ૐ ઐં ત્રૂં નમઃ ॥ ૨૧॥
મૃતશ્ચ ભૂયઃ સમ્પ્રાપ્ય જન્મ દેવાદ્વિવસ્વતઃ ॥ ૧૩.૨૨॥ ૐ ઐં હૂઁ (હૂં, હ્રીં) નમઃ ॥ ૨૨॥
સાવર્ણિકો મનુર્નામ ભવાન્ભુવિ ભવિષ્યતિ ॥ ૧૩.૨૩॥ ૐ ઐં હ્રાં (પ્રીં) નમઃ ॥ ૨૩॥
વૈશ્યવર્ય ત્વયા યશ્ચ વરોઽસ્મત્તોઽભિવાઞ્છિતઃ ॥ ૧૩.૨૪॥ ૐ ઐં પ્રીં (ઓં) નમઃ ॥ ૨૪॥
તં પ્રયચ્છામિ સંસિદ્ધ્યૈ તવ જ્ઞાનં ભવિષ્યતિ ॥ ૧૩.૨૫॥ ૐ ઐં ઓં (સૂં) નમઃ ॥ ૨૫॥
માર્કણ્ડેય ઉવાચ ॥ ૧૩.૨૬॥ ૐ ઐં સૂં (શ્રીં) નમઃ ॥ ૨૬॥
ઇતિ દત્ત્વા તયોર્દેવી યથાભિલષિતં વરમ્ ॥ ૧૩.૨૭॥ ૐ ઐં હ્લૌં નમઃ ॥ ૨૭॥
બભૂવાન્તર્હિતા સદ્યો ભક્ત્યા તાભ્યામભિષ્ટુતા ।
એવં દેવ્યા વરં લબ્ધ્વા સુરથઃ ક્ષત્રિયર્ષભઃ ॥ ૧૩.૨૮॥ ૐ ઐં યૌં નમઃ ॥ ૨૮॥
સૂર્યાજ્જન્મ સમાસાદ્ય સાવર્ણિર્ભવિતા મનુઃ ॥ ૧૩.૨૯॥ ૐ ઐં આં લ્હીં (ઓં) નમઃ ॥ ૨૯॥
એવં દેવ્યા વરં લબ્ધ્વા સુરથઃ ક્ષત્રિયર્ષભઃ ।
સૂર્યાજ્જન્મ સમાસાદ્ય સાવર્ણિર્ભવિતા મનુઃ ॥ ૧૩.૩૦॥ ૐ ઐં ઓં નમઃ ॥ ૩૦॥
। ક્લીં ૐ ।

“ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે”
(હવન કા બીજમન્ત્ર ઉપલબ્ધ નહી હૈ । અતઃ યહાઁ નવાર્ણમન્ત્ર સે હવન કિયા જા સકતા હૈ ।

ૐ અમ્બે અમ્બિકે અમ્બાલિકે ન માનયતિ કશ્ચન્ ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાં કામ્પીલવાસિનીં નમઃ ॥
ૐ સાઙ્ગાયૈ સપરિવારાયૈ સવાહનાયૈ સર્વાયુધાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વત્યૈ મહાહુતિંસમર્પયામિ નમઃ સ્વાહા ॥
Variation shloka
ૐ ક્લીં જયન્તી સાઙ્ગાયૈ સાયુધાયૈ સશક્તિકાયૈ સપરિવારાયૈ સવાહનાયૈ
કામબીજાધિષ્ઠાત્ર્યૈ મહાસરસ્વ્ત્યૈ નમઃ અહમાહુતિ સમર્પયામિ સ્વાહા ॥
॥ સ્વસ્તિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
સુરથવૈશ્યયોર્વરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥
ઉવાચ ૬, અર્ધશ્લોકાઃ ૧૧, શ્લોકાઃ ૧૨, એવમાદિતઃ ॥ ૭૦૦॥
સમસ્તા ઉવાચમન્ત્રાઃ ૫૭, અર્ધશ્લોકાઃ ૪૨, શ્લોકાઃ ૫૩૫, અવદાનાનિ ૬૬॥
॥ ઇતિ તન્ત્રરૂપેણપરિણતાશ્રીતન્ત્રદુર્ગાસપ્તશતીદેવીમાહાત્મ્યં સમાપ્તમ્ ॥
॥ ૐ તત્ સત્ ૐ ॥

ઇસ પ્રકાર શ્રીતન્ત્રદુર્ગાસપ્તશતી કા પાઠ પુરા હોને પર પ્રથમ નવર્ણમન્ત્ર કા જપ કરકે પશ્ચાત્ તાન્ત્રિક દેવી સૂક્ત કા પાઠ કરે । સભી કાર્ય નવાર્ણ મન્ત્ર કે ન્યાસ આદિ તથા સપ્તશતી ન્યાસ આદિ પાઠ આરમ્ભ કે પૂર્વ કી તરહ હોંગે ।

ઇતિ શ્રી બીજાત્મક તન્ત્ર દુર્ગા સપ્તશતી સમ્પૂર્ણા ॥

॥ અથ નવાર્ણમન્ત્રજપવિધિઃ ॥

॥ વિનિયોગઃ ॥
શ્રીગણપતિર્જયતિ ।
ૐ અસ્ય નવાર્ણમન્ત્રસ્ય બ્રહ્મવિષ્ણુરુદ્રા ઋષયઃ,
ગાયત્ર્યુષ્ણિગનુષ્ટુભશ્છદાંસિ,
શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વત્યો દેવતાઃ,
ઐં બીજમ્,
હ્રીં શક્તિઃ,
ક્લીં કીલકમ્,
શ્રીમહાકાલી મહાલક્ષ્મી મહાસરસ્વતી પ્રીત્યર્થે જપે વિનિયોગઃ ।

॥ ઋષ્યાદિન્યાસઃ ॥
બ્રહ્મવિષ્ણુરુદ્રઋષિભ્યો નમઃ, શિરસિ ।
ગાયત્ર્યુષ્ણિગનુષ્ટુપ્છન્દોભ્યો નમઃ, મુખે ।
મહાકાલી મહાલક્ષ્મી મહાસરસ્વતી દેવતાભ્યો નમઃ, હૃદિ ।
ઐં બીજાય નમઃ, ગુહ્યે ।
હ્રીં શક્તયે નમઃ, પાદયોઃ ।
ક્લીં કીલકાય નમઃ, નાભૌ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે, સર્વાઙ્ગે, ઇતિ મૂલેનકરૌ સંશોધ્ય....

॥ કરન્યાસઃ ॥
ૐ ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ । (દોનોં હાથોં કે તર્જની અઁગુલિયોં સે દોનોં અઁગુઠોં કા સ્પર્શ)
ૐ હ્રીં તર્જનીભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં તર્જની અઁગુલિયોં કા સ્પર્શ)
ૐ ક્લીં મધ્યમાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં માધ્યમા અઁગુલિયોં કા સ્પર્શ)
ૐ ચામુણ્ડાયૈ અનામિકાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં અનામિકા અઁગુલિયોં કા સ્પર્શ)
ૐ વિચ્ચે કનિષ્ઠિકાભ્યાં નમઃ । (દોનોં હાથોં કે અઁગૂઠોં સે દોનોં કનિષ્ઠકા અઁગુલિયોં કા સ્પર્શ)
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે કરતલ કરપૃષ્ઠાભ્યાં નમઃ । (હથેલિંયોં ઔર ઉનકે પૃષ્ઠ ભાગોં કા પરસ્પર સ્પર્શ)

॥ હૃદયાદિન્યાસઃ ॥

ઇસમેં દાહિને હાથ કી પાઁચોં અઁગુલિયોં સે હૃદય આદિ અઙ્ગોં કા સ્પર્શ કિયા જાતા હૈ ।
ૐ ઐં હૃદયાય નમઃ । (દાહિને હાથ કી પાઁચોં અઁગુલિયોં સે હૃદય કા સ્પર્શ)
ૐ હ્રીં શિરસે સ્વાહા । (સિર કા સ્પર્શ)
ૐ ક્લીં શિખાયૈ વષટ્ । (શિખા કા સ્પર્શ)
ૐ ચામુણ્ડાયૈ કવચાય હુમ્ । (દાહિને હાથ કી અઁગુલિયોં સે બાયેં કન્ધે કા ઔર બાઁયેં હાથ કી અઙ્ગુલિયોં સે દાહિને કન્ધે કા સાથ હી સ્પર્શ)
ૐ વિચ્ચે નેત્રત્રયાય વૌષટ્ । (દાહિને હાથ કી અઁગુલિયોં કે અગ્ર ભાગ સે દોનોં નેત્રોં ઔર લલાટ કે મધ્ય ભાગ કા સ્પર્શ)
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે અસ્ત્રાય ફટ્ ।

॥ અક્ષરન્યાસઃ ॥
નિમ્નાઙ્કિત વાક્યોં કો પઢ઼કર ક્રમશઃ શિખા આદિ કા દાહિને હાથ કી અઙ્ગુલિયોં સે સ્પર્શ કરે ।
ૐ ઐં નમઃ શિખાયામ્ ।
ૐ હ્રીં નમઃ દક્ષિણનેત્રે ।
ૐ ક્લીં નમઃ વામનેત્રે ।
ૐ ચાં નમઃ દક્ષિણકર્ણે ।
ૐ મું નમઃ વામકર્ણે ।
ૐ ડાં નમઃ દક્ષિણનાસાપુટે ।
ૐ યૈં નમઃ વામનાસાપુટે ।
ૐ વિં નમઃ મુખે ।
ૐ ચ્ચેં નમઃ ગુહ્યે ।

॥ દિઙ્ન્યાસઃ ॥
ૐ ઐં પ્રાચ્યૈ નમઃ ।
ૐ ઐં આગ્નેય્યૈ નમઃ ।
ૐ હ્રીં દક્ષિણાયૈ નમઃ ।
ૐ હ્રીં નૈરૃત્યૈ નમઃ ।
ૐ ક્લીં પ્રતીચ્યૈ નમઃ ।
ૐ ક્લીં વાયવ્યૈ નમઃ ।
ૐ ચામુણ્ડાયૈ ઉદીચ્યૈ નમઃ ।
ૐ ચામુણ્ડાયૈ ઐશાન્યૈ નમઃ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ઊર્ધ્વાયૈ નમઃ ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ભૂમ્યૈ નમઃ ।

॥ ધ્યાનં ॥

મહાકાલી -

ખડ્ગચ્ચક્રગદેષુ ચાપપરિઘાઞ્છૂલમ્ભુશુણ્ડીં શિરઃ

શઙ્ખંસન્દધતીં કરૈસ્ત્રિનયનાં સર્વાઙ્ગભૂષાવૃતામ્ ।

નીલાશ્મદ્યુતિમાસ્યપાદદશકાં સેવે મહાકાલિકાં

યામસ્તૌત્સ્વપિતે હરૌકમલજો હન્તુમ્મધુકૈટભમ્ ॥ ૧॥

મહાલક્ષ્મી -

અક્ષસ્રક્પરશું ગદેષુકુલિશં પદ્મન્ધનુષ્કુણ્ડિકાં (પદ્મન્ધનુઃકુણ્ડિકાં)

દણ્ડંશક્તિમસિં ચ ચર્મ જલજં ઘણ્ટાં સુરાભાજનમ્ ।

શૂલં પાશસુદર્શને ચ દધતીં હસ્તૈઃ પ્રસન્નાનનાં

સેવે સૈરિભમર્દિનીમિહ મહાલક્ષ્મીં સરોજસ્થિતામ્ ॥ ૨॥

મહાસરસ્વતી -

ઘણ્ટાશૂલહલાનિ શઙ્ખમુસલે ચક્રં ધનુઃ સાયકં

હસ્તાબ્જૈર્દધતીં ઘનાન્તવિલસચ્છીતાંશુતુલ્યપ્રભામ્ ।

ગૌરીદેહસમુદ્ભવાં ત્રિજગતામાધારભૂતાં મહા-

પૂર્વામત્ર સરસ્વતીમનુભજે શુમ્ભાદિદૈત્યાર્દિનીમ્ ॥ ૩॥

સઙ્કેત - ઇસ પ્રકાર ન્યાસ ઔર ધ્યાન કરકે માનસિક ઉપચાર સે દેવી કી પૂજા કરે । પશ્ચાત્ ૧૦૮ યા ૧૦૦૮ બાર નવાર્ણ મન્ત્ર કા જપ કરના ચાહિયે । જપ કરને કે પહલે હી “ઐં હ્રીં અક્ષમાલિકાયૈ નમઃ” ઇસ મન્ત્ર સે માલા કી પૂજા કરકે નિમ્નલિખિત મન્ત્રોં સે માલા કી પ્રાર્થના કરેં-

ૐ માં માલે મહામાયે સર્વશક્તિ સ્વરૂપિણિ ।

ચતુર્વર્ગસ્ત્વયિ ન્યસ્તસ્તસ્માન્મે સિદ્ધિદા ભવ ॥ ૧॥

ૐ અવિઘ્નં કુરુ માલે ત્વં ગૃહ્ણામિ દક્ષિણેકરે ।

જપકાલે ચ સિદ્ધ્યર્થં પ્રસીદ મમ સિદ્ધયે ॥ ૨॥

ૐ અક્ષમાલાધિપતયે સુસિદ્ધિં દેહિ દેહિ સર્વમન્ત્રાર્થસાધિનિ

સાધય સાધય સર્વસિદ્ધિં પરિકલ્પય પરિકલ્પય મે સ્વાહા ॥

ઇસ પ્રકાર પ્રાર્થના કરકે જપ આરમ્ભ કરે । જપ પૂરા કરકે જપ કો ભગવતી કો સમર્પિત કરતે હુયે કહે ।

ગુહ્યાતિગુહ્યગોપ્ત્રી ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।

સિદ્ધિર્ભવતુ મે દેવિ ત્વત્પ્રસાદાન્ મહેશ્વરિ ॥

પશ્ચાત્ નીચે લિખે અનુસાર સપ્તશતી કા ન્યાસ કરે ।

॥ ઇતિનવાર્ણજપવિધિઃ સમાપ્તઃ ॥

અથતન્ત્રદુર્ગાસપ્તશતીન્યાસઃ

॥ કરન્યાસઃ ॥
ॐ હ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ॐ ચં તર્જનીભ્યાં નમઃ ।
ॐ ડિં મધ્યમાભ્યાં નમઃ ।
ॐ કાં અનામિકાભ્યાં નમઃ ।
ॐ યૈં કનિષ્ઠકાભ્યાં નમઃ ।
ॐ હ્રીં ચણ્ડિકાયૈ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

॥ હૃદયાદિન્યાસઃ ॥
ॐ ઐં સ્લૂં નમઃ ખડ્ગિનીશૂલિનીઘોરા ચક્રિણી ગદિનીતથા ।
ॐ ઐં નોં નમઃ શઙ્ખિની ચાપિની બાણભુશુણ્ડી પરિઘાયુધા ॥ હૃદયાય નમઃ ।
ॐ ઐં ક્લૈં નમઃ ॐ શૂલેનપાહિ નો દેવિ પાહિખડ્ગેનચામ્બિકે ।
ઘણ્ટાસ્વનેન નઃ પાહિ ચાપજ્યાનિસ્વનેન ચ ॥ શિરસે સ્વાહા ।
ॐ ઐં ક્રીં નમઃ ॐ પ્રાચ્યાંરક્ષ પ્રતીચ્યાઞ્ચ ચણ્ડિકેરક્ષ દક્ષિણેં ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાન્તથેશ્વરિ ॥ શિખાયૈ વષટ્ ।
ॐ ઐં મ્લૂં નમઃ ॐ સૌમ્યાનિયાનિરૂપાણિ ત્રૈલોક્યેવિચરન્તિતે ।
યાનિ ચાત્યર્થઘોરાણિ તૈરક્ષાસ્માઁસ્તથા ભુવમ્ ॥ કવચાયહુમ્ ।
ॐ ઐં ઘ્રેં નમઃ ॐ ખડ્ગશૂલગદાદીનિ યાનિચાસ્ત્રાણિતેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્ રક્ષસર્વતઃ ॥ નેત્રત્રયાયવૌષટ્ ।
ॐ ઐં શ્રૂં નમઃ ॐ સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુતે ॥ અસ્ત્રાય ફટ્ ।

॥ ધ્યાનં ॥
વિદ્યુદ્દામસમપ્રભાં મૃગપતિસ્કન્ધસ્થિતાં ભીષણાં
કન્યાભિઃકરવાલખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ॥
હસ્તૈશ્ચક્રગદાસિખેટવિશિખાં શ્ચાપં ગુણં તર્જનીં
વિભ્રાણામનલાત્મિકાં શશિધરાં દુર્ગાં ત્રિનેત્રાં ભજે ॥
અર્થ - જિનકે અઙ્ગોં કી શોભા બિજલી કે સમાન હૈં, જો સિંહ કી સવરી પર બૈઠીં હુઇ ભયઙ્કર પ્રતીત હોતી હૈ, હાથોં મેં તલવાર વ ઢાલ લિયે ઐસી અનેક કન્યાયેં જિનકી સેવા મેં ખડ઼ી હૈં, જો અપને હાથોં મેં ચક્ર-ગદા-તલવાર-ઢાલ-બાણ-ધનુષ-પાશ ઔર તર્જનીમુદ્રા ધારણ કિયે હુયે હૈં, જિનકા સ્વરૂપ અગ્નિમય હૈં, તથા જિનકે માથે પર ચન્દ્રમા કા મુકુટ શોભા પા રહા હૈ, ઐસી તીન નેત્રવાલી શ્રી દુર્ગા દેવી કા ધ્યાન કરતા (યા કરતી) હૂઁ ।
ઇસ પ્રકાર શ્રી દુર્ગા દેવી કા ધ્યાન કરકે આગે લિખા તન્ત્ર રૂપ દેવી સૂક્ત કા પાઠ કરેં ।

## ॥ તન્ત્રરૂપદેવીસૂક્તમ્ ॥

દેવા ઊચુઃ ॥ ૫.૮॥ ૐ ઐં હ્સોં (હ્સૌં) નમઃ ॥ ૧॥
નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૫.૯॥ ૐ ઐં હ્રીં નમઃ ॥ ૨॥
રૌદ્રાયૈ નમો નિત્યાયૈ ગૌર્યૈ ધાત્ર્યૈ નમો નમઃ ।
જ્યોત્સ્નાયૈ ચેન્દુરૂપિણ્યૈ સુખાયૈ સતતં નમઃ ॥ ૫.૧૦॥ ૐ ઐં શ્રીં નમઃ ॥ ૩॥
કલ્યાણ્યૈ પ્રણતાં વૃદ્ધ્યૈ સિદ્ધ્યૈ કુર્મો નમો નમઃ ।
નૈરૃત્યૈ ભૂભૃતાં લક્ષ્મ્યૈ શર્વાણ્યૈ તે નમો નમઃ ॥ ૫.૧૧॥ ૐ ઐં હૂં નમઃ ॥ ૪॥
દુર્ગાયૈ દુર્ગપારાયૈ સારાયૈ સર્વકારિણ્યૈ ।
ખ્યાત્યૈ તથૈવ કૃષ્ણાયૈ ધૂમ્રાયૈ સતતં નમઃ ॥ ૫.૧૨॥ ૐ ઐં ક્લીં નમઃ ॥ ૫॥
અતિસૌમ્યાતિરૌદ્રાયૈ નતાસ્તસ્યૈ નમો નમઃ ।
નમો જગત્પ્રતિષ્ઠાયૈ દેવ્યૈ કૃત્યૈ નમો નમઃ ॥ ૫.૧૩॥ ૐ ઐં રૌં નમઃ ॥ ૬॥
યા દેવી સર્વભૂતેષુ વિષ્ણુમાયેતિ શબ્દિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૧૪-૧૬॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૭॥ ૐ ઐં મ્લીં નમઃ ॥ ૮॥ ૐ ઐં પ્લૂં નમઃ ॥ ૯॥
યા દેવી સર્વભૂતેષુ ચેતનેત્યભિધીયતે ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૧૭-૧૯॥ ૐ ઐં સ્હૌં (સ્હાં) નમઃ ॥ ૧૦॥ ૐ ઐં સ્ત્રીં નમઃ ॥ ૧૧॥ ૐ ઐં ગ્લૂં નમઃ ॥ ૧૨॥
યા દેવી સર્વભૂતેષુ બુદ્ધિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૦-૨૨॥ ૐ ઐં વ્રીં નમઃ ॥ ૧૩॥ ૐ ઐં સૌં (સૌઃ) નમઃ ॥ ૧૪॥ ૐ ઐં લૂં નમઃ ॥ ૧૫॥
યા દેવી સર્વભૂતેષુ નિદ્રારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૩-૨૫॥ ૐ ઐં લ્લૂં નમઃ ॥ ૧૬॥ ૐ ઐં દ્રાં નમઃ ॥ ૧૭॥ ૐ ઐં ક્સાં નમઃ ॥ ૧૮॥
યા દેવી સર્વભૂતેષુ ક્ષુધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૬-૨૮॥ ૐ ઐં ક્ષ્મ્રીં નમઃ ॥ ૧૯॥ ૐ ઐં ગ્લૌં નમઃ ॥ ૨૦॥ ૐ ઐં સ્કેં (સ્કૂઁ, સ્કૂ, સ્કં) નમઃ ॥ ૨૧॥
યા દેવી સર્વભૂતેષુ છાયારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૨૯-૩૧॥ ૐ ઐં ત્રૂં નમઃ ॥ ૨૨॥ ૐ ઐં સ્ક્લૂં નમઃ ॥ ૨૩॥ ૐ ઐં ક્રૌં નમઃ ॥ ૨૪॥
યા દેવી સર્વભૂતેષુ શક્તિરૂપેણ સંસ્થિતા ।

નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૨-૩૪॥ ૐ ઐં શ્રીં (છ્રીં) નમઃ ॥ ૨૫॥ ૐ ઐં મ્લૂં નમઃ ॥ ૨૬॥ ૐ ઐં ક્લૂં નમઃ ॥ ૨૭॥
યા દેવી સર્વભૂતેષુ તૃષ્ણારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૫-૩૭॥ ૐ ઐં શાં નમઃ ॥ ૨૮॥ ૐ ઐં લ્હીં નમઃ ॥ ૨૯॥ ૐ ઐં સ્ત્રૂં નમઃ ॥ ૩૦॥
યા દેવી સર્વભૂતેષુ ક્ષાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૩૮-૪૦॥ ૐ ઐં લ્લીં નમઃ ॥ ૩૧॥ ૐ ઐં લીં નમઃ ॥ ૩૨॥ ૐ ઐં સં નમઃ ॥ ૩૩॥
યા દેવી સર્વભૂતેષુ જાતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૧-૪૩॥ ૐ ઐં લૂં નમઃ ॥ ૩૪॥ ૐ ઐં હ્સૂં નમઃ ॥ ૩૫॥ ૐ ઐં શ્રૂં નમઃ ॥ ૩૬॥
યા દેવી સર્વભૂતેષુ લજ્જારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૪-૪૬॥ ૐ ઐં જૂં નમઃ ॥ ૩૭॥ ૐ ઐં હ્સ્લ્રીં નમઃ ॥ ૩૮॥ ૐ ઐં સ્કીં (સ્કીં) નમઃ ॥ ૩૯॥
યા દેવી સર્વભૂતેષુ શાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૪૭-૪૯॥ ૐ ઐં ક્લાં નમઃ ॥ ૪૦॥ ૐ ઐં શ્રૂં નમઃ ॥ ૪૧॥ ૐ ઐં હં નમઃ ॥ ૪૨॥
યા દેવી સર્વભૂતેષુ શ્રદ્ધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૦-૫૨॥ ૐ ઐં હ્લીં નમઃ ॥ ૪૩॥ ૐ ઐં ક્સ્રૂં નમઃ ॥ ૪૪॥ ૐ ઐં દ્રૌં નમઃ ॥ ૪૫॥
યા દેવી સર્વભૂતેષુ કાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૩-૫૫॥ ૐ ઐં ક્લૂં નમઃ ॥ ૪૬॥ ૐ ઐં ગાં નમઃ ॥ ૪૭॥ ૐ ઐ સં નમઃ ॥ ૪૮॥
યા દેવી સર્વભૂતેષુ લક્ષ્મીરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૬-૫૮॥ ૐ ઐં લ્સ્રાં નમઃ ॥ ૪૯॥ ૐ ઐં ફ્રીં નમઃ ॥ ૫૦॥ ૐ ઐં સ્લાં નમઃ ॥ ૫૧॥
યા દેવી સર્વભૂતેષુ વૃત્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૫૯-૬૧॥ ૐ ઐં લ્લૂં નમઃ ॥ ૫૨॥ ૐ ઐં ફ્રેં નમઃ ॥ ૫૩॥ ૐ ઐં ઓં નમઃ ॥ ૫૪॥
યા દેવી સર્વભૂતેષુ સ્મૃતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૨-૬૪॥ ૐ ઐં સ્મ્લીં નમઃ ॥ ૫૫॥ ૐ ઐં હ્રાં નમઃ ॥ ૫૬॥ ૐ ઐં ઓં નમઃ ॥ ૫૭॥

યા દેવી સર્વભૂતેષુ દયારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૫-૬૭॥ ૐ ઐં હ્લૂ નમઃ ॥ ૫૮॥ ૐ ઐં હૂં (હૂઁ) નમઃ ॥ ૫૯॥
ૐ ઐં નં નમઃ ॥ ૬૦॥
યા દેવી સર્વભૂતેષુ તુષ્ટિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૬૮-૭૦॥ ૐ ઐં સ્રાં નમઃ ॥ ૬૧॥ ૐ ઐં વં નમઃ ॥ ૬૨॥
ૐ ઐં મં નમઃ ॥ ૬૩॥
યા દેવી સર્વભૂતેષુ માતૃરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૧-૭૩॥ ૐ ઐં મ્ક્લીં નમઃ ॥ ૬૪॥ ૐ ઐં શાં નમઃ ॥ ૬૫॥
ૐ ઐં લં નમઃ ॥ ૬૬॥
યા દેવી સર્વભૂતેષુ ભ્રાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૪-૭૬॥ ૐ ઐં ભૌં (ભૈં) નમઃ ॥ ૬૭॥ ૐ ઐં લ્લૂં નમઃ ॥
૬૮॥ ૐ ઐં હીં નમઃ ॥ ૬૯॥
ઇન્દ્રિયાણામધિષ્ઠાત્રી ભૂતાનાં ચાખિલેષુ યા ।
ભૂતેષુ સતતં તસ્યૈ વ્યાપ્ત્યૈ દેવ્યૈ નમો નમઃ ॥ ૫.૭૭॥ ૐ ઐં ઇં નમઃ ॥ ૭૦॥
ચિતિરૂપેણ યા કૃત્સ્નમેતદ્ વ્યાપ્ય સ્થિતા જગત્ ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૫.૭૮-૮૦॥ ૐ ઐં ચેં નમઃ ॥ ૭૧॥ ૐ ઐં લ્ક્રીં નમઃ ॥ ૭૨॥
ૐ ઐં હ્લીં નમઃ ॥ ૭૩॥
સ્તુતા સુરૈઃ પૂર્વમભીષ્ટસંશ્રયા-
ત્તથા સુરેન્દ્રેણ દિનેષુ સેવિતા ।
કરોતુ સા નઃ શુભહેતુરીશ્વરી
શુભાનિ ભદ્રાણ્યભિહન્તુ ચાપદઃ ॥ ૫.૮૧॥ ૐ ઐં ક્ષ્મ્લીં નમઃ ॥ ૭૪॥
યા સામ્પ્રતં ચોદ્ધતદૈત્યતાપિતૈ-
રસ્માભિરીશા ચ સુરૈર્નમસ્યતે ।
યા ચ સ્મૃતા તત્ક્ષણમેવ હન્તિ નઃ
સર્વાપદો ભક્તિવિનમ્રમૂર્તિભિઃ ॥ ૫.૮૨॥ ૐ ઐં પૂં (યૂં) નમઃ ॥ ૭૫॥
ઋષિરુવાચ ॥ ૫.૮૩॥ ૐ ઐં શ્રૌં નમઃ ॥ ૭૬॥
એવં સ્તવાભિયુક્તાનાં દેવાનાં તત્ર પાર્વતી ।
સ્નાતુમભ્યાયયૌ તોયે જાહ્નવ્યા નૃપનન્દન ॥ ૫.૮૪॥ ૐ ઐં હ્રૌં નમઃ ॥ ૭૭॥
સાબ્રવીત્તાન્ સુરાન્ સુભ્રૂર્ભવદ્ભિઃ સ્તૂયતેઽત્ર કા ।
શરીરકોશતશ્ચાસ્યાઃ સમુદ્ભૂતાબ્રવીચ્છિવા ॥ ૫.૮૫॥ ૐ ઐં ભ્રૂં નમઃ ॥ ૭૮॥
સ્તોત્રં મમૈતત્ક્રિયતે શુમ્ભદૈત્યનિરાકૃતૈઃ ।
દેવૈઃ સમેતૈઃ સમરે નિશુમ્ભેન પરાજિતૈઃ ॥ ૫.૮૬॥ ૐ ઐં ક્સ્ત્રીં નમઃ ॥ ૭૯॥

શરીરકોશાદ્યત્તસ્યાઃ પાર્વત્યા નિઃસૃતામ્બિકા ।
કૌશિકીતિ સમસ્તેષુ તતો લોકેષુ ગીયતે ॥ ૫.૮૭॥ ૐ ઐં આં નમઃ ॥ ૮૦॥
તસ્યાં વિનિર્ગતાયાં તુ કૃષ્ણાભૂત્સાપિ પાર્વતી ।
કાલિકેતિ સમાખ્યાતા હિમાચલકૃતાશ્રયા ॥ ૫.૮૮॥ ૐ ઐં ક્રૂં નમઃ ॥ ૮૧॥
તતોઽમ્બિકાં પરં રૂપં બિભ્રાણાં સુમનોહરમ્ ।
દદર્શ ચણ્ડો મુણ્ડશ્ચ ભૃત્યૌ શુમ્ભનિશુમ્ભયોઃ ॥ ૫.૮૯॥ ૐ ઐં ત્રૂં નમઃ ॥ ૮૨॥
॥ ઇતિ તન્ત્રરૂપન્દેવીસૂક્તમ્ ॥
તન્ત્ર રુપ દેવી સૂક્ત કા પાઠ કરને કે પશ્ચાત્ ભગવતી કી પ્રાર્થના કરતા હુઆ (કરતી હુઈ) ક્ષમા યાચના કરકે પાઠ કાર્ય સમાપ્ત કરેં ।
હરિવિરઞ્ચિમહેશ્વરપૂજિતામ્-
ભગવતીં જનદુર્ગતિહારિણીમ્ ।
સકલતન્ત્રમયીં જગદીશ્વરીં
સુખમયીં જગતાં જનનીં ભજે ॥ ૧॥
સર્વાર્થસાધનકરીં મહતીમુદારાં-
સ્વર્ગાપવર્ગગતિદાં કરુણાવતારામ્ ।
સંસારતારણપરાં હૃતપાપભારાં-
દુર્ગાન્નમામિ શિરસાઽહમનન્તસારામ્ ॥ ૨॥
॥ ક્ષમા-પ્રાર્થના ॥
અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોઽયમિતિ માં મત્વા ક્ષમસ્વ પરમેશ્વરિ ॥ ૧॥
આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાં ચૈવ ન જાનામિ ક્ષમ્યતાં પરમેશ્વરિ ॥ ૨॥
મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં સુરેશ્વરિ ।
યત્પૂજિતં મયાદેવિ પરિપૂર્ણતદસ્તુમે ॥ ૩॥
અપરાધશતં કૃત્વા જગદમ્બેતિચોચ્ચરેત્ ।
યાં ગતિં સમવાપ્નોતિ ન તાં બ્રહ્માદયઃ સુરાઃ ॥ ૪॥
સાપરાધોઽસ્મિશરણં પ્રાપ્તસ્ત્વાં જગદમ્બિકે ।
ઇદાનીમનુકમ્પ્યોઽહં યથેચ્છસિ તથા કુરુ ॥ ૫॥
અજ્ઞાનાદ્વિસ્મૃતેર્ભ્રાન્ત્યા યન્ન્યૂનમધિકં કૃતમ્ ।
તત્સર્વં ક્ષમ્યતાં દેવિ પ્રસીદપરમેશ્વરિ ॥ ૬॥
કામેશ્વરિજગન્માતઃ સચ્ચિદાનન્દવિગ્રહે ।
ગૃહાણામિમાં પ્રીત્યા પ્રસીદ પરમેશ્વરિ ॥ ૭॥

ગુહ્યાતિગુહ્યગોત્રીત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુમેદેવિ ત્વત્પ્રસાદાન્મહેશ્વરિ ॥ ૮॥
જગદમ્બા કા પ્રધાન - નવાર્ણ મન્ત્ર
ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ।
અર્થ - હે ચિત્સ્વરૂપિણી મહાસરસ્વતી! હે સત્ સ્વરૂપિણી મહાલક્ષ્મી ! હે આનન્દરૂપિણી મહાકાલી । બ્રહ્મ વિદ્યા પાને કે લિએ હમ સબ તુમ્હારા ધ્યાન કરતે હૈં ।
સરલ અર્થ - હે મહાકાલી-મહાલક્ષ્મી-મહાસરસ્વતી-સ્વરૂપિણી (દુર્ગા દેવી) મનોઽભીષ્ટ પૂર્ણ કીજિયે ।
It is recommended to consult an expert to perform the sacred ceremony. The above work is a combination of the 700 śloka of Durgā Saptaśatī and its 700 tantra bīja.

Proofread and revised by Preeti Bhandare

---

*Bijatmak Tantra Durga Saptashati*
pdf was typeset on August 16, 2024

Please send corrections to *sanskrit@cheerful.com*